केन्द्रीय माध्यमिक शिक्षा बोर्ड, नई दिल्ली के नवीनतम पाठ्यक्रमानुसार

सरस्वती

# संस्कृत व्याकरण

[नवमी कक्षा के विद्यार्थियों के लिए]

लेखक

**हरि ओ३म् शास्त्री**

*एम०ए० (संस्कृत-हिन्दी), बी०एड्०*

**न्यू सरस्वती हाउस ( इंडिया ) प्रा०लि०**

नई दिल्ली-110002

# संस्कृतस्य नवीनपाठ्यक्रमः (कोड नं. 122)

**कक्षा–नवमी** **80 अङ्काः**

## खण्डः 'क'–अपठित-अवबोधनम् 5 अङ्काः

**एकः गद्यात्मकः खण्डः**

**70-80 शब्दपरिमितः गद्यांशः ( सरलकथा वर्णनम् वा )** 3

❖ एकपदेन पूर्णवाक्येन च अवबोधनात्मकं कार्यम्

❖ अनुच्छेद-आधारितम् भाषिकं कार्यम् (MCQ)

**भाषिककार्याय तत्वानि** 2

❖ वाक्ये-कर्तृ-क्रिया पदचयनम्

❖ कर्तृ-क्रिया-अन्वितिः

❖ विशेषण-विशेष्य-चयनम्

❖ सर्वनामप्रयोगः

❖ पर्याय-विलोमपद-चयनम्

## खण्डः 'ख'–रचनात्मकं-कार्यम् 15 अङ्काः

**(*i*) सङ्केताधारितम् औपचारिकं अथवा अनौपचारिकं पत्रम्** 5

**(*ii*) चित्राधारितम् वर्णनम् अथवा अनुच्छेदलेखनम्** 5

**(*iii*) हिन्दीभाषायाम् आङ्ग्लभाषां वा लिखितानां पञ्चसरलवाक्यानां संस्कृतभाषायाम् अनुवादः** 5

## खण्डः 'ग'–अनुप्रयुक्त-व्याकरणम् 25 अङ्काः

**1. संस्कृतवर्णमाला** 3

(अ) वर्तनी – वर्णसंयोजनं, वर्णविच्छेदश्च 1

(आ) उच्चारणस्थानानि 2

**2. वाक्येषु अनुच्छेदे वा सन्धिकार्यम् ( पाठाधारितम् )** 4

(अ) स्वरसन्धिः – दीर्घः, गुणः, वृद्धिः 1

(ब) व्यञ्जनसन्धिः – म् स्थाने अनुस्वारः, णत्वविधानम्, वर्गीय–प्रथम–अक्षराणां तृतीयवर्णे परिवर्तनम्, त् स्थाने ल्, र् पूर्वस्य रेफस्य लोपः दीर्घस्वरत्वं च 2

(स) विसर्गसन्धिः – विसर्गस्य उत्वं, रत्वं च 1

**3. शब्दरूपाणि** 6

(क) पुल्लिङ्गशब्दाः अकारान्ताः–बालकवत्, इकारान्ताः–मुनिवत् 1

(ख) स्त्रीलिङ्गशब्दाः (अजन्ताः) आकारान्ताः–लतावत्, ईकारान्ताः–नदिवत् 1

(ग) नपुंसकलिङ्गशब्दाः आकारान्ताः–फलवत्, इकारान्त–वारि 1

| | | |
|---|---|---|
| (घ) सर्वनामशब्दाः | – तत्, किम् (त्रिषु लिंङ्गेषु) | 1 |
| (ङ) संख्यावाचकशब्दाः | – एकतः–चतुर्पर्यन्तम् (त्रिषु लिंङ्गेषु) | 2 |

**4. धातुरूपाणि** 3

| | | |
|---|---|---|
| (अ) परस्मैपदिनः | – अस्, भू, पठ्, (लट्, लृट्, लङ्, लोट्, विधिलिङ् इति 5 लकारेषु) | 2 |
| (आ) आत्मनेपदिनः | – सेव्, लभ् (लट्, लृट्, लकारयोः) | 1 |

**5. उपपदविभक्तीनां प्रयोगः** 4

अनुच्छेदे, वार्तालापे, लघुकथायाम् वाक्येषु, वा–

द्वितीया – समया, प्रति, धिक्, विना, अभितः, परितः, उभयतः।

तृतीया – विना, अलम्, काणः, सह।

चतुर्थी – कुप, स्वस्ति, नमः, स्वाहा।

पञ्चमी – ऋते, बहिः, अनन्तरम्, भी।

षष्ठी – अन्तः, उपरि, पुरः, अधः।

सप्तमी – प्रवीणः, चतुरः, श्रेणीनिर्धारणम्

**6. प्रत्ययाः** – वाक्येषु प्रयोगः –तुमुन्, क्त्वा, ल्यप् 3

**7. उपसर्गाः** – (प्र, परा,–आदयः 22 उपसर्गाः) 2

## खण्डः 'घ'–पठित-अवबोधनम् 35 अङ्काः

## शेमुषी पाठ्यपुस्तकम् अधिकृत्य

**1. गद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्** 6

प्रश्नप्रकाराः–एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि, भाषिककार्यं च।

**2. पद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम्** 6

प्रश्नप्रकाराः–एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि, भाषिककार्यं च।

**3. नाट्यांशम् अधिकृत अवबोधनात्मकं कार्यम्** 6

प्रश्नप्रकाराः–एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि, भाषिककार्यं च।

**4. श्लोकान्वयः ( द्वयोः श्लोकयोः )/ एकस्य श्लोकस्य भावार्थः** 4

**5. वाक्येषु रेखाङ्कितपदानि अधिकृत्य पञ्च-प्रश्नानां निर्माणम्** 5

**6. घटनाक्रमानुसारं कथालेखनम्** 4

**7. पर्यायपदानां विलोमपदानां वा मेलनम् अथवा वाक्येषु प्रयोगः** 4

(पाठान् आधृत्य बहुविकल्पात्मकाः/लघु–उत्तरात्मकाः प्रश्नाः)

पुस्तकम्–'शेमुषी' संस्कृतपुस्तकम् ( नवमश्रेण्यै )

| पाठ्संख्या | पाठनाम |
|---|---|
| प्रथमः पाठः | भारतीवसन्तगीतिः |
| द्वितीयः पाठः | स्वर्णकाकः |
| तृतीयः पाठः | सोमप्रभम् |
| चतुर्थः पाठः | कल्पतरुः |
| पंचमः पाठः | सूक्तिमौक्तिकम् |
| षष्ठः पाठः | भ्रान्तो बालः |
| सप्तमः पाठः | प्रत्यभिज्ञानम् |
| अष्टमः पाठः | लौहतुला |
| नवमः पाठः | सिकतोसेतुः |
| दशमः पाठः | जटायोः शौर्यम् |
| एकादशः पाठः | पर्यावरणम् |
| द्वादशः पाठः | वाङ्मनः प्राणस्वरूपम् |

निर्धारित पाठ्यपुस्तकें

1. 'शेमुषी' प्रथमो भागः, पाठ्यपुस्तकम् संशोधितसंस्करणम् (प्रकाशनम्–रा०शै०अनु०प्र०परि० द्वारा)।
2. 'अभ्यासवान् भव'–प्रथमो भागः–व्याकरणपुस्तकम् (प्रकाशनम् (रा०शै०अनु०प्र०परि० द्वारा)।
3. 'व्याकरणवीथिः'–व्याकरणपुस्तकम् (प्रकाशनम् (रा०शै०अनु०प्र०परि० द्वारा)।

## खण्डानुसारं विषयाः मूल्यभारः च

**'क' खण्डः अपठित-अवबोधनम्** — **5 अङ्काः**

**'ख' रचनात्मक-कार्यम्** — **15 अङ्काः**

**'ग' खण्डः अनुप्रयुक्त-व्याकरणम्** — **25 अङ्काः**

**'घ' पठित-अवबोधनम्** — **35 अङ्काः**

| खण्डः | विषयाः | प्रश्नप्रकाराः | प्रश्नसङ्ख्याः | मूल्यभारः |
|---|---|---|---|---|
| 'क' | | अपठित–अवबोधनम् | | |
| 1. | एकः अनुच्छेदः | अति-लघूत्तरात्मकाः पूर्णवाक्यात्मकाः लघूउत्तरात्मकाः (भाषिककार्यम्) | 1 | 5 |
| | योगः | | | 5 |
| 'ख' | | रचनात्मकः-कार्यम् | | |
| 2. | औपचारिकं अथवा अनौपचारिकं पत्रम् | निबन्धात्मकाः | 1 | 5 |

| | | | | |
|---|---|---|---|---|
| 3. | चित्रवर्णनम् अथवा अनुच्छेदलेखनम् | निबन्धात्मका: | 1 | 5 |
| 4. | पञ्चसरलवाक्यानां संस्कृतेन अनुवाद: | पूर्णवाक्यात्मका: | 1 | 5 |
| | **योग:** | | | **15** |
| 'ग' | **अनुप्रयुक्त-व्याकरणम्** | | | |
| 5. | संस्कृतवर्णमाला वर्ण–1 अंक:<br>उच्चारणस्थानानि–2 अंकौ | ल०उ० | 1 | 3 |
| 6. | सन्धिकार्यम् विसर्ग–1 अंक:<br>स्वर–1 अंक:, व्यंजन–2 अंकौ | ल०उ० | 1 | 4 |
| 7. | शब्दरूपाणि पुल्लिंगा–1 अंक:<br>स्त्रीलिंग–1 अंक:<br>नपुंसकलिंग:–1 अंक:<br>सर्वनामशब्दा:–1 अंक:<br>संख्यावाचका: शब्दा:– 2 अंकौ | ल०उ० | 1 | 6 |
| 8. | धातुरूपाणि परस्मैपदिन:–2 अंकौ<br>आत्मनेपदि:–1 अंक: | ल०उ० | 1 | 3 |
| 9. | उपपदविभक्तय: | ल०उ० | 1 | 4 |
| 10. | प्रत्यया: | ल०उ० | 1 | 3 |
| 11. | उपसर्गा: | | 1 | 2 |
| | **योग:** | | | **25** |
| 'घ' | **पठित-अवबोधनम्** | | | |
| 12. | गद्यांश: | अति-लघूत्तरात्मका:, पूर्णवाक्यात्मका:<br>लघूत्तरात्मका: (भाषिककार्यम्) | 1 | 6 |
| 13. | पद्यांश: | अति-लघूत्तरात्मका:, पूर्णवाक्यात्मका:<br>लघूत्तरात्मका: (भाषिककार्यम्) | 1 | 6 |
| 14. | नाट्यांश: | अति-लघूत्तरात्मका:, पूर्णवाक्यात्मका:<br>लघूत्तरात्मका: (भाषिककार्यम्) | 1 | 6 |
| 15. | प्रश्न-निर्माणम् | पूर्णवाक्यात्मका: | 1 | 5 |
| 16. | अन्वय: अथवा एकस्य श्लोकस्य<br>भावार्थ: –4 अकौ | लघूत्तरात्मका:/पूर्णवाक्यात्मका: | 1 | 4 |
| 17. | घटनाक्रमानुसार वाक्य लेखनम् | पूर्णवाक्यात्मका: | 1 | 4 |
| 18. | शब्दार्थमेलनम्/विलोममेलनम् | बहुविकल्पात्मकम्/लघूउत्तरात्मका: | 1 | 4 |
| | **योग:** | | | **35** |
| **सम्पूर्ण भार:** | | | | **80** |

# विषय-सूची


**खण्ड: 'क' ( अपठित-अवबोधनम् )** **11–42**

( क ) एक: सरलगद्यांश: (70-80 शब्दपरिमित: गद्यांश:) 13–37

• **अपठित अवबोधनस्य विचारबिन्दव:** 38–42

**खण्ड: 'ख' ( रचनात्मकं कार्यम् )** **43–114**

**ख1.** पत्रलेखनम् (दशरिक्तस्थानयुक्तं पत्रम्) 45–74

**ख2.** सङ्केताधारितम् अनुच्छेदलेखनम्/चित्रवर्णनम् 75–100

**ख3.** पञ्चसरलवाक्यानां संस्कृतेन अनुवाद: 101–102

• सङ्केताधारितम् वार्तालाप: 103–107

• **रचनात्मकं कार्यस्य विचारबिन्दव:** 108–114

**खण्ड: 'ग' ( अनुप्रयुक्त-व्याकरणम् )** **115–316**

**ग1.** संस्कृत वर्णमाला (वर्तनी-विन्यास: उच्चारण-स्थानानि च) 117–132

**ग2.** सन्धि-प्रकरणम् 133–164

**ग3.** शब्द-रूप प्रकरणम् 165–204

**ग4.** धातु-रूप प्रकरणम् 205–252

**ग5.** कारका: उपपदविभक्तय: च 253–276

**ग6.** प्रत्यया: 277–302

**ग7.** उपसर्गा: 303–306

• **अनुप्रयुक्त व्याकरणस्य विचारबिन्दव:** 307–316

• **प्रश्नपत्रम् ( अभ्यास-प्रश्नपत्रम् )** **317–336**

# खण्डः 'क'–अपठित-अवबोधनम्

## अङ्क-विभाजनम्

**खण्डः 'क'—अपठित-अवबोधनम्** **5 अङ्काः**

**( एकः गद्यात्मकः खण्डः )**

**70-80 शब्दपरिमितः गद्यांशः ( सरल कथा वर्णनम् वा )** **3**

- एकपदेन पूर्णवाक्येन च अवबोधनात्मकं कार्यम्
- अनुच्छेद-आधारितम् भाषिकं कार्यम् (MCQ)
- समुचितशीर्षकप्रदानम्

**भाषिककार्याय तत्त्वानि** **2**

- वाक्ये-कर्तृ-क्रियापदचयनम्
- कर्तृ-क्रिया-अन्वितिः
- विशेषण-विशेष्य-चयनम्
- सर्वनामप्रयोगः
- पर्याय-विलोमपद-चयनम्

# क अपठित-अवबोधनम्

## अपठित-अवबोधनम्
## ( सरलगद्यांशम् आधारितं कार्यम् )

परीक्षा में एक अपठित गद्यांश पूछा जाएगा। गद्यांश 70-80 शब्दों का 10 अङ्कों का होगा। अपठित गद्यांश के प्रश्नों के उत्तर देते समय निम्न बातों का ध्यान रखना चाहिए—

- गद्यांश को तब तक बार-बार पढ़ना चाहिए जब तक उसका अर्थ या भाव स्पष्ट न हो जाए।
- किसी शब्द का अर्थ स्पष्ट न होने की स्थिति में उस वाक्य को पढ़कर शब्द का भाव ग्रहण करने का प्रयत्न करना चाहिए जिस वाक्य में उक्त कठिन शब्द प्रयुक्त हुआ है।
- शीर्षक गद्यांश का केन्द्रीय भाव होना चाहिए।
- शीर्षक एक या दो शब्दों या गद्यांश/श्लोक की एक अति महत्त्वपूर्ण पंक्ति में ही होना चाहिए।
- व्याकरणिक प्रश्नों का उत्तर देते समय उस वाक्य को ध्यान से पढ़ लेना चाहिए जिस वाक्य से उक्त प्रश्न लिया गया है।

## अधोलिखितान् 70-80 शब्दपरिमितान् गद्यांशान्, सरलकथां घटनावर्णनं वा पठित्वा प्रश्नान् उत्तरत 5 अङ्काः

### उदाहरणार्थम्

**1**

हिरण्यकोऽपि तद्वचनमाकर्ण्य अचिन्तयत्—अहो विनष्टोऽस्मि, नूनं यथा अनेन निधानं ज्ञातं तथा दुर्गमपि अस्माकं ज्ञास्यति। ततः सः मूषकः भयत्रस्तमनः सपरिवारः दुर्गमपि परित्यज्य अन्यमार्गेण गन्तुं प्रवृत्तः। सपरिजनो यावदग्रतो गच्छति तावत् सम्मुखे बृहत्कायो मार्जारः समायाति। सः च मूषकवृन्दम् अवलोक्य तन्मध्ये सहसा उत्पपात। अथ ते मूषकाः स्वाधिपतिं मूषकं कुमार्गगामिनं गर्हयन्तः तमेव दुर्गं प्रविष्टाः।

**प्रश्नाः—उपर्युक्त गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत—**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) मूषकस्य किं नाम आसीत्? **उत्तर :** हिरण्यकः।

(*ii*) सम्मुखे कः आयाति? **उत्तर :** मार्जारः।

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) **हिरण्यकः किम् अचिन्तयत्?**

**उत्तर :** हिरण्यकः अचिन्तयत् अहो विनष्टोऽस्मि, नूनं यथा अनेन निधानं ज्ञातम् तथा दुर्गमपि अस्माकं ज्ञास्यति।

(*ii*) **अथ ते मूषकाः कथं स्वदुर्गं प्रविष्टाः?**

**उत्तर :** अथ ते मूषकाः स्वाधिपतिं मूषकं कुमार्गगामिनं गर्हयन्तः तमेव दुर्गं प्रविष्टाः।

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.)

(*i*) **'अचिन्तयत्' इति क्रिया पदस्य कर्तृपदं लिखत।**

(क) हिरण्यकः (ख) हिरण्यकोऽपि (ग) तद्ववचनम् (घ) आकर्ण्य

**उत्तर :** (क) हिरण्यकः।

(*ii*) **'बृहत्कायो मार्जारः' इत्यनयोः पदयोः विशेषणं किम्?**

(क) बृहत् (ख) कायः (ग) कायो (घ) बृहत्कायः

**उत्तर :** (घ) बृहत्कायः।

(*iii*) **'स च मूषकवृन्दम् अवलोक्य'। अत्र 'स' पदं कस्मै प्रयुक्तम्?**

(क) हिरण्यकाय (ख) मार्जाराय (ग) बृहत्कायाय (घ) मूषकाय

**उत्तर :** (ख) मार्जाराय।

(*iv*) **'तमेव दुर्गं प्रविष्टाः' अस्मिन् वाक्ये 'प्रविष्टाः' इति पदस्य कर्तृपदं किम्?**

(क) ते (ख) अथ (ग) मूषकाः (घ) गर्हयन्तः

**उत्तर :** (ग) मूषकाः।

**IV. अस्य गद्यांशस्य उचितं शीर्षकं लिखत।**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

**उत्तर :** मूषकः मार्जारः च।

## 2

एकदा गोविन्दः आपणे कान्दविकात् मोदकान् क्रेतुमगच्छत्। सः कान्दविकः महावञ्चकः आसीत्। सः सदा न्यूनमेवातोलयत्। सः गोविन्दाय यथोचितमात्रादल्पमेवायच्छत्, तदा गोविन्दः अवदत्—किं भोः! मह्यं पूर्णं परिमाणं न प्रयच्छसि? तत् श्रुत्वा कान्दविकः प्रत्यवदत्—का हानिः? यावदल्पं ते ददामि तावत्ते भारः सुवहो भविष्यति। गोविन्दोऽपि तस्य शाठ्यं प्रतिकर्तुमेकेन रुप्यकेन हीनं मूल्यमददात्। ततः कान्दविकः सरोषमाह—किं मेऽल्पमेव मूल्यं ददासि? आम्—यथा ते गणनायां नायासो भवेदिति कथयित्वा गोविन्दः गृहं प्रत्यागच्छत्।

**प्रश्नाः–उपर्युक्त गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) गोविन्दः आपणे किं क्रेतुम् अगच्छत्? **उत्तर :** मोदकान्।

(*ii*) कान्दविकः कीदृशः आसीत्? **उत्तर : महावञ्चकः।**

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) **गोविन्दः मोदकान् क्रेतुं कुत्र अगच्छत्?**

**उत्तर :** गोविन्दः मोदकान् क्रेतुम् आपणम् अगच्छत्।

(*ii*) **गोविन्दः कान्दविकम् किम् अपृच्छत्?**

**उत्तर :** गोविन्दः कान्दविकम् अपृच्छत्–किं भोः! मह्यम् पूर्णं परिमाणं न प्रयच्छसि?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.)

(*i*) **'सः सदा न्यूनमेवातोलयत्' अत्र 'सः' पदं कस्मै प्रयुक्तम्?**

(क) गोविन्दाय (ख) बालकाय (ग) कान्दविकाय (घ) तस्मै **उत्तर :** (ग) कान्दविकाय।

(*ii*) **'कान्दविकः महावञ्चकः' अत्र किं विशेषणम् अस्ति?**

(क) महावञ्चकः (ख) वञ्चकः (ग) महान् (घ) कान्दविकः **उत्तर :** (क) महावञ्चकः।

(*iii*) अनुच्छेदे 'मात्राम्' इति शब्दस्यार्थे किं पदं प्रयुक्तमस्ति ?

(क) परिमाणं (ख) परिणामं (ग) मात्रं (घ) मात्रा **उत्तर :** (क) परिमाणं।

(*iv*) अनुच्छेदे 'अगच्छत्' इति क्रियायाः कर्तृपदं किं वर्तते ?

(क) कान्दविकः (ख) गोविन्दः (ग) भारः (घ) वञ्चकः **उत्तर :** (ख) गोविन्दः

**IV. अस्य गद्यांशस्य उचितं शीर्षकं लिखत।**

(गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for the passage.)

**उत्तर :** शठे शाठ्यं समाचरेत् गोविन्दः कान्दविकः च।

## अभ्यासः

**निम्नलिखितान् गद्यांशान् पठित्वा प्रश्नान् उत्तरत।** (निम्नलिखित गद्यांश को पढ़कर प्रश्नों के उत्तर दीजिए। Read the paragraph and answer the questions given below.)

### 1

श्रीगान्धिमहोदयस्य जन्म गुजरात प्रदेशस्य पोरबन्दरनगरे अभवत्। शिक्षां समाप्य विधिशिक्षायै विदेशं गच्छन् सः मातुः समीपं तिस्रः प्रतिज्ञाः अकरोत्—नाहं विदेशे मदिरासेवनं करिष्ये, न मांसस्पर्शमपि करिष्यामि, पूर्णरूपेण ब्रह्मचर्यव्रतमाचरिष्यामि। ततः प्रत्यावृत्य सः स्वराज्यप्राप्तये विचारधारानुयायिनां शिक्षितानां स्वदेशानुरागिणां जनानाम् एकां राष्ट्रीयमहासभाम् अस्थापयत्। वास्तविकं भारतं ग्रामेषु एव वसति इति विचार्य ग्रामीणजनानां दशां तेषां मनःस्थितिं च ज्ञातुं सः दीर्घं पदयात्राम् अकरोत्। ग्रामेषु अनेकान् सामाजिकदोषान् दूरीकुर्वन् सः महतीं प्रतिष्ठाम् अविन्दत्।

**प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) श्रीगान्धिमहोदयस्य जन्म कस्मिन् प्रदेशे अभवत् ?

(*ii*) सः मातुः समीपं कति प्रतिज्ञाः अकरोत् ?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) मातुः समीपं गान्धी काः प्रतिज्ञाः अकरोत् ?

(*ii*) महात्मागान्धिः स्वराज्यप्राप्तये काम् अस्थापयत्?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'नाहं विदेशे मदिरां सेविष्ये' अत्र 'अहं' पदं कस्मै प्रयुक्तम् ?

(क) गान्धिने (ख) श्रीमहोदयाय (ग) श्रीगान्धिमहोदयाय (घ) महात्मने

(*ii*) 'लघ्वीं' पदस्य विपर्ययः अनुच्छेदे कः ?

(क) दीर्घाम् (ख) विस्तृताम् (ग) बृहतीम् (घ) तन्वीम्

(*iii*) 'तिस्रः' पदस्य लिङ्गं लिखत।

(क) पुंल्लिङ्गम् (ख) स्त्रीलिङ्गम् (ग) नपुंसकलिङ्गम्

(*iv*) 'देशप्रेमीणाम्' पदस्य कः पर्यायः अनुच्छेदे लिखितः ?

(क) अनुरागीणाम् (ख) स्वदेशीनाम् (ग) स्वदेशानुरागीणाम् (घ) अनुयापिनाम्

**IV. उपरिलिखितस्य गद्यांशस्य उचितं शीर्षकं लिखत।**

(ऊपर लिखे गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for the passage.)

## 2

भारते षट् ऋतवः सन्ति। तेषु वसन्तः ऋतुराजः कथ्यते। चैत्रे वैशाखे च मासे वसन्तः भवति। वसन्ते द्वौ प्रमुखौ उत्सवौ भवतः वसन्तोत्सवः होलिकोत्सवः च। वसन्तोत्सवे सर्वत्र प्रमादो भवति। नराः नार्यश्च सर्वत्र गायन्ति नृत्यन्ति च। होलिकोत्सवः फाल्गुनमासस्य पूर्णिमायां भवति। हर्षातिरेकेण नराः, नार्यः, युवानः, वृद्धाः, बालकाश्च प्रसन्नाः भवन्ति। जनाः परस्परं रक्तवर्णं रक्तचूर्णञ्च प्रक्षिपन्ति। द्वेषं विस्मृत्य सर्वे परस्परं मिलन्ति।

**प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) ऋतुराजः कः कथ्यते?

(*ii*) कदा द्वेषं विस्मृत्य सर्वे परस्परं मिलन्ति?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) वसन्तोत्सवे सर्वत्र किम् भवति?

(*ii*) वसन्तः कदा भवति?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'तेषु वसन्तः ऋतुराजः कथ्यते'। अत्र 'तेषु' पदं केभ्यः प्रयुक्तम्?

(क) ऋतुभ्यः (ख) सर्वेभ्यः (ग) मासेभ्यः (घ) उत्सवेभ्यः

(*ii*) अनुच्छेदे 'स्मृत्वा' पदस्य विपर्ययः कः?

(क) द्वेषं (ख) विस्मृत्य (ग) विस्मृ (घ) स्मृ

(*iii*) अनुच्छेदे 'प्रक्षिपन्ति' इति क्रियायाः कर्तृपदं किम्?

(क) वृद्धाः (ख) युवानः (ग) नराः (घ) जनाः

(*iv*) 'स्त्रियः' इति पदस्य कः पर्यायः अत्र प्रयुक्तः?

(क) नराः (ख) नार्यः (ग) युवतयः (घ) युवत्यः

**IV. उपरिलिखितस्य गद्यांशस्य उचितं शीर्षकं लिखत।**

(ऊपर लिखे गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for the passage.)

## 3

'दहेज' अथवा 'दायज' इति शब्दः समाजस्य एकः कलंकः अस्ति। विवाहः जीवनस्य एका अमूल्या निधिरस्ति। विवाहस्य जीवनेन सह अभिन्नः सम्बन्धः अस्ति। दहेजस्यकारणेन निर्धनानां तु कन्यकाः बहुकालम् अविवाहिताः भवन्ति। इयं प्रथा अस्माकं देशे जनसामान्ये न पुरा प्रचलिता आसीत्। मध्यकाले सामन्तयुगे राजानः स्वकन्याभ्यः विवाहेषु अपारधनराशिम् सुखसाधनानि च दातुं प्रारभन्त। अद्य तु इयं प्रथाऽस्माकं समाजे दृढ़ परम्परा विद्यते। दहेजस्य ब्रह्मराक्षसः स्वबाहुपाशे जनसाधारणं संनिगृह्य अट्टहासं करोति। एकतः पिता स्वकन्यां महादानमिव वराय यच्छति अपरतः पुनः रुप्यकाणि अपि दीयन्ते। किमर्थं एतावान् महाराशिः शुल्कं वा कन्यायाः पित्रा वरपित्रे दीयते, अयमेव प्रश्नः।

**प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) निर्धनानां कन्यकाः कीदृश्यः भवन्ति?

(*ii*) किम् जीवनस्य अमूल्या निधिरस्ति?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) दहेजस्य ब्रह्मराक्षसः किं कृत्वा अट्टहासं करोति?

(*ii*) मध्यकाले राजानः किं प्रारभन्त?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'इयं प्रथा' इत्यत्र किं विशेषणम् अस्ति?

(क) प्रथा (ख) इयम् (ग) प्रथां (घ) इयंप्रथा

(*ii*) अनुच्छेदे 'ब्रह्मराक्षसः' कस्मै कथितम्?

(क) दायजाय (ख) कलंकाय (ग) समाजाय (घ) शब्दाय

(*iii*) 'अस्ति' पदस्य अर्थे अनुच्छेदे कः शब्दः आगतः?

(क) आसीत् (ख) विद्यते (ग) करोति (घ) दीयते

(*iv*) 'इयं प्रथाऽस्माकं समाजे' इत्यत्र कस्याः प्रथायाः वर्णनमस्ति?

(क) दायजस्य (ख) समाजस्य (ग) वरस्य (घ) शब्दस्य

**IV. उपरिलिखितस्य गद्यांशस्य उचितं शीर्षकं लिखत।**

(ऊपर लिखे गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for the passage.)

## 4

ततः मुहूर्तेन कोऽपि कापालिकः समागतः। तं वीक्ष्य बुद्धिसागरः प्राह—योगीन्द्र! कुतः आगम्यते? कुत्र ते निवेशश्च? योगी प्राह—देव, अस्माकं नैको देशः। सकलं भूमण्डलं भ्रमामः। राजा तं दण्डवत् प्रणम्य आह—मया हतस्य पुत्रस्य प्राणदानेन मां रक्ष। कापालिकोऽवदत् राजन्, मा भैषीः! पुत्रस्ते न मरिष्यति शिवप्रसादेन च गृहमेष्यति। ततो रात्रौ गूढरूपेण भोजोऽपि तत्र आनीतः। योगिना भोजो जीवितः। अन्ते च भोजराजो राजभवनम् अगात्। ततः सन्तुष्टो राजा निजसिंहासने निवेश्य तस्मै राज्यं ददौ।

**प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) मुहूर्तेन कः समागतः?

(*ii*) सन्तुष्टो राजा बालकं भोजं कुत्र निवेश्य राज्यं ददौ?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) राजा कापालिकं दण्डवत् प्रणम्य किं प्राह?

(*ii*) तं वीक्ष्य बुद्धिसागरः किं प्राह?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'दृष्ट्वा' पदस्य अर्थे अनुच्छेदे कः शब्दः प्रयुक्तः?

(क) वीक्ष्य (ख) वीक्ष्म (ग) आनीतः (घ) प्रणम्य

(*ii*) 'राजा तस्मै राज्यं ददौ' अत्र 'तस्मै' पदं कम् प्रति प्रयुक्तम्?

(क) भोजम् (ख) कापालिकम् (ग) भोजराजम् (घ) नृपम्

(*iii*) 'जीवितः' इति क्रियायाः अनुच्छेदे कर्तृपदं किम्?

(क) योगी (ख) योगि (ग) योगिना (घ) भोजः

(*iv*) अनुच्छेदे 'प्रजा' इत्यस्य पदस्य कः विपर्ययः प्रयुक्त?

(क) सचिवः (ख) मन्त्री (ग) भोजः (घ) राजा

**IV. अस्य गद्यांशस्य उचितं शीर्षकं लिखत।**

(गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for the passage.)

## 5

श्रीमदनमोहनमालवीयस्य जन्म प्रयागेऽभवत्। अस्य पिता श्री ब्रजनाथः संस्कृतविद्वान् आसीत्। प्रयागे 'बी०ए०' परीक्षामुत्तीर्य मदनमोहनः अध्यापकोऽभवत्। पश्चात् सः पत्रस्य सम्पादकः अभवत्। संभाषणे सः अतिपटुः आसीत्। कालान्तरे सः स्वतन्त्रता-संग्रामे कारावासं प्राप्तवान्। राजनीतौ सः प्रसिद्धः आसीत्। शिक्षायामपि सः पारंगतोऽभवत् वाराणस्यां सः हिन्दुविश्वविद्यालयस्य स्थापनामकरोत्। अस्य सञ्चालनाय सः कोटिशः रुप्यकाणि संगृहीतवान्। सः जनेषु 'महामना' इति ख्यातः।

**प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**प्रश्नाः—I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) कः राजनीतौ प्रसिद्धः आसीत्?

(*ii*) श्री मदनमोहनमालवीयस्य जन्म कुत्र अभवत्?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) पं० मदनमोहन मालवीयः वाराणस्यां किम् अकरोत्?

(*ii*) कदा मदनमोहनः अध्यापकोऽभवत्?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'अध्यापकः' पदं स्त्रीलिङ्गे परिवर्तयत।

(क) अध्यापका (ख) अध्यापिकः (ग) अध्यापिका (घ) अध्यापिकी

(*ii*) 'राजनीतौ सः प्रसिद्धः आसीत्' अत्र 'सः' पदं कस्मै प्रयुक्तम्?

(क) श्रीमदनाय (ख) श्री मोहनाय (ग) श्रीमदनमोहनमालवीयाय (घ) मालवीयाय

(*iii*) 'अकुशलः' पदस्य कः विपर्ययः अनुच्छेदे प्रयुक्तः?

(क) पटुः (ख) अतिपटुः (ग) प्रवीणः (घ) पारंगतः

(*iv*) 'पारंगतः' पदस्य अर्थमस्ति।

(क) परं गतः (ख) प्रवीणः (ग) अकुशलः (घ) कुशलम्

**IV. अस्य गद्यांशस्य उचितं शीर्षकं लिखत।**

(गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for the passage.)

## 6

संसारे जनाः सुखम् इच्छन्ति। सुखं च धनेन एव प्राप्तुं शक्यते। अतः धनोपार्जनस्य आवश्यकता भवति। यस्य पार्श्वे धनं भवति सः सुखेन शेते। निर्धनं पुरुषं तु मित्राणि अपि त्यजन्ति। चौर्येण कपटेन च प्राप्तं धनं विनाशकरं भवति। कृषिकर्मणा, व्यापारेण परिश्रमेण च प्राप्तं धनं फलति। यद् धनं फलति तेनैव सुखं मिलति। धनहीनोऽपि सुखी भवति। सुखम् तु मनसा अनुभूयते। यत्र संतोषः तत्रैव वस्तुतः सुखम्।

**प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) कुत्र जनाः सुखम् इच्छन्ति?

(*ii*) केन प्राप्तं धनं विनाशकरं भवति?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) कथं धनोपार्जनस्य आवश्यकता भवति?

(*ii*) कथं प्राप्तं धनं फलति?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'समीपम्' इत्यस्य पदस्य अर्थे कः शब्दः अनुच्छेदे प्रयुक्तः?

(क) सुखे (ख) पार्श्वे (ग) धने (घ) बले

(*ii*) 'निर्धनं पुरुषं' अनयोः पदयोः किं विशेषणम् अस्ति?

(क) निर्धनं (ख) पुरुषं (ग) निर्धनपुरुष (घ) पुरुष

(*iii*) 'धनवान्' इति पदस्य कः विपर्ययः प्रयुक्तः?

(क) निर्धनं (ख) धनी (ग) धनहीनः (घ) धनहीनोऽपि

(*iv*) 'अनुभूयते' क्रियापदस्य किं कर्तृपदम् अस्मिन् अनुच्छेदे प्रयुक्तम्?

(क) मनसा (ख) सुखम् (ग) बुद्ध्या (घ) शरीरेण

**IV. अस्य गद्यांशस्य उचितं शीर्षकं लिखत।**

(गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for the passage.)

## 7

भारतदेशः अस्माकं प्रियः देशः। एषः देशः देशानां शिरोमणिः खलु। अस्य प्राकृतिकं सौन्दर्यं बलवत् मनः मोहयति। अस्य उत्तरदिशायां पर्वतराजः हिमालयः विराजते। एषः पर्वतः भारतस्य प्रहरी खलु। भारतस्य दक्षिणदिशायां महासागरः अस्य चरणौ प्रक्षालयति। अस्य अङ्के अनेकाः नद्यः क्रीडन्ति। एतासां नदीनां तटेषु महान्ति नगराणि विराजन्ते। एतासां नदीनां जलं क्षेत्राणां सिञ्चनाय विद्युतः उत्पादनाय च प्रयुज्यते। भारतस्य हरित-हरितानि वनानि अस्य शोभां निरन्तरं वर्धयन्ति।

**प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) कः देशः अस्माकं प्रियो देशः वर्तते?

(*ii*) हिमालयः खलु कस्य प्रहरी अस्ति?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) नदीनां जलं किमर्थं प्रयुज्यते?

(*ii*) कः कुत्र च भारतस्य चरणौ प्रक्षालयति?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'प्रयोगं भवति' इत्यस्य पदस्य अर्थे अनुच्छेदे कः शब्दः प्रयुक्तः?

(क) प्रयुज्यते (ख) विराजते (ग) प्रक्षालयति (घ) वर्धयति

(*ii*) अनुच्छेदे 'पर्वतराजः' इति विशेषणस्य विशेष्यः कः?

(क) अस्य (ख) उत्तरदिशायां (ग) हिमालयः (घ) भारतदेशः

(*iii*) 'विराजन्ते' इति क्रियायाः गद्यांशे कर्तृपदं किम्?

(क) महान्ति (ख) नगराणि (ग) वनानि (घ) गृहाणि

(*iv*) अनुच्छेदे 'लघूनि' इत्यस्य पदस्य कः विपर्ययः आगतः?

(क) वनानि (ख) नगराणि (ग) महान्ति (घ) हरितानि

**IV. उपरिलिखितस्य गद्यांशस्य उचितं शीर्षकं लिखत।**

(गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for the passage.)

## 8

डॉ० बाबासाहेब भीमराव अम्बेडकरस्य जन्मशताब्दी वर्षे भारतशासनेन 'भारतरत्नम्' इति सर्वोच्च-सम्मानपदेन तस्य गौरवं कृतम्। डॉ० महोदयः दलितसमाजस्य यथार्थः उद्धारकः आसीत्। अस्पृश्यतायाः समूलम् उच्चाटनार्थं तेन बहुविधानि आन्दोलनानि कृतानि। अयम् अस्पृश्यजातीयः, अतः अपमानास्पदम् इति बोधः तस्य विद्यार्थिकाले एव जातः। अम्बेडकर-समारब्धैः कार्यैः समाजे शनैः-शनैः सर्वाङ्गं परिवर्तनं जातम्। अद्य तु तत्परिणामेन जातिधर्मादिकम् आश्रित्य भेदोपभेदाः तथा न सन्ति। अम्बेडकरमहोदयानां मान्यता आसीत् यत् दलितानाम् उद्धारार्थं बौद्धधर्मस्य यथार्थः आधारः भवेत्। ततः एव स्वध्येयपूर्तिम् अपि स्यात्।

**प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) डॉ० अम्बेडकर महोदयः कस्य यथार्थः उद्धारकः?

(*ii*) कस्याः समूलम् उच्चाटनार्थं अम्बेडकरेण आन्दोलनानि कृतानि?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) कैः कुत्र च सर्वाङ्गं परिवर्तनम् जातम्?

(*ii*) अम्बेडकरमहोदयानां का मान्यता आसीत्?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'सर्वाङ्गं' इति पदस्य किम् अर्थमस्ति?

(क) अर्धम् (ख) पूर्णम् (ग) अपूर्णम् (घ) अङ्गम्

(*ii*) 'तेन बहुविधानि आन्दोलनानि कृतानि', अत्र 'तेन' पदं कस्मै प्रयुक्तम्?

(क) बाबासाहेबाय (ख) अम्बेडकराय (ग) बाबासाहेबअम्बेडकराय (घ) साहेबाय

(*iii*) प्रथम पङ्क्तौ अव्ययपदं वर्तते—

(क) तस्य (ख) इति (ग) वर्षे (घ) गौरवं

(*iv*) 'यथार्थः आधारः' अनयोः विशेषणपदं किम्?

(क) आधारः (ख) यथार्थ (ग) आधार (घ) यथार्थः

**IV. अस्य गद्यांशस्य उचितं शीर्षकं लिखत।**

(गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for the passage.)

## 9

एकदा राजकुमारः सिद्धार्थः विहारार्थम् उपवनं गतः। सहसा एकं क्रन्दनध्वनिं श्रुत्वा सः इतस्ततः अपश्यत्। बाणेन विद्धः एकः हंसः भूमौ पतितः आसीत्। एतद् दृष्ट्वा सिद्धार्थस्य चित्तं करुणया व्याकुलं जातम्। सः धावित्वा हंसस्य शरीरात् बाणं निष्कास्य तम् अङ्के अधारयत्। अत्रान्तरे देवदत्तः धावन् तत्र प्राप्तः। सिद्धार्थस्य हस्ते हंसं दृष्ट्वा सः उच्चैः अवदत्—"सिद्धार्थ! एषः मम हंसः। मया बाणेन निपातितः। अतः मह्यम् देहि।" सिद्धार्थः दृढतया अवदत्—"अहं न दास्यामि। अहम् अस्य रक्षकः अस्मि।" तदा तौ विवादं कुर्वन्तौ राजसभां गतौ। राजा सर्वं वृत्तान्तम् आकर्ण्य आदिशत्—"यस्य पार्श्वे हंसः आगमिष्यति तस्यैव भविष्यति।" हंसः सिद्धार्थस्य समीपं गतवान्। सत्यमिदम्—**'भक्षकात् रक्षकः श्रेयान्'।**

**प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) हंसः कुत्र पतितः आसीत्?

(*ii*) कः सिद्धार्थस्य समीपं गतवान्?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) सिद्धार्थः किं कृत्वा हंसम् अङ्के अधारयत्?

(*ii*) राजा सर्वं वृत्तान्तम् आकर्ण्य किम् आदिशत्?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'चित्तम्' इति विशेष्य पदस्य विशेषणपदं चित्वा लिखत।

(क) करुणया (ख) व्याकुलं (ग) सिद्धार्थस्य (घ) कठोरं

(*ii*) "मया बाणेन निपातितः। अतः मह्यम् देहि"। अस्मिन् वाक्ये 'मह्यम्' पदं कस्मै प्रयुक्तम्?

(क) सिद्धार्थाय (ख) तस्मै (ग) देवदत्ताय (घ) नृपाय

(*iii*) 'यस्य समीपे हंसः आगमिष्यति' अस्मिन् वाक्ये कर्तृपदं किम्?

(क) हंसः (ख) यस्य (ग) समीपे (घ) आगमिष्यति

(*iv*) 'गतौ' इति क्रियायाः कर्तृपदं किम्?

(क) विवादं (ख) तौ (ग) कुर्वन्तौ (घ) तदा

**IV. अस्याः कथायाः समुचितं शीर्षकं लिखत।**

(इस कहानी का उचित शीर्षक लिखिए। Write an appropriate title for this story.)

**10**

एकः टोपिकाविक्रेता अनेकवर्णाः टोपिकाः विक्रीणाति स्म। एकस्मिन् दिने श्रान्तः सः एकस्य वृक्षस्य शीतलच्छायायाम् उपाविशत्। शनैः शनैः निद्रा तं स्ववशे अकरोत्। सः पुटकं शिरस्तले निधाय अस्वपत्। वृक्षे स्थिताः वानराः विविधवर्णयुक्ताः टोपिकाः पुटके दृष्ट्वा अधः अवातरन्। शनैः शनैः ते पुटकात् टोपिकाः निष्कास्य शिरसि धारयित्वा वृक्षम् आरोहन्। प्रबुद्धः टोपिकाविक्रेता यदा उपरि पश्यति तदा रक्तनीलवर्णाः टोपिकाः धारयतः वानरान् पश्यति। "हा दैव! नष्टाः मे सर्वाः टोपिकाः" इति विलपन् सः आत्मनः शिरसि धारितां टोपिकाम् अपि वेगेन भूमौ क्षिपति कथयति च–'रे दुष्टाः! सर्वाः टोपिकाः तु गृहीताः। एताम् अपि नयत।' प्रकृत्या अनुकरणशीलाः वानराः अपि स्वस्वटोपिकाः भूमौ प्रक्षिप्तवन्तः। आश्चर्यचकितः सः सर्वाः टोपिकाः विचित्य, स्वपुटके स्थापयित्वा प्रसन्नः सन् गृहं प्रति अचलत्।

**प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) टोपिकाविक्रेता काः विक्रीणति स्म?

(*ii*) प्रकृत्या वानराः कीदृशाः भवन्ति?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) प्रबुद्धः टोपिकाविक्रेता वृक्षे किम् अपश्यत्?

(*ii*) वृक्षे स्थिताः वानराः कथम् अधः अवातरन्?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'एताम् अपि नयत' इति अत्र 'एताम्' पदम् कस्मै प्रयुक्तम्?

(क) टोपिकायै (ख) टोपिकामै (ग) जनाय (घ) वृक्षाय

(*ii*) अस्मिन् अनुच्छेदे 'अधः' इति अव्ययस्य किं विलोमपदं प्रयुक्तम्?

(क) यदा (ख) उपरि (ग) नीचैः (घ) बहिः

(*iii*) अनुच्छेदे 'सः' पदस्य विशेषणं किम्?

(क) सर्वाः (ख) टोपिकाः (ग) आश्चर्यचकितः (घ) चकितः

(*iv*) 'एकत्रीकृत्य' इत्यस्य पदस्य पर्यायः अनुच्छेदे कः आगतः?

(क) विचित्य (ख) संचित्य (ग) निधाय (घ) धारयित्वा

**IV. अस्याः कथायाः समुचितं शीर्षकं लिखत।**

(इस कहानी का उचित शीर्षक लिखिए। Write an appropriate title for this story.)

## 11

अये लेखनि! तव महिमा अपूर्वा। सकले विश्वे त्वम् एव ज्ञानं विज्ञानं च प्रसारयसि। काव्यैः रूपकैः कथाभिः गीतैः, च जनान् विनोदयसि। तूलिकायाः सहयोगेन कर्गदान् चित्रमयान् करोषि, सर्वान् च आकर्षसि। विविधेषु विज्ञापनेषु, समाचारपत्रेषु, पत्रिकासु च तव निपुणतां दृष्ट्वा चकिताः भवामः। अनवरतं कर्गदेषु धावन्ती अपि त्वम् कदापि श्रान्ता न भवसि। अस्माकं तु त्वमेव शरणम्। तव सहायतया एव वयं कक्षासु प्रश्नोत्तराणि लिखामः, पुनः पुनः अभ्यासं कुर्मः। परीक्षाकाले त्वां विना न कोऽपि अस्माकं सहायकः। त्वमेव अस्माकं शस्त्रम्। तव शक्तिः तु भीषण-शस्त्रास्त्रेभ्यः अपि गरीयसी। तव उपकारान् कः विस्मर्तुं शक्नोति? सम्पूर्णः संसारः तव भक्तः। त्वम् वन्दनीया असि।

**प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) लेखनी कथाभिः गीतैः कान् विनोदयति?

(*ii*) का वन्दनीया अस्ति?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) लेखन्याः शक्तिः केभ्यः अपि गरीयसी?

(*ii*) कस्मिन् काले लेखनी एव अस्माकं शस्त्रम्?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.)

(*i*) सम्पूर्णः संसारः तव भक्तः। अत्र 'तव' पदं कस्मै प्रयुक्तम्?

(क) लेखन्यै (ख) बालाय (ग) जनाय (घ) तुभ्यम्

(*ii*) 'महिमा' इति शब्दस्य किं विशेषणम्?

(क) तव (ख) अपूर्वा (ग) अपूर्णा (घ) पूर्वा

(*iii*) 'त्वम् वन्दनीया असि'। अत्र कर्तृपदं किम्?

(क) असि (ख) त्वम् (ग) वन्दनीया (घ) वन्दनीयः

(*iv*) 'आश्रय:' इत्यस्य पदस्य क: पर्याय: अनुच्छेदे लिखित: ?

(क) अभ्यासं (ख) निपुणातां (ग) चित्रमयान् (घ) शरणम्

**IV. अस्य अनुच्छेदस्य उचितं शीर्षकं लिखत।**

(इस अनुच्छेद के लिए उचित शीर्षक लिखिए। Write an appropriate title for this article.)

## 12

मधुरं भाषणम् एतादृश: गुण: अस्ति, येन मानव: अखिलमपि जगत् वशीकर्तुम् शक्नोति। मधुरभाषिणं सर्वे प्रेम्णा, विश्वासेन च अवलोकयन्ति। मिष्टभाषी सर्वेषु स्निह्यति तस्मिन् च सर्वे स्निह्यन्ति। वाङ्माधुर्यात् प्रियतरं वाक्पारुष्यात् च अप्रियतरं अन्यत् किमपि नास्ति। मधुरभाषणेनैव जना: कोकिलं आद्रियन्ते, वाक्पारुष्यात् च काक: दूरीक्रियते। कोकिलस्य काकली मयूरस्य च केकारव: कं मुग्धं न करोति ?

**प्रश्ना:–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) सर्वे प्रेम्णा कम् अवलोकयन्ति ?

(*ii*) सर्वेषु क: स्निह्यति ?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) कस्मात् काक: दूरी क्रियते ?

(*ii*) मधुरभाषणेन मानव: किं कर्तुं शक्नोति ?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.)

(*i*) गद्यांशात् उपयुक्तानि पदानि विचित्य रिक्तस्थानं पूरयत–

मयूरस्य च .................................................. कं न मुग्धं करोति।

(क) केकारव: (ख) काकली (ग) स्वर: (घ) गीतम्

(*ii*) अस्मिन् अनुच्छेदे 'प्रियतरम्' इत्यस्य विलोमपदम् किं प्रयुक्तम् अस्ति ?

(क) अप्रियं (ख) अप्रिय (ग) अप्रियतरं (घ) अतिप्रियं

(*iii*) 'अवलोकयन्ति' इति क्रियाया: कर्तृपदं किम् ?

(क) प्रेम्णा (ख) विश्वासेन (ग) सर्वे (घ) मधुरभाषिणं

(*iv*) अनुच्छेदे 'गुण:' विशेष्यपदस्य विशेषणं वर्तते ?

(क) एतादृश: (ख) मधुरं (ग) भाषणं (घ) अस्ति

**IV. अस्य गद्यांशस्य समुचितं शीर्षकम् लिखत।**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

**13**

कस्मिंश्चिद्देशे धर्मबुद्धिः पापबुद्धिश्च द्वे मित्रे प्रतिवसतः स्म। अथ कदाचित्पापबुद्धिना चिन्तितम्—अहं तावन्मूर्खो दरिद्रश्च। तदेनं धर्मबुद्धिमादाय देशान्तरं गत्वा अस्य आश्रयेण अर्थोपार्जनं कृत्वा एनपि वञ्चयित्वा सुखी भवामि इति। अथान्यस्मिन्नहनि पापबुद्धिः धर्मबुद्धिं प्राह—भो मित्र! शास्त्रेष्वेवं वर्णितम् यद् येन देशान्तरेषु बहुविधभाषावेषादि न ज्ञातं तस्य जन्म धरणीपीठे निरर्थकम्। अतः आवाम् देशान्तरं गच्छावेति।

**प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) धर्मबुद्धेः मित्रस्य किं नाम आसीत्?

(*ii*) मूर्खः दरिद्रः च कः आसीत्?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) पापबुद्धिः कस्य आश्रयेण अर्थोपार्जनं कर्तुम् इच्छति?

(*ii*) पापबुद्धिः धर्मबुद्धिं किं प्राह?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'ज्ञातम्' पदे कः प्रत्ययः वर्तते?

(क) क्त (ख) क्त्वा (ग) क्तवतु (घ) तव्यत्

(*ii*) 'दुःखी' पदस्य कः विपर्ययः अनुच्छेदे प्रयुक्तः?

(क) सुख (ख) दुःख (ग) सुखी (घ) मुखी

(*iii*) अनुच्छेदे 'सखायौ' पदस्य कः पर्यायः आगतः?

(क) द्वे (ख) मित्रे (ग) सुखी (घ) दुःखी

(*iv*) अन्तिमे वाक्ये क्रियापदं किं लिखितम्?

(क) आवाम् (ख) देशान्तरं (ग) गच्छावेति (घ) गच्छाव

**IV. अस्य गद्यांशस्य कृते समुचितं शीर्षकं लिखत।**

(गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for the passage.)

**14**

अध्ययनार्थं विदेशं गन्तुकामः श्रीमोहनदासः कर्मचन्दः गान्धी मातुरादेशप्राप्त्यर्थं प्रतिज्ञात्रयम् अकरोत्—नाहं कदापि मदिरां सेविष्ये, नाहं मांसस्पर्शमपि विधास्यामि, पूर्णरूपेण ब्रह्मचर्य-व्रतमाचरिष्यामि इति स्व-प्रतिज्ञां पालयन् सः त्रीणि वर्षाणि विधिशास्त्रमधीतवान्। स्वदेशमागत्य सः मुम्बापुर्यां बैरिस्टरवृत्तिं प्रारभत। शीघ्रमेव दक्षिणाफ्रीकादेशं गत्वा तत्रत्यानां भारतीयानां गौराङ्गैः कृतां दुर्दशां विलोक्य समुद्धाराय अहिंसामूलस्य सत्याग्रहस्य उपायस्य प्रयोगमकरोत्, तेन च पूर्णां सफलतां प्राप्तवान्। तत्र तस्य उपायस्य साफल्यमनुभूय स्वदेशोद्धाराय अपि तस्य प्रयोगं कर्तुं सः स्वदेशं प्रत्यागच्छत्।

**प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) विदेशे महात्मा गान्धी किम् अधीतवान्?

(*ii*) स्वदेशमागत्य गान्धी महोदयः किं प्रारभत?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) दक्षिणअफ्रीका देशं गत्वा तत्रत्यानां भारतीयानां दुर्दशां दृष्ट्वा तेषामुद्धाराय सः किं कृतवान्?

(*ii*) सः कथं स्वदेशं प्रत्यागच्छत्?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'पूर्णां सफलतां' अनयोः पदयोः विशेषणपदं चित्वा लिखत।

(क) पूर्णां (ख) सफलता (ग) सफलतां (घ) पूर्णा

(*ii*) 'स्वदेशमागत्य सः मुम्बापुर्यां बैरिस्टरवृत्तिं प्रारभत' अस्मिन् वाक्ये 'सः' इति पदं कस्मै प्रयुक्तम्?

(क) श्रीमोहनदासः (ख) श्री मोहनदासाय (ग) श्रीं कर्मचन्दाय (घ) गान्धिः

(*iii*) 'सः स्वदेशं प्रत्यागच्छत्'। अत्र क्रियापदं किम्?

(क) सः (ख) स्वदेशं (ग) प्रत्यागच्छत् (घ) आगच्छत्

(*iv*) 'विदेशं' इतिपदस्य कः विपर्ययः अत्र लिखितः?

(क) स्वदेशं (ख) स्वदेशोद्धाराय (ग) परदेशं (घ) स्वाधीनं

**IV. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।**

(इस गद्यांश का उचित शीर्षक लिखिए। Write an appropriate title for this paragraph.)

**15**

आतंकवादः आधुनिक विश्वस्य गुरुतमा समस्या अस्ति। संसारस्य प्रत्येकं देशः आतंकवादेन येन केन प्रकारेण पीडितः अस्ति। आतंकवादः विनाशस्य सा लीला या विश्वम् ग्रसितुम् तत्परा अस्ति। आतंकवादेन विश्वस्य अनेकानि क्षेत्राणि रक्तविलिप्तानि सन्ति। अनेन अनेके निर्दोषाः जनाः प्राणान् अत्यजन्। महिलाः विधवाः जाताः, बालाश्च अनाथा अभवन्। सर्वशक्तिमान् अमेरिका देशोऽपि अनेन संतप्तः अस्ति। भारतं तु आतंकवादेन अनेकैः वर्षैः पीडितः वर्तते। आतंकवादे तु ते एव जनाः सम्मिलिताः सन्ति ये स्वार्थपूर्तिम् कर्तुम् इच्छन्ति, संसारे च अशान्तेः वातावरणं द्रष्टुम् कामयन्ते। शान्तीच्छुकैः देशैः आतंकवादस्य राक्षसस्य विनाशाय मिलित्वा एव प्रयत्नाः समाधेयाः अन्यथा एषा समस्या सुरसामुखम् इव प्रतिदिनं वृद्धिं यास्यति।

**प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) आतंकवादः कस्य लीला?

(*ii*) कीदृशैः देशैः मिलित्वा आतंकवादस्य विनाशाय प्रयत्नाः समाधेयाः?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) आतंकवादे कीदृशाः जनाः सम्मिलिताः?

(*ii*) आतंकवादेन महिलानां बालानां च का दशा अभवत्?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'शान्तेः' इति पदस्य किं विपर्ययपदम् अत्र प्रयुक्तम्?

(क) अशान्तेः (ख) संसारे (ग) ते (घ) देशैः

(*ii*) 'अनेकैः वर्षैः' इति पदयोः विशेषणपदं किम्?

(क) वर्षैः (ख) अनेकैः (ग) अनेक (घ) वर्ष

(*iii*) 'यास्यति' इति क्रियायाः कर्तृपदं किम्?

(क) एषा (ख) समस्या (ग) अन्यथा (घ) इव

(*iv*) 'ये स्वार्थपूर्तिम्' अत्र 'ये' पदं केभ्यः आगतम्?

(क) जनेभ्यः (ख) वर्षेभ्यः (ग) देशेभ्यः (घ) पीडितेभ्यः

**IV. अस्य अनुच्छेदस्य कृते उचितं शीर्षकं लिखत।**

(इस अनुच्छेद का उचित शीर्षक लिखिए। Write an appropriate title for this paragraph.)

**16**

एकस्मिन् ग्रामे एकः व्याधः वसति स्म। तस्य नाम भैरवः आसीत्। सः जीविकार्थम् पशून् हत्वा नगरे विक्रीणाति स्म। एकदा सः आखेटाय वनम् अगच्छत्। तत्र तेन एकः मृगः दृष्टः। सः तं मृगम् अमारयत्, तं च नीत्वा गृहं प्रति अचलत्। तदैव सः मार्गे एकं सिंहम् अपश्यत्। तम् सिंहं दृष्ट्वा सः अचिन्तयत् 'यदि एषः सिंहः अपि प्राप्तः भवेत् तर्हि अहं प्रभूतं धनं प्राप्स्यामि'। अनेन लोभेन यावत् सः सिंहं प्रति शरम् अक्षिपत् तावत् एव सिंहः अपि व्याधम् आक्राम्यत् सः व्याधः च तदा पञ्चत्वं गतौ।

**प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) व्याधः कुत्र वसति स्म?

(*ii*) सः आखेटाय कुत्र अगच्छत्?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) सिंहं दृष्ट्वा व्याधः किम् अचिन्तयत्?

(*ii*) अन्ते किम् अभवत्?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'क्रीणाति' अस्य पदस्य कः विपर्ययः अत्र दत्तः?

(क) क्रीणीतः (ख) क्रीणति (ग) विक्रीणाति (घ) विक्रीणति

(*ii*) 'तं च नीत्वा गृहं प्रति अचलत्। अस्मिन् वाक्ये 'तम्' पदं कस्मै प्रयुक्तम्?

(क) व्याधाय (ख) मृगाय (ग) सिंहाय (घ) भैरवाय

(*iii*) अनुच्छेदे 'अचिन्तयत्' इति क्रियायाः कर्तृपदं किम्?

(क) तम् (ख) सिंहं (ग) दृष्ट्वा (घ) सः

(*iv*) 'ग्रामे' इत्यस्य विशेष्यस्य अनुच्छेदे विशेषणं किम्?

(क) एकस्मिन् (ख) एके (ग) एक: (घ) वसति स्म

**IV. अस्या: कथाया: समुचितं शीर्षकं लिखत।**

(इस कथा के लिए उचित शीर्षक लिखिए। Write an appropriate title for this story.)

**17**

संस्कृत साहित्ये वाचस्पतिमिश्र: प्रसिद्धो विद्वान् अभवत्। स: बाल्ये एव विवाहितोऽभवत्। तस्य पत्न्या: नाम भामती आसीत्। भामती पितु: गृहे एवावसत्। दुर्दैव योगात् मिश्रस्य माता दिवंगता। एतच्छ्रुत्वा भामती पत्यु: सेवायै पितृ-गृहात् तत्रागच्छत्। तदा तस्या: पति: वाचस्पति: वेदान्तस्य टीकाया: रचनायां व्यस्त: आसीत्। सा सेवापरायणाभामती वर्षाणां विंशतिं पतिम् असेवत। मिश्र: कदापि ताम् नापृच्छत् यत्त्वं काऽसि। किन्तु सा विदुषी शंकासमाधानै: ग्रन्थप्रणयने महती सहायताम् अकरोत्। एकदा अर्धरात्रौ दीपस्य तैलम् अवसितम् दीपश्च निर्वाण: अभवत्। तस्मिन्नेव समये टीकापि सम्पूर्णाभवत्। नामकरणमेव अवशिष्टमासीत्। सहसा आसनाद् उत्थाय वाचस्पति: ताम् अपृच्छत्—काऽसि त्वम्? भामती उदतरत्—अहम् आर्यपुत्रस्य भार्या भामती अस्मि। स: तां विदुषीं स्वभार्यां ज्ञात्वा आनन्देन चन्द्रिकायां प्रकाशे टीकाया: नाम भामती इति अलिखत्। अद्य सर्वे विद्वास: भामत्या: नाम जानन्ति किन्तु मिश्रस्य नाम विरला: एव जानन्ति। धन्या: एतादृशा: सेवापरायणा: भारतीयमहिला: त्यागिनश्च विद्वांस:।

**प्रश्ना:—उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत—**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) क: संस्कृतसाहित्ये प्रसिद्धो विद्वान् अभवत्?

(*ii*) तस्य पत्न्या: नाम किम् आसीत्?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) वाचस्पति: मिश्र: कस्मिन् कर्मणि व्यस्त: आसीत्?

(*ii*) तां विदुषीं स्वभार्यां ज्ञात्वा स: किम् अकरोत्?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'विद्वान्' इत्यस्य शब्दस्य स्त्रीलिङ्ग-वाचकशब्दं चयनं कुरु।

(क) विदुषी (ख) विदूषी (ग) विद्वानी (घ) विदुषा

(*ii*) ''भामती वर्षाणां विंशतिं पतिम् असेवत'' अत्र क्रियापदम् किम्?

(क) पतिम् (ख) भामती (ग) असेवत (घ) वर्षाणां

(*iii*) अस्मिन् अनुच्छेदे 'प्रख्यात:' शब्दस्य क: पर्याय: प्रयुक्त:?

(क) प्रसिद्ध: (ख) प्रसिद्धो (ग) विद्वान् (घ) संस्कृत

(*iv*) ''सेवापरायणा: भारतीयमहिला:'' अत्र किम् विशेषणपदम् अस्ति?

(क) भारतीय (ख) महिला: (ग) सेवा (घ) सेवापरायणा:

**IV. अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।**

(इस अनुच्छेद के लिए उचित शीर्षक लिखिए। Write an appropriate title for this article.)

## 18

एकदा केचन शिष्याः भिक्षाटनं कुर्वन्ति स्म। तदैव एकः गजः महता वेगेन तस्मिन् मार्गे आगच्छत्। गजस्य उपरि उपविष्टः हस्तिपकः उच्चस्वरेण पुनः पुनः घोषयति स्म—अपसरन्तु अपसरन्तु इति। सर्वे शिष्याः धावितवन्तः। यथा सर्वेषु वस्तुषु ईश्वरः अस्ति तथा गजेऽपि इति विचिन्त्य एकः शिष्यः तत्रैव स्थितवान्। तावति काले गजः तं स्वशुण्डया गृहीत्वा दूरे क्षिप्तवान्। शिष्याः मूर्च्छितं तं गुरुकुलम् अनयन्। लब्धसंज्ञं तं गुरुः अपृच्छत्—वत्स! त्वम् एवं किमर्थम् आचरः इति। शिष्यः अवदत्—गुरुवर्य! भवद्भिः एव शिक्षितं यत् ईश्वरः सर्वेषु अस्ति अतः अहम् गजे अपि ईश्वरं मत्वा तत्र अतिष्ठम् इति। गुरुः उक्तवान् वत्स! यथा गजे तथा हस्तिपके अपि ईश्वरः इति कथं च चिन्तितम् इति।

**प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) गजः कं गृहीत्वा स्वशुण्डया प्राक्षिपत्?

(*ii*) "अपसरन्तु अपसरन्तु" इति कः घोषयति स्म?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) यदा गजः आगतः तदा शिष्याः किं कुर्वन्ति स्म?

(*ii*) शिष्यः कुत्र संज्ञाम् अलभत?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'वेगेन' इति अस्य किं विशेषणम्?

(क) महता (ख) तस्मिन् (ग) मार्गे (घ) केचन

(*ii*) 'अपसरन्तु' इति क्रियापदस्य कर्तृपदं किम्?

(क) उपविष्टः (ख) हस्तिपः (ग) हस्तिपकः (घ) गजः

(*iii*) अनुच्छेदे 'तदा' पदाय के पदे आगते?

(क) तावति (ख) काले (ग) तावति काले (घ) तथा

(*iv*) क्षिप्तवान्, इति क्रियायाः कर्मपदं किम्?

(क) तं (ख) स्वशुण्डया (ग) शुण्डया (घ) गजः

**IV. अस्याः कथायाः उपयुक्तं शीर्षकं लिखत।**

(इस कहानी का उचित शीर्षक लिखिए। Write an appropriate title for this story.)

## 19

कश्चित् संन्यासी एकं महावनम् अधिवसति स्म। एकदा तद्देशस्य अधिपः तस्य वनस्य मार्गेण गच्छति स्म। तेन यतिना सः भूपतिः सम्यक् न सत्कृतः। तेन असौ नृपः ईषद् अपि सादरं न ईक्षितः। तस्मात् सः नृपः आत्मनः सचिवम् अवदत्—अयं संन्यासी मम मतेन साक्षात् पशुः अस्ति, यतः सः शिष्टाचारात् अनभिज्ञः अस्ति। सचिवः तम् यतिम् उपेत्य उवाच—"तव निकटे एव गतस्य राज्ञः कथं त्वया प्रणामः न कृतः? अतः त्वं मे प्रमत्तः इव भासि। इदम् आकर्ण्य सः प्रत्यवदत्—"ये नृपस्य-प्रसादनाय उत्सुकाः सन्ति ते एव नृपं स्तुवन्ति। तम् प्रति चाटु वचनानि अपि वदन्ति, तं परितः लाङ्गूलचालनं कुर्वन्ति च" इति मद्-वचनात् सः राजा वाच्यताम्।

प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) यतिना सम्यक् कः न सत्कृतः ?

(*ii*) राज्ञः मतेन संन्यासी साक्षात् कः आसीत् ?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) सचिवः यतिम् उपेत्य किम् अवदत् ?

(*ii*) सचिवम् आकर्ण्य सः यतिः किं प्रत्यवदत् ?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'राज्ञः' इति पदस्य विशेषणपदं चित्वा लिखत।

(क) गतस्य (ख) कथं (ग) त्वया (घ) सः

(*ii*) 'यतः सः शिष्टाचारात् अनभिज्ञः अस्ति।' अस्मिन् वाक्ये 'सः' पदं कस्मै प्रयुक्तम् ?

(क) संन्यासी (ख) संन्यासिने (ग) संन्यासिनाम् (घ) संन्यासीम्

(*iii*) 'अधिवसति स्म' इति क्रियायाः कर्तृपदं किम् ?

(क) कश्चित् (ख) एकं (ग) वनं (घ) संन्यासी

(*iv*) अनुच्छेदे 'किञ्चित्' पदस्य कः पर्यायः आगतः ?

(क) ईषद् (ख) अपि (ग) तेन (घ) असौ

**IV. अस्याः कथायाः समुचितं शीर्षकं लिखत।**

(इस कहानी का उचित शीर्षक लिखिए। Write an appropriate title of this story.)

## 20

वैज्ञानिकाः सञ्चारसाधनेषु प्रतिदिनं नवीनतमान् आविष्कारान् कुर्वन्ति येन सन्देश-प्रेषणे अधिकतमा सुविधा स्यात्। चल दूरभाष यन्त्रम् एतादृशम् एव लोकप्रियं यन्त्रम् अस्ति। बालाः, वृद्धाः, युवकाः, पुरुषाः, महिलाः, नागराः, ग्रामीणाश्च सर्वेषामपि कर्णाभूषणम् एतत् जातम्। यानारूढाः कार्यालयरताः, पथिकाः, सभायां श्रोतारः वक्तारश्च अस्य ध्वनिं श्रुत्वा वार्तामग्नाः भवन्ति। अविवेकपूर्णः अस्य प्रयोगः कार्येषु व्यवधानं करोति। मार्गेषु दुर्घटनाः भवन्ति। सभासु, कक्षासु, कार्यालयेषु मार्गेषु च अव्यवस्था भवति। सत्यम् अस्ति यत् आविष्कारः कदापि न हानिकरः, परन्तु तस्य दुरुपयोगेन जीवनस्य शान्तिः नश्यति। ते एव बुद्धिमन्तः ये विज्ञानस्य सदुपयोगं कुर्वन्ति।

प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) वर्तमानकाले किं लोकप्रियं सञ्चारसाधनम्?

(*ii*) आविष्कारस्य दुरुपयोगेन कस्य शान्तिः नश्यति?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) के खलु बुद्धिमन्तः?

(*ii*) चलदूरभाषयन्त्रं कीदृशं साधनम् अस्ति?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.)

(*i*) "सन्देश-प्रेषणे अधिकतमा सुविधा स्यात्" अत्र किं पदं विशेषणम् ?

(क) सुविधा (ख) प्रेषणे (ग) अधिकतमा (घ) सन्देश

(*ii*) "तस्य दुरुपयोगेन जीवनस्य शान्तिः नश्यति" अत्र 'तस्य' पदं कस्मै प्रयुक्तम् ?

(क) आविष्काराय (ख) आविष्कारः (ग) आविष्कारेण (घ) आविष्कारम्

(*iii*) 'वार्तामग्नाः भवन्ति' इति क्रियायाः कर्तृपदं किम्?

(क) श्रोतारः (ख) मार्गेषु (ग) कार्यालयाः (घ) मार्गाः

(*iv*) 'लाभकरः' इति पदस्य कः विपर्ययः अत्र आगतः?

(क) सुकरः (ख) दुष्करः (ग) हानिकरः (घ) शान्तिकरः

**IV. अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।**

(इस अनुच्छेद के लिए उचित शीर्षक लिखिए। Write an appropriate title for this paragraph.)

## बोर्ड परीक्षासु आगताः अपठित अनुच्छेदाः

**1**

क्रोधः मनुष्यस्य प्रधानः वैरी अस्ति। अस्माकं शास्त्रेषु वर्णितं यत् 'क्रोधः सुदुर्जयः शत्रुः' इति। समाजे एतादृशाः विरलाः एव जनाः भवन्ति, ये क्रोधं न कुर्वन्ति। क्रोधी मनुष्यः सदा कष्टम् अनुभवति। क्रोधवशात् उन्मत्तः भूत्वा सः अन्यान् पीडयति। बहवः अपराधिनः क्रोधस्य कारणात् एव अपराधं कुर्वन्ति। क्रोधः प्रायः क्षणिकः भवति। ये क्षणिकं क्रोधं वशीकुर्वन्ति, ते सदा सुखिनः भवन्ति। अतः क्रोधं विहाय जनाः क्षमाशीलाः भवन्तु। क्रोधान्धः जनः पूर्वं तु अपराधं करोति, पश्चात् च पश्चात्तापं करोति। क्रोधवशाद् अपराधकरणेन मानवः पापयुक्तः भवति। समस्तानां पापानां मूलकारणं क्रोधः एव अस्ति। क्रोधः सचित्तानाम् अपि तपसां विनाशं करोति। अतः क्रोधः सर्वथा त्याज्यः। *[CBSE 2008]*

**प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) क्रोधी मनुष्यः किम् अनुभवति?

(*ii*) मनुष्यस्य प्रधानः वैरी कः अस्ति?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) शास्त्रेषु किं वर्णितम् अस्ति?

(*ii*) कः पश्चात्तापं करोति?

**III. निर्देशानुसारं शुद्धम् उत्तरं प्रदत्त-विकल्पेभ्यः चित्वा लिखत।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'अपराधं कुर्वन्ति' क्रियापदस्य कर्तृपदम् अत्र किमस्ति?

(क) क्रोधिनः (ख) अपराधिनः (ग) जनाः (घ) क्रोधस्य

(*ii*) 'शत्रुः' इति पदस्य पर्यायपदं गद्यांशे किम् प्रयुक्तम्?

(क) प्रधानः (ख) त्याज्यः (ग) वैरी (घ) अपराधिनः

(*iii*) 'समस्तानां' इति विशेषणपदस्य विशेष्यपदं किमस्ति?

(क) सुखिनः (ख) पापयुक्तः (ग) पापानां (घ) मूलकारणं

(*iv*) 'ये क्रोधं न कुर्वन्ति।' अत्र 'ये' सर्वनामपदं केभ्यः प्रयुक्तम्?

(क) जनेभ्यः (ख) क्रोधेभ्य (ग) क्षमाशीलेभ्यः (घ) सुखिभ्यः

**IV. गद्यांशस्य समुचितं शीर्षकं लिखत।**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 2

एकदा रामकृष्णपरमहंसस्य पार्श्वे विवेकानन्दः आगत्य अवदत्–"मया श्रुतम् यत् भवतः समक्षं भगवती आगच्छति तथा च भवता सह वार्तालापम् अपि करोति।" रामकृष्णः अवदत्-आम्, आगच्छति, यथा त्वं मया सह वार्तालापं करोषि तथैव अहं तया सह वार्तां करोमि।

विवेकानन्दः अपृच्छत्-माता कदा आगच्छति? यदा तस्याः इच्छा भवति तदा आगच्छति इति रामकृष्णः अवदत्। ततः विवेकानन्दोऽवदत्-स्वामिन्। एकां कृपां करोतु, यदा सा आगच्छेत् सा मम गृहेऽपि आगच्छेत् इति तस्यै निवेदयतु। तथास्तु, परन्तु तव गृहसंकेतः कः? इति रामकृष्णः अपृच्छत्। विवेकानन्दः स्वगृहसंकेतम् अदर्शयत्। रामकृष्णः अवदत्-एषः तु तव निवास-संकेतः त्वम् आत्मनः संकेतं दर्शय यत्र माता आगच्छेत्। *[CBSE 2008]*

**प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) विवेकानन्दः कस्य पार्श्वे गतवान्?

(*ii*) रामकृष्णस्य समक्षं का आगच्छति स्म?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) विवेकानन्दः मात्रे किं निवेदयितुं रामकृष्णम् अवदत्?

(*ii*) एकां कृपां करोतु इति कः अवदत्?

**III. निर्देशानुसारं शुद्धम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'करोषि' इति क्रियापदस्य कर्तृपदं किम्?

(क) विवेकानन्दः (ख) भवान् (ग) भगवती (घ) त्वम्

(*ii*) 'दर्शयति स्म' इत्यर्थे गद्यांशे किं पदं प्रयुक्तम्?

(क) समक्षं (ख) अदर्शयत् (ग) दर्शय (घ) निवेदयतु

(*iii*) 'यथा त्वं मया सह वार्तालापं करोषि' अस्मिन् वाक्ये 'मया' सर्वनामपदं कस्मै प्रयुक्तम्?

(क) भगवत्यै (ख) विवेकानन्दाय (ग) गृहसंकेताय (घ) रामकृष्णाय

(*iv*) 'स्वामिन्! एकां कृपां करोतु' अत्र वाक्ये विशेषणपदं किम्?

(क) स्वामिन् (ख) एकाम् (ग) कृपाम् (घ) करोतु

**IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 3

अहम् एकः छिन्नः द्रुमः अस्मि। ह्यः वने एकः नरः आगच्छत्। सः काष्ठाय मम शरीरम् अच्छिन्दत्। छेदनेन मे शरीरे अनेके व्रणाः जाताः। छुरिकायाः प्रहारेण शरीरात् अश्रुरूपाः जलबिन्दवः अपतन्। अकथनीया मम पीडा। हृदयं विदीर्णं जातम्। अश्रुभिः कण्ठः अवरुद्धः। मम अन्तकालः समीपे एव तिष्ठति। काष्ठानि एकत्रीकृत्य सः तु अगच्छत्। परं कोऽस्ति अत्र व्यथाकथाश्रवणाय? वृक्षान् छित्त्वा नरः प्रकृतिमातुः अंगानि नाशयति। इन्धनाय, कर्गदपत्राय, भवननिर्माणाय मम काष्ठस्य प्रयोगः भवति। किन्तु कुतः मम पत्राणि, पुष्पाणि कुतः च रोगनिवारणाय ओषधयः? निराश्रिताः भविष्यन्ति आश्रिताः खगाः। पन्थानः च छायाहीनाः भविष्यन्ति। आतपेन तप्तः श्रान्तः पथिकः अधुना कुत्र गमिष्यति? मम जीवने पुनः वसन्तर्तुः न आगमिष्यति। *[CBSE 2009]*

**प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) छेदनेन वृक्षस्य किं विदीर्णं जातम्?

(*ii*) नरः किमर्थं द्रुमस्य शरीरम् अच्छिन्दत्?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) वृक्षस्य काष्ठप्रयोग: कुत्र-कुत्र भवति?

(*ii*) निराश्रिता: के भविष्यन्ति?

**III. निर्देशानुसारं शुद्धम् उत्तरं चित्वा लिखत।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'आतपेन तप्त: पथिक: कुत्र गमिष्यति?' अस्मिन् वाक्ये विशेषणपदम् किम्?

(क) आतपेन (ख) कुत्र (ग) पथिक: (घ) तप्त:

(*ii*) 'अकथनीया मम पीडा' अत्र 'मम' सर्वनामपदं कस्मै प्रयुक्तम्?

(क) वनाय (ख) नराय (ग) खगाय (घ) द्रुमाय

(*iii*) 'नाशयति' इति क्रियापदस्य किं कर्तृपदम्?

(क) पथिक: (ख) वृक्ष: (ग) नर: (घ) स:

(*iv*) 'आश्रिता:' अस्य किं विपरीतार्थकं पदं गद्यांशे प्रयुक्तम्?

(क) निराश्रिता: (ख) अश्रुरूपा: (ग) छायाहीना: (घ) व्रणा:

**IV. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

**4**

विद्या मानवस्य तृतीयं ज्ञानचक्षु:। अनया नीरक्षीरविवेकी भवति मानव:। विद्यादीपेनाज्ञानान्धकारो विनश्यति। धर्माधर्मयो: विद्याऽविद्ययोश्च विवेचनं सुकरं भवति। विद्ययैव मानव: प्रगते: शिखरमारोढुं शक्नोति। शिक्षा यथा पुरुषेभ्य: श्रेयस्करी वर्तते, तथैव स्त्रीभ्योऽपि शिक्षाया: महती आवश्यकता भवति।। अशिक्षिता नारी तु पुरुषस्य वास्तविका सहायिका भवितुं नार्हति। नार्या: समाजे महत्त्वपूर्णं स्थानमस्ति। यो हस्त: शिशुदोलां चालयति स एव संसारोपरि शासनं करोतीदं कथनमक्षरश: सत्यम्। माता यादृशी भवति सन्ततिरपि तादृशी एव। यदि नार्य: शिक्षिता: सन्ति तर्हि ता: स्वपुत्राणां पालनं शिक्षणं च सुचारु रूपेण करिष्यन्ति।

[*CBSE 2010*]

**प्रश्ना:–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) कया मानव: नीरक्षीरविवेकी भवति?

(*ii*) केन अज्ञानान्धकारो विनश्यति?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) शिक्षिता: नार्य: किं कर्तुं समर्था: भविष्यन्ति?

(*ii*) मानवस्य तृतीयं ज्ञानचक्षु: किम्?

**III. निर्देशानुसारं शुद्धम् उत्तरं प्रदत्तविकल्पेभ्य: चित्वा लिखत।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'महती' इति पदं कस्य विशेषणम्?

(क) विद्याया: (ख) मातु: (ग) आवश्यकताया: (घ) शिक्षाया:

(*ii*) 'नेत्रम्' इत्यर्थे अत्र किं पदं प्रयुक्तम्?

(क) चक्षु: (ख) दीपम् (ग) ज्ञानम् (घ) सुकरम्

(*iii*) 'ज्ञानम्' इत्यस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(क) अशिक्षा (ख) अविद्या (ग) अज्ञानम् (घ) अधर्मः

(*iv*) 'करिष्यन्ति' इति क्रियापदस्य कर्तृपदं किमस्ति?

(क) शिक्षिताः (ख) नार्यः (ग) विद्याविहीनाः (घ) मातरः

**IV. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 5

भारतदेशस्य प्रमुखपर्वसु विजयादशम्याः प्रमुखं स्थानमस्ति। आश्विनमासे शुक्लपक्षे दशम्यां तिथौ एषः उत्सवः भवति। प्रायशः एषः अक्तूबर मासे मान्यते। अस्मिन् काले वर्षर्तुः समाप्तः भवति। अतः सर्वेषां कृते एषः उत्सवः स्वच्छतादिवसः भवति। उत्सवात् पूर्वेषु दशदिवसेषु प्रतिस्थानं प्रतिनगरं रामलीलायाः प्रदर्शनं क्रियते। अस्मिन् मेलके विशेषतः आमोद-प्रमोदः भवति। राम-रावणादीनां रूपं धारयित्वा पात्राणि प्रदर्शयन्ते। अनेनोत्सवेन वयं जानीमः यत् 'सत्यं सदा विजयते, पापम् अधर्मः च सदा पराजितः भवति।'

**[*CBSE 2010*]**

**प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) अक्तूबरमासे कः ऋतुः समाप्तः भवति?

(*ii*) पात्राणि केषां रूपं धारयित्वा प्रदर्शयन्ते?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) विजयादशमी अस्मान् किं शिक्षयति?

(*ii*) विजयादशमी कदा मान्यते?

**III. निर्देशानुसारं शुद्धम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'अस्मिन् मेलके विशेषतः ..............।' इति वाक्ये 'अस्मिन्' इत्यस्य किं विशेष्यपदमस्ति?

(क) विशेषतः (ख) अस्मि (ग) आमोद-प्रमोदः (घ) मेलके

(*ii*) 'जानीमः' क्रियायाः कर्तृपदं किम्?

(क) सत्यं (ख) पापम् (ग) वयम् (घ) सदा

(*iii*) 'प्रायशः एषः अक्तूबरमासे मान्यते' इति वाक्ये 'एषः' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(क) कालाय (ख) भारताय (ग) उत्सवाय (घ) मासाय

(*iv*) गद्यांशे 'आरम्भः' इत्यस्य कः विपर्ययः प्रयुक्तः?

(क) पराजितः (ख) अधर्मः (ग) समाप्तः (घ) विजितः

**IV. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

6

अधुना संसारः युद्धस्य भयेनाक्रान्तः रुग्ण इव प्रतिभाति। साम्प्रतम् इदं जगत् युद्धेन इत्थं पीडितम् अस्ति यथा कस्मिंश्चिदपि काले नाभवत्। समर्थाः देशाः अन्यान् न विगणयन्ति। रूस, अमेरिका, फ्रांस, जर्मनी, चीनादि देशाः परस्परं युद्धस्य वातावरणं सृजन्ति। स्वयं युद्धे न रमन्ते किन्तु अपरान् युद्धार्थं प्रेरयन्ति। युद्धं सदा विनाशकारकं भवति। ये देशाः जयन्ति, तेऽपि अपारधन-जनहानिं सहन्ते। यदा युद्धं भविष्यति, तदा संसारे भयङ्करः विनाशः भविष्यति। आदर्शवादिनः जनाः युद्धं वर्जयित्वा शान्तिस्थापनार्थं प्रयतन्ते। *[CBSE 2011]*

**प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) कीदृशाः देशाः अन्यान् न विगणयन्ति?

(*ii*) शान्तिस्थापनार्थं के प्रयतन्ते?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) रूस, अमेरिकादयः देशाः किं कुर्वन्ति?

(*ii*) संसारः कस्य भयेन आक्रान्तः?

**III. निर्देशानुसारं शुद्धम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'जयन्ति' इति क्रियापदस्य किं कर्तृपदम्?

(क) अन्याः (ख) देशाः (ग) रुग्णाः (घ) भयाक्रान्ताः

(*ii*) 'इदानीम्' इति अव्ययस्य किं पर्यायपदमत्र प्रयुक्तम्?

(क) अधुना (ख) तदा (ग) ये (घ) देशाः

(*iii*) 'भयङ्करः' इत्यस्य किं विशेष्यपदम्?

(क) युद्धम् (ख) विनाशः (ग) शान्तिः (घ) देशाः

(*iv*) 'नाशयन्ति' इत्यस्य अनुच्छेदे किं विपर्ययं पदं प्रयुक्तम्?

(क) सृजन्ति (ख) नश्यन्ति (ग) सरन्ति (घ) परिसृजन्ति

**IV. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

7

प्रत्येकं कार्यस्य समयः निश्चितः वर्तते। प्रथमः बाल्यकालः विद्यायाः उपार्जनाय निश्चितः अस्ति द्वितीयः यौवनकालः धनार्जनाय, तृतीयः वार्धक्यस्य आरम्भकालः पुण्यं कर्तुं निश्चितः वर्तते एषु कालेषु यः मनुष्यः उचितं कार्यं न सम्पादयतिः, सः चतुर्थे वयसि किं करिष्यति? वृद्धः भूत्वा किमपि कर्तुम् असमर्थः भवति अतः बुद्धिमद्भ्यः छात्रेभ्यः इदम् उचितं यत् ते समये समस्तं कार्यं कुर्वन्तु, क्षणम् अपि कालं व्यर्थं न यापयन्तु। इत्थं करणेन यथावसरं ते विद्वांसः भविष्यन्ति, संसारे उन्नतिं कृत्वा यशः धनं च लब्ध्वा सुखिनः भविष्यन्ति। *[CBSE 2013]*

**प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) प्रत्येकं कार्यस्य किं निश्चितः वर्तते?

(*ii*) यौवनकालः किमर्थं भवति?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) किम् कृत्वा छात्राः सुखिनः भविष्यन्ति?

(*ii*) के कालं व्यर्थं न यापयन्तु?

**III. निर्देशानुसारं शुद्धम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'ते' इति सर्वनाम शब्दः कस्मै प्रयुज्यते?

(क) समयाय (ख) मनुष्या (ग) छात्रेभ्यः (घ) कार्येभ्यः

(*ii*) 'छात्रेभ्यः' इति विशेष्यपदस्य विशेषणपदं किम्?

(क) असमर्थ (ख) विद्वांसः (ग) सुखिनः (घ) बुद्धिमद्भ्यः

(*iii*) 'वर्तते' इति क्रियापदस्य कर्तृपदं किम्?

(क) समयः (ख) प्रत्येकम् (ग) कार्यस्य (घ) निश्चितः

(*iv*) 'पण्डिताः' इति अर्थे अत्र किं पदं प्रयुक्तम्?

(क) सुखिनः (ख) विद्वांसः (ग) यशः (घ) वयः

**IV. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 8

संस्कृतभाषा भारतवर्षस्य संस्कारभाषा। भारते संस्कृतभाषायाः प्रतिदिनं विविधसंस्कारकार्येषु प्रयोगः भवति। एतस्याः अनेकासु विशेषतासु इयम्, अन्यतमा विशेषता यत् अस्याः वाङ्मये विद्यमानाः सूक्तयः अभ्युदयाय प्रेरयन्ति। अतएव वयं भारतप्रशासनस्य विभिन्नेषु विभागेषु ध्येय-वाक्यरूपेण एतेषां प्रयोगं पश्यामः। भारतशासनस्य मुद्रायाम् अङ्कितं वाक्यं 'सत्यमेव जयते' संस्कृतस्य महत्त्वम् उद्भावयति। जीवनबीमानिगमस्य चिह्ने श्रीमद्भगवद्गीतायाः 'योगक्षेमं वहाम्यहम्' पद्यांशः अस्य शोभाम् द्विगुणयति भारतीयवायुसेनायाः चिह्ने लिखितं ध्येयवाक्यं 'नभः स्पृशं दीप्तम्' संस्कृत-भाषायाः गौरवगाथां प्रकटयति। [*CBSE 2014*]

**प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) काः अभ्युदयाय प्रेरयन्ति?

(*ii*) कस्य विभागेषु धयेयवाक्यानां प्रयोगः भवति?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) कुत्र लिखितं ध्येयवाक्यं संस्कृतभाषायाः गौरवगाथां प्रकटयति?

(*ii*) विविधसंस्कारकार्येषु कस्याः प्रयोगः भवति?

**III. निर्देशानुसारं शुद्धम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'उद्भावयति' क्रियापदस्य कर्तृपदं किम्?

(क) वाक्यम् (ख) महत्त्वम् (ग) प्रयोगं (घ) पद्यांशः

(*ii*) 'वर्धयति' इति क्रियापदस्य पर्यायपदं गद्यांशे किं प्रयुक्तम्?

(क) प्रकटयति (ख) द्विगुणयति (ग) उद्भावयति (घ) प्रेरयति

(*iii*) 'विद्यमाना:' विशेषणपदस्य विशेष्यपदं किम्?

(क) सूक्तय: (ख) विशेषता (ग) अन्यतमा (घ) अस्या:

(*iv*) 'एतस्या:' सर्वनामपदं कस्मै प्रयुज्यते?

(क) सूक्तये (ख) वाक्याय (ग) संस्कृतभाषायै (घ) संस्काराय

**IV. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 9

एकदा राजकुमार: सिद्धार्थ: विहारार्थम् उपवनं गत:। सहसा करुणं ध्वनिं श्रुत्वा स: इतस्तत: अपश्यत्। बाणेन विद्ध: एक: हंस: भूमौ पतित: आसीत्। एतत् दृष्ट्वा सिद्धार्थस्य चित्तं करुणया व्याकुलं जातम्। स: धावित्वा हंसस्य शरीरात् बाणं निष्कास्य तम् अङ्के आधारयत्। अत्रान्तरे देवदत्त: धावन् तत्र प्राप्त:। सिद्धार्थस्य हस्ते हंसं दृष्ट्वा स: उच्चै: अवदत्–"सिद्धार्थ! एष: मम हंस:। मया बाणेन निपातित:। अत: मह्यम् देहि।" सिद्धार्थ: दृढतया अवदत्–"अहं न दास्यामि। अहम् अस्य रक्षक: अस्मि।" तदा तौ विवादं कुर्वन्तौ राजसभां गतौ। राजा सर्वं वृत्तान्तम् आकर्ण्य आदिशत्–"यस्य पार्श्वे हंस: आगमिष्यति तस्यैव भविष्यति।" हंस: सिद्धार्थस्य समीपं गतवान्। सत्यमिदम्-**भक्षकात् रक्षक: श्रेयान्।** [*CBSE 2015*]

**प्रश्ना:–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) विवादं कुर्वन्तौ सिद्धार्थदेवदत्तौ कुत्र गतौ?

(*ii*) क: सिद्धार्थस्य समीपं गतवान्?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) सिद्धार्थ: उपवनं किमर्थं गत:?

(*ii*) बाणेन विद्ध: क: आसीत्?

**III. निर्देशानुसारं शुद्धम् उत्तरं प्रदत्तविकल्पेभ्य: चित्वा लिखत।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'श्रुत्वा' इत्यर्थे अत्र किं पदम् प्रयुक्तम्?

(क) आकर्ण्य (ख) संश्रूय (ग) श्रुत्वा (घ) उपश्रूय

(*ii*) 'अहम् अस्य रक्षक: अस्मि।' अस्मिन् वाक्ये 'अहम्' पदं कस्मै प्रयुक्तम्?

(क) देवदत्ताय (ख) सिद्धार्थाय (ग) नृपाय (घ) हंसाय

(*iii*) 'प्राप्त:' इति क्रियापदस्य कर्तृपदं किम्?

(क) सिद्धार्थ: (ख) स: (ग) देवदत्त: (घ) हंस:

(*iv*) 'ध्वनिं' इति विशेष्यपदस्य विशेषणपदं किम्?

(क) हंसस्य (ख) क्रन्दनस्य (ग) विहारार्थम् (घ) करुणं

**IV. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 10

अनुशासन-पालनेनैव मानवः जीवने साफल्यमधिगच्छति। बाल्ये यौवने वार्द्धक्ये चापि अनुशासनस्य आवश्यकता भवति। एवं हि गृहे विद्यालये सार्वजनिकसंस्थासु शासने सेनायां वा अनेन विना कार्यं न चलति। यदि छात्राः विद्यालये अनुशासनस्य पालनं न कुर्युः तदा तत्र अव्यवस्था भवेत्। अद्यत्वे विद्यालयेषु महाविद्यालयेषु च सर्वत्रानुशासनस्याभावः दृश्यते येन ताः संस्थाः उपद्रवाणां कलहानां च केन्द्राणि जाताः। यदि शासने अनुशासनं न भवेत् तर्हि सर्वमपि राष्ट्रं विश्रृंखलताम् गच्छेत्। अतः आत्मनः देशस्य समाजस्य च उन्नत्यै अनुशासनं नितरामावश्यकम्। [*CBSE 2016*]

**प्रश्नाः–उपर्युक्तं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.)

(*i*) नरः जीवने केन साफल्यमधिगच्छति?

(*ii*) यदि छात्राः अनुशासनं न पालयेयुः तदा किं भवेत्?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) अनुशासनं कदा आवश्यकं भवति?

(*ii*) विद्यालयेषु कस्य अभावः दृश्यते?

**III. निर्देशानुसारं शुद्धम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'वृद्धावस्थाम्' इति पदस्य किं पर्यायपदम् अत्र दत्तम्?

(क) सेनायाम् (ख) वार्द्धक्ये (ग) अद्यत्वे (घ) शासने

(*ii*) गच्छेत् इति क्रियापदस्य किं कर्तृपदमत्र प्रयुक्तम्?

(क) राष्ट्रम् (ख) सर्वम् (ग) अनुशासनम् (घ) विश्रृंखलताम्

(*iii*) 'ताः संस्थाः' इतिवाक्ये किं विशेष्यपदम्?

(क) ताः (ख) संस्थाः (ग) केन्द्राणि (घ) जाताः

(*iv*) 'विफलता' इति पदस्य विलोमपदम् किम् अत्र प्रयुक्तम्?

(क) अनुशासनम् (ख) अव्यवस्था (ग) साफल्यम् (घ) कलहानाम्

**IV. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

# क अपठित-अवबोधनस्य विचारबिन्दवः

**विषयः — अपठित-अवबोधनम्** **उपविषयः — प्रश्नानि उत्तराणि च**

❑ **क्रियाकलापः — 1 : अनुच्छेद-आधारितानि प्रश्नानि तेषाञ्च उत्तराणि**

➢ **उद्देश्य ज्ञानम्** : गद्यांशस्य समुचितं पठन-पाठनम्, अर्थबोधनम्, तदाधारितानाञ्च दत्तानां प्रश्नानाम् उत्तराणि दातुं क्षमतायाः विकासः रुचेः संवर्धनञ्च।

➢ **साधनानि** : गद्यांशात् सम्बद्धं चित्रम्, मार्जनी, सुधाखण्डाः, सङ्केतयष्टिः श्यामपट्टादयः।

➢ **कौशल-विकासः** : संस्कृतभाषायाः ज्ञानेन सह अर्थग्रहण क्षमता-उत्पत्तिः, रचनात्मकं चिन्तनं एवम् आत्म-विश्लेषणस्य संवर्धनम्।

➢ **अवधिः** : होरार्धम् (30 मिनट)

➢ **विधि-व्यवस्था**

1. प्रथमं शिक्षकाः स्वयमेव सम्पूर्णं गद्यांशं पठेयुः।
2. पश्चात् एकम्-एकं कृत्वा छात्रान् पठितुं प्रेरयन्तु।
3. पुनः समस्तं गद्यखण्डं वैयाकरणिक-दृष्ट्या अवबोधयेयुः।
4. ततः तदाधरितानां दत्तानां प्रश्नानामुत्तराणि दातुम् छात्रान् प्रेरयन्तु यत् ते गद्यांशे स्थितानि उत्तराणि यच्छेयुः।
5. यदा छात्राः कठिनतायाः अनुभूतिं कुर्युः-तदा शिक्षकाः तेषां सहायतामपि कुर्वन्तु।
6. यथानिर्देशम् एकपदेन पूर्णवाक्येन च सम्यक्‌यतया एव उत्तराणि स्युः एतस्य ध्यानम् अवश्यमेव भवेत्।
7. एवमेव व्याकरणस्य (भाषिककार्यस्य) उत्तराणि अतीव धैर्येण शान्त्या च यच्छेयुः। सर्वप्रथमम् क्रिया-विशेष्य-पर्याय-विलोमानां (विपर्ययानां) च सम्यक्‌तया ज्ञानं प्रतीतं च कुर्यात्। पुनः प्रश्नोत्तराणि कुर्यात्।

❑ **शिक्षकेभ्यः निर्देशाः**

1. शिक्षकाः यथासम्भवं प्रथमं श्मामपट्टे अनुच्छेदम् अथवा प्रश्नानि लिखेयुः।
2. पुनः शिक्षकाः प्रश्नानि पृष्ट्वा छात्रान् तेषाम् उत्तरार्थं प्रेरयेयुः। यदि छात्राः उत्तराणि न दातुं शक्नुवन्ति तर्हि स्वयमेव कथयन्तु।
3. ततः परं व्याकरणिक-प्रश्नान् अपि पृष्ट्वा उत्तरार्थं छात्रान् अनुच्छेदं द्रष्टुं प्रेरयन्तु।
4. कठिन अथवा अस्पष्ट उत्तराणि श्यामपट्टे लेखयेयुः।

❑ **कक्षाकार्यम्**

1. अनुच्छेदस्य पाठं कृत्वा तस्य उपरि एकं प्रश्नं अध्यापकः पृच्छेत्।
2. अनुच्छेदस्य एकं पदं नीत्वा तस्य लकारं, वचनं पुरुषञ्च पृच्छेत्।

## ❑ गृहकार्यम्

छात्राः एवमेव अस्य अनुच्छेदस्य उपरि प्रश्नोत्तराणि लेखिष्यन्ति–

1. छात्राः अनुच्छेदं पठित्वा सरलप्रश्ननिर्माणं कृत्वा तस्य एकपदेन उत्तरं लिखन्तु।
2. ते पूर्णवाक्येन अपि प्रश्नानामुत्तरं लिखन्तु।

## ❑ मौखिकप्रश्नाः

1. अध्यापकः छात्रान् सरल प्रश्नं पृच्छतु।
2. ते कर्ता-क्रिया-अन्वितिं चापि पृच्छन्तु।

## ❑ निर्देशनम्

कर्ता-क्रियायाः अन्वितिः एवं पर्यायः विपर्ययश्च कथं ज्ञातं भवेत्। एतस्य कृते छात्रः प्रयत्नं कुर्यात्।

---

## विषयः— अपठित-अवबोधनम् उपविषयः — प्रश्नानि उत्तराणि च

### ❑ क्रियाकलापः—2 : अनुच्छेदस्य प्रश्नोत्तरैः सार्धं व्याकरणस्य अपि ज्ञानप्रदानम्

➢ **निर्धारणम्**

1. छात्राः समस्तं गद्यांशं पठितुं शक्याः (समर्थाः) भवन्तु।
2. गद्यांशे स्थितं भावमपि ज्ञातुं छात्राः शक्नुयुः।
3. सामान्य व्याकरणिक ज्ञानेन 'भाषिककार्यम्' इति शीर्षकान्तर्गतानां प्रश्नानाम् उत्तराणि अपि ते दातुं समर्थाः भवेयुः।

➢ **साधनानि** : गद्यांशात् सम्बद्धं चित्रम्, मार्जनी, सुधाखण्डाः, सङ्केतयष्टिः श्यामपट्टादयः।

➢ **कौशल-विकासः** : गद्यांशस्य अर्थज्ञानेन सह अभिव्यक्तेः कौशलमपि विकसितं भवेत्। शब्दानाम् उत्पत्तिः, प्रकृतिः, समविषय पदानां निर्माणम् तेषां चयनञ्चापि ज्ञातुं समर्थः करणम्।

➢ **अवधिः** : होरार्धम् (30 मिनट)

➢ **विधि-व्यवस्था**

1. शिक्षकाः छात्रान् अपठितं गद्यांशं पठितुं प्रेरयन्तु। पुनः यथासम्भवं स्व सहायतामपि यच्छेयुः।
2. मध्ये-मध्ये कठिन शब्दानां पङक्तीनाञ्च भावम्, अर्थ सारं च छात्रान् अवबोधयेयुः।
3. यदि सम्भवं भवेत् तर्हि श्यामपट्टे अपि वर्तनी शोधयितुं शब्दान् लिखित्वा छात्रान् अवबोधयेयुः।
4. उत्तराणि प्रश्ननिर्देशानुसारमेव भवेयुः एतस्यापि ध्यानम् आवश्यकमस्ति।
5. व्याकरणिकप्रश्नाः अधिकतरं सामान्य ज्ञाने आधारिताः भवन्ति अतः सामान्य व्याकरणस्य ज्ञानम् अतीव आवश्यकं वर्तते।

## ❑ शिक्षकेभ्यः निर्देशाः

1. गुरुजनाः छात्रान् गद्यांशं बोधयित्वा पाठयित्वा च निर्देशानुसारं प्रश्नान् तेषाम् च उत्तराणि लेखितुं प्रेरयिष्यन्ति।
2. ध्यातव्यम् यत् उत्तराणि निर्देशानुसारमेव भवेयुः। अधिकं न्यूनं वा उत्तरम् अशुद्धं भविष्यति।
3. 'भाषिककार्यम्' इत्यस्य प्रश्नोत्तराणां कृते शिक्षकाः छात्रान् व्याकरणं प्रति प्रेरयन्तु; यथा—वाक्ये कः कर्ता अस्ति का च क्रिया? कस्य शब्दस्य पर्यायः विलोमः च कः कः भवितुं शक्नोति। इत्यस्य ज्ञानं दत्त्वा तेषां प्रश्नानाम् उत्तराणि दातुं प्रेरयिष्यन्ति।

## ❑ कक्षाकार्यम्

छात्राः परस्परं विचारं कृत्वा प्रश्नानाम् निर्माणं करिष्यन्ति। ते न्यूनतमं द्वि-त्रि प्रश्नान् लेखिष्यन्ति।

## ❑ गृहकार्यम्

छात्राः अनेन प्रकारेण एव अन्यानि प्रश्नोत्तराणि अपि कृत्वा आनेष्यन्ति। छात्राः पञ्च-सप्त प्रश्नानाम् उत्तराणि अवश्यमेव लिखेयुः।

## ❑ मौखिकप्रश्नाः

कक्षायां छात्राः अन्यानपि प्रश्नान् करिष्यन्ति—

1. एकपदेन पूर्णवाक्येन च।
2. भाषिककार्यम् अपि पृच्छेयुः।
3. अस्य अनुच्छेदस्य शीर्षकः कः ?

## ❑ निर्देशनम्

1. अनेन प्रकारेण अन्यमपि गद्यांशम् अन्वेष्टुं छात्रान् शिक्षकाः प्रेरयन्तु। येन छात्राः तेषां प्रश्नानां निर्माणेऽपि समर्थाः भवेयुः।
2. छात्रैः अतीतं कार्यं दृष्ट्वा गुरवः तेषां कृते उत्साह-वर्धनार्थं तालिका वादनमपि कारयन्तु।
3. यथासम्भवं च स्व पक्षतः प्रश्ननिर्माणं कृत्वा छात्रान् उत्तराणि दातुं प्रेरयन्तु अपि।

---

## विषयः— अपठित-अवबोधनम् उपविषयः —प्रश्नानि उत्तराणि च

## ❑ क्रियाकलापः—3 : गद्यांशाधारिताः प्रश्नोत्तराणि

### ➢ निर्धारितम् उद्देश्यम्

1. छात्राणां रुचिं संस्कृतं प्रति वर्धनम्।
2. छात्राः संस्कृतस्य पठनम्, श्रवणं भाषणञ्च कर्तुं समर्थाः भवेयुः।
3. वार्तालापेऽपि ते समर्थाः भवेयुः।
4. गद्यांशे व्याकरणबिन्दुम् अपि ज्ञातुं शक्नुयुः।

**➢ साधनानि** : गद्यांशात् सम्बद्धं चित्रम्, मार्जनी, सुधाखण्डाः, सङ्केतयष्टिः श्यामपट्टादयः।

### ➢ कौशल-विकासः :

1. अनुच्छेदस्य अर्थं ज्ञात्वा तस्य विषयस्य ज्ञानं प्राप्तुं छात्राः समर्थाः भविष्यन्ति।
2. अनुच्छेदात् स्वजीवनपरकं मूल्यम् अपि ते ग्रहीष्यन्ति।

**➢ अवधिः** : होरार्धम् (30 मिनट)

### ➢ विधि-व्यवस्था

1. प्रथमं कक्षायाः विभाजनं द्वि-त्रि वा वर्गेषु कुर्यात्। तत्पश्चात् वारं-वारं यथाक्रमं प्रत्येकं छात्राणाम् उच्चारणस्य परीक्षणं कुर्यात्।
2. अनुच्छेदात् पर्यायस्य विपर्ययस्य (विलोमस्य) च चयनं गृहे सम्यक् स्थित्वा एव कुर्यात्।
3. सहैव विशेषण-विशेष्य, कर्ता-क्रिया-चयनम् अपि कर्तव्यम्।
4. प्रश्नानाम् उत्तराणि गद्यांशे एव भवन्ति अतः ध्यानं दत्त्वा एकम्-एकं शब्दं पठेत्।
5. यदा प्रश्नानाम् उत्तराणि स्पष्टानि भवेयुः तदैव उत्तरपुस्तिकायाम् तानि लिखेयुः।

## ❑ शिक्षकेभ्यः निर्देशाः

1. शिक्षकमहोदयाः सर्वप्रथमम् अनुच्छेदस्य वाचनं छात्रैः कारयेयुः। मध्ये-मध्ये च स्व-सहायतया छात्राणाम् उत्साहं रुचिं च वर्धयेयुः।

2. तत्पश्चात् दत्तानां प्रश्नानां निर्देशानुसारेण उत्तरं दातुं छात्रान् प्रेरितान् ते कुर्वन्तु। येन छात्राः निर्विघ्नं तानि उत्तरन्तु।
3. 'भाषिककार्यम्' इति प्रश्नानाम् उत्तरं दातुम् अपि शिक्षकाः छात्राणाम् सामान्यरुचिं जाग्रीषेयुः; यथा—पर्यायः, विलोमः (विपर्ययः), कर्ता-क्रिया-अन्विति: विशेषण-विशेष्य-चयने च ते समर्थाः भवेयुः। सुष्ठुरूपेण उत्तराणि दातुम् अपि ते समर्थाः भवेयुः।
4. छात्राः शिक्षकस्य सहायतया कक्षायाम् एवं प्रश्ननिर्माणं कृत्वा प्रक्ष्यन्ति।

## ❑ कक्षाकार्यम्

कक्षायां छात्राः प्रश्ननिर्माणं करिष्यन्ति।

1. छात्राः एकं वाक्यं नीत्वा तस्य एकपदेन पूर्णवाक्येन वा प्रश्नोत्तराणि निर्माण लेखिष्यन्ति।
2. भाषिककार्यम् अपि ते भवेयुः।

## ❑ गृहकार्यम्

एवमेव छात्राः अस्य अनुच्छेदस्य उपरि प्रश्नोत्तराणि करिष्यन्ति; **यथा—**

1. एकं क्रियापदं नीत्वा तस्य मूलधातुः / पुरुषः / वचनं लकारञ्च लिखन्तु।
2. स्वयमेव प्रश्ननिर्माणं कृत्वा तस्य उत्तरम् अपि लिखन्तु।

## ❑ शीर्षक-प्रदानम्

अनुच्छेदं पूर्णरूपेण शान्तया (शान्तिपूर्वकं) पठित्वा यस्य विषयस्य वर्णनं तस्मिन् गद्यांशे अस्ति तद् एव शीर्षकं भविष्यति।

## ❑ मौखिकप्रश्नाः

छात्राः शिक्षकस्य सहायतया कक्षायाम् एवं प्रश्ननिर्माणं कृत्वा प्रक्ष्यन्ति; **यथा—**

1. छात्राः एकं पदं नीत्वा तस्यार्थे प्रश्नवाचकं पदं लिखन्तु।
2. एकं वाक्यं नीत्वा तस्य उत्तरमपि लिखन्तु।

## ❑ निर्देशनम्

1. एवमेव अन्य-गद्यांशस्य अपि अभ्यासाय प्रयत्नं कुर्यात्।
2. स्व ज्ञान-कौशलाभ्याम् अन्यः गद्यांशोऽपि रचयन्तु।

---

## विषयः— अपठित-अवबोधनम् उपविषयः — प्रश्नानि उत्तराणि च

### ❑ क्रियाकलापः—4 : अनुच्छेदस्य प्रश्नोत्तरैः सह व्याकरणिकम् अपि ज्ञानम्

➢ **अवधिः** : होरार्धम् (30 मिनट)

➢ **सरल उद्देश्यम्**

1. छात्राणां पठन-पाठन-शैल्याः परिमार्जनम्।
2. संस्कृतस्य स्वयमेव पठनं कृत्वा अर्थम् अपि जानीयात्।
3. भाषाकौशलस्य अपि विकासः।

➢ **साधनानि** : श्यामपट्टः, सुधाखण्डाः, सङ्केतयष्टिः, मार्जनी, गद्यांशात् सम्बद्धं चित्रम् इत्यादयः।

➢ **कौशल-विकासः** :

1. लेखनशैल्याः विकासः भविष्यति।
2. वाक्यविन्यासस्य योग्यता अपि भविष्यति।

➢ **विधि-व्यवस्था**

1. सर्वप्रथमं छात्रान् त्रि-चतुर्-पञ्च वा वर्गेषु विभाजनं कुर्यात्। ततः दत्ते गद्यांशे ध्यानं दत्त्वा चिन्तनं कुर्यात्। प्रत्येकं शब्दस्य अर्थचिन्तनं कृत्वा प्रश्नानाम् उत्तराणि लिखेत्।
2. प्रयत्नं कुर्यात् यत् प्रश्नानाम् उत्तराणि क्रमबद्धानि भवेयुः।
3. शिक्षकमहोदयः सर्वप्रथमम् अनुच्छेदस्य वाचनं कारयेत् तत्पश्चात् तस्य अर्थ ज्ञातुं छात्रान् प्रोत्साहितान् करोतु।
4. ततः ''एकपदेन उत्तरत'' इति निर्देशानुसारेण उत्तराणि एकपदे एव भवेत् इति कार्याय छात्रान् प्रेरयेत्। द्वि-त्रि-चतुर् वा पदेषु न दद्यात्।
5. पुनः ''पूर्णवाक्येन उत्तरत'' इत्यनयोः प्रश्नयोः उत्तरेऽपि पूर्णवाक्ये एव दद्यात्। शीघ्रतावशात् एकपदे न लिखेत् अन्यथा पूर्णाङ्कः न प्राप्स्यति।
6. ''भाषिककार्यम्'' इत्यस्य प्रश्नस्य अपि उत्तरं दानात् पूर्वं प्रश्नं सुष्ठुरूपेण पठेत् तथा प्रश्नानुसारेण एवं उत्तराणि लिखेत्।

## ❑ शिक्षकाय निवेदनम्

1. एवमेव द्वि-त्रि-वा अनुच्छेदस्य सङ्ग्रहं कर्तुम् छात्रेभ्यः कथयेत्। ते तानि पठित्वा अवबोध्य च तेषां उपरि प्रश्नानाम् निर्माणं करिष्यन्ति।
2. एवमेव तेषां प्रश्नानाम् उत्तराणि लिखित्वा अपि नेष्यन्ति।
3. शिक्षकाः तान् अवलोकयिष्यन्ति।
4. छात्राः यत् कार्यं कृत्वा कक्षायां आनेष्यन्ति तस्य अवलोकनं शिक्षकाः विद्यालये अवश्यमेव करिष्यन्ति। एवं स्व हस्ताक्षरमपि कृत्वा छात्रान् प्रोत्साहितम् अपि करिष्यन्ति।

## ❑ कक्षागतंकार्यम्

1. अनुच्छेदं पाठयित्वा छात्रान् सरल प्रश्नमपि शिक्षकाः पृच्छन्तु।
2. ते एकं पदं चित्वा तस्य लिङ्गं / वचनम् / कारकं पृच्छन्तु।

## ❑ गृहकार्यम्

1. छात्राः वाक्येषु स्थितान् पदान् नीत्वा तेषामुपरि प्रश्ननिर्माणं करिष्यन्ति।
2. ते द्वि-त्रि वा पदानां पर्यायः / विपर्ययः वापि लिखन्तु।

## ❑ शीर्षक-लेखनम्

अनुच्छेदस्य विषयस्य अनुसारेण एव शीर्षकम् अपि लिखेत्। यस्य विषयस्य वर्णनम् अनुच्छेदे वर्तते सः एव तस्य शीर्षकः भविष्यति; **यथा**—श्रीरामस्य जीवनपरकस्य अनुच्छेदस्य शीर्षकः ''श्रीराम चरितम्'' ''श्रीरामस्य वीरता'' ''श्रीरामस्य आदर्शम् / वीरता '' (आदयः) भवितुम् अर्हति।

## ❑ मौखिकप्रश्नाः

छात्राः यथारुचिलिखितस्य अनुच्छेदस्य विषये शिक्षकैः सह वार्तालापमाध्ययेन सविनयं प्रश्नोत्तरेभ्यः अनुरोधं कृत्वा मौखिक प्रश्ननिर्माणम् अपि करिष्यन्ति। एवमेव तेषाम् उत्तराणि अपि दास्यन्ति।

## ❑ निवेदनम्

1. शिक्षकाः एवमेव अन्य लघु-मध्यम-बृहत् वा अनुच्छेदानाम् सङ्ग्रहार्थं छात्रान् प्रेरयन्तु।
2. छात्राः अन्य अनुच्छेदस्य रचनाम् अपि कुर्युः।

## खण्डः 'ख'–रचनात्मकं कार्यम्   15 अङ्काः

### अङ्क-विभाजनम्

| | |
|---|---|
| (ख1) पत्रलेखनम् (दश रिक्तस्थानयुक्तं पत्रम्) | 5 अङ्काः |
| (ख2) सङ्केताधारितम् अनुच्छेदलेखनम्/चित्रवर्णनम् | 5 अङ्काः |
| (ख3) सरल संस्कृतेन वाक्यानाम् अनुवादः | 5 अङ्काः |

# ख1 पत्रलेखनम् ( दश रिक्तस्थानयुक्तं पत्रम् )

प्राचीन काल में पत्र-लेखन की प्रणाली आज की लेखन-प्रणाली से पूर्णतया भिन्न थी। उस समय पत्र-लेखन का आरम्भ 'स्वस्ति' या 'शुभमस्तु' से किया जाता था और प्रथम वाक्य में लिखने के स्थान ( लेखक के स्थान ) की सूचना देते हुए पत्र लेखक जहाँ और जिसके पास अपना पत्र भेजना चाहता था उसका उल्लेख करते हुए अपना परिचय ( नाम ) भी लिखता था।

परन्तु वर्तमान समय में हिन्दी भाषा में लिखे जाने वाले पत्रों के समान संस्कृत भाषा में भी पत्र लिखे जाने लगे हैं।

**वर्तमान समय की शैली—**

1. पत्र के दाईं ओर भेजने वाले का पूरा पता व उसके नीचे दिनांक ( तिथि ) लिखी जाती है; जैसे—

दयानन्द एंग्लो वैदिक विद्यालयः,<br>
दिल्लीतः।<br>
तिथिः 27.8.20...

2. स्थान के नाम के साथ पंचमी विभक्ति के स्थान पर 'तसिल्' प्रत्यय का भी प्रयोग किया जा सकता है; जैसे—

   फरीदाबादात् के स्थान पर फरीदाबादतः<br>
   दिल्लीनगरात् के स्थान पर दिल्लीतः<br>
   चण्डीगढ़नगरात् के स्थान पर चण्डीगढ़तः आदि।

3. वर्तमान समय में स्थान के साथ पंचमी विभक्ति व तसिल् प्रत्यय की जगह नपुंसकलिङ्ग/प्रथमा विभक्ति, एकवचन का प्रयोग भी होने लगा है; जैसे—

   फरीदाबादम्, दिल्ली नगरम्, चण्डीगढ़ नगरम् आदि।

4. तिथि/दिनांक लिखने में भी हिन्दी की शैली अपनाई जाती है; जैसे—

   4.8.20..., 10.5.20..., 30.7.20... और 27.8.20... आदि अन्य जानकारी निम्न **सारणी ( Table )** देखकर प्राप्त की जा सकती है—

## पत्र-लेखन विधि की सारणी

| सम्बन्ध ( नमस्कार वाचक शब्द ) | आरम्भ में | अन्त में |
|---|---|---|
| 1. पुत्र पिता को ( सादरं नमोनमः, चरणारविन्देषु सादरं प्रणामः, सादरं प्रणामः ) | (क) पूज्यपाद पितः !<br>(ख) आदरणीय पितृपाद !<br>(ग) पूज्यपाद पितृमहोदय !<br>(घ) पूज्यपादपितृमहोदयाः ! | (क) भवदाज्ञाकारी पुत्रः<br>(ख) भवतः विनीतः बालः<br>(ग) भवदीयः प्रियः सुतः<br>(घ) भवत्प्रियसूनुः |

| | | |
|---|---|---|
| 2. पिता पुत्र के लिए (शुभाशीर्वादम्) | प्रिय पुत्र सुरेश, चिरञ्जीव | त्वदीयः शुभचिन्तकः |
| 3. मित्र-मित्र को<br>(सप्रेम नमोनमः) | (क) प्रियमित्र दिनेश<br>(ख) प्रियसुहृद् देव | (क) भवदीयं मित्रम्<br>(ख) तव स्निग्धं मित्रम्<br>(ग) भवद्बन्धुः<br>(घ) स्नेहाङ्कितः |
| 4. छोटे भाई को<br>(शुभाशीर्वादम्) (प्रसीदतु) | (क) प्रिय भानो/प्रिय अनुज<br>(ख) प्रियभ्रातृवर सुरेश | (क) भवदीयो भ्राता<br>(ख) त्वदीयो भ्राता |
| 5. बड़े भाई को<br>(सादरं नमस्कारम्) | (क) आदरणीय भ्रातृपाद<br>(ख) आदरणीय भ्रातः | (क) भवदीयो भ्राता<br>(ख) भवदाज्ञाकारी |
| 6. बहन, बड़े भाई के लिए<br>(नमस्कारम्) | आदरणीय भ्रातः | भवदीया स्नेहाधीना भगिनी |
| 7. बहन, छोटे भाई के लिए<br>(शुभाशीर्वादम्) | प्रिय भ्रातः | भवदीया भगिनी |
| 8. भाई, छोटी बहन के लिए<br>(शुभाशीर्वादम्) | (क) आदरणीये भगिनि<br>(ख) प्रिये भगिनि | (क) भवदीयः प्रियः भ्राता<br>(ख) त्वदीयः प्रियः भ्राता |
| 9. प्रधानाचार्य के लिए<br>(चरणारविन्देषु सादरप्रणामः) | (क) मान्यवराः प्राचार्य-महोदयाः<br>(ख) मान्य प्राचार्य महानुभाव | (क) भवताम् आज्ञाकारी शिष्यः<br>(ख) भवतां वशंवदः<br>(ग) श्रीमतां वशंवदः |
| 10. प्रकाशक आदि के लिए<br>(नमोनमः) (व्यावहारिक पत्रों में) | (क) श्रीमन् प्रकाशक महोदय | (क) भवदीयः, भवदीया<br>(ख) भावकः |

## प्रार्थना-पत्रम्

**1. अनुपस्थितिवशात् शुल्कदण्डक्षमायाचनापत्रम्।**

(अनुपस्थिति के कारण शुल्क दण्ड की क्षमा हेतु प्रार्थना-पत्र। An application for the remission of fine due to absence.)

सेवायाम्,

श्रीमन्तः प्रधानाचार्यमहोदयाः,
सनातनधर्म-उच्चतर-माध्यमिक-विद्यालयः,
पञ्जाबी बाग, नई दिल्ली।

मान्यवराः,

भवतां सेवायां मम विनम्रं निवेदनम् अस्ति यत् गतमासस्य नवमे दिनाङ्के गृहे अनिवार्य-कार्यवशात् अहम् अवकाशम् अनादाय विद्यालये अनुपस्थितः आसम्। तेनाऽहं पञ्चाशत्रूप्यकशुल्कदण्डेन दण्डितोऽस्मि। मम विद्यार्थिजीवने अयं प्रथम एव ईदृशः अवसरः अस्ति। अतोऽहं प्रार्थये यत् तस्मिन् दिने मम अनुपस्थितिः भवद्भिः क्षन्तव्या, शुल्कदण्डप्रदानात् अपि च मह्यम् मुक्तिः प्रदेया।

भवदीयः शिष्यः,

दिनाङ्कः 20.3.20...

राकेश कुमारः

(नवम कक्षा, क्र० 20)

**2. शुल्क-दण्डक्षमार्थं प्रार्थनापत्रम्।** (शुल्क दण्ड की क्षमा के लिए प्रार्थना-पत्र। An application for the remission of fine.)

सेवायाम्,

श्रीमान् प्राचार्यमहोदयः,
हिन्दु-उच्चतर-माध्यमिक-विद्यालयः,
सोनीपत-नगरम्।

मान्यवराः,

सविनयं निवेद्यते यत् दिसम्बरमासे आयोजितायां परीक्षायाम् अनुपस्थितिवशात् अहं दश-रूप्यक-शुल्क-दण्डेन दण्डितोऽस्मि। परीक्षादिनेषु अहं तीव्रज्वररोगेण ग्रस्तः आसम्। गृहे मम माता एव आसीत्। सा तु सर्वदा मम सेवायां संलग्ना आसीत्। अतोऽहं यथाकालम् आवेदनपत्रम् प्रेषणाय समर्थः नाभवम्। मम विद्यार्थिकाले अयं प्रथममः एव ईदृशः अवसरः अस्ति। आशासे यत् अत्र भवन्तः मम शुल्क-दण्डं क्षमयित्वा ममोपरि अनुग्रहीष्यन्ति।

भवदीयः वशंवदः,

दिनाङ्कः 18.2.20...

सेवारामः
(नवमी कक्षा, क्र० 7)

## औपचारिक-पत्राणि

**3. मित्राय विवाहस्य निमंत्रणपत्रम्।** (मित्र को विवाह का निमन्त्रण-पत्र। An invitation letter of marriage to a friend.)

कुरुक्षेत्र विश्वविद्यालयपरिसरः,
कुरुक्षेत्रम्।
तिथिः 1.10.20...

प्रियमित्र रामसिंह,

सप्रेम नमः।

अत्र कुशलं तत्रास्तु। प्रिय मित्र, इदं ज्ञात्वा भवान् अतीव प्रसन्नो भविष्यति यत् मम विवाहः नवम्बरमासस्य दशमे दिनाङ्के सुनिश्चितो जातः। वरयात्रा तु जयपुरनगरं गमिष्यति। अस्मिन् अवसरे त्रिचतुर्दिनानि पूर्वतः एव अत्र आगत्य सर्वविधकार्येषु भवता सहयोगः प्रदेयो वर्तते।

भवतः सङ्गतिं कामयमानः।

भवदीयम् अभिन्नम् मित्रम्,
रामपालः

**4. पितुः पदोन्नति-विषयकं मित्रं प्रति पत्रम्।**

(पिता की पदोन्नति (तरक्की) के बारे में मित्र को पत्र। A letter to a friend about the promotion of father.)

1, प्रेमनगरम्,
यमुनानगरम्।
तिथिः 5.5.20...

प्रिय मित्र सुधीर,

सस्नेहं नमोनमः।

अत्र कुशलं तत्रास्तु। इदं विज्ञाय भवच्चेतः प्रसादम् अधिगमिष्यति यत् मम पूज्याः पितृपादाः अधुना विद्यालयस्य प्राचार्यपदम् अलङ्कुर्वन्ति। तेषाम् इयं पदोन्नतिः सेवायां सानुमत्ता (सीनिऑरिटी) कारणात्, लोकप्रियताकारणात् स्वविषये नैपुण्यकारणात् च सञ्जाता। आगामिनि रविवासरे अस्माभिः निमन्त्रिताः सर्वेऽपि प्राध्यापकाः जलपानार्थं मम गृहम् आगमिष्यन्ति। अस्मिन् अवसरे भवताऽपि अवश्यमेव आगन्तव्यम्। इदम्मम निवेदनमस्ति।

भवदीयं मित्रम्,
प्रमोदकुमारः

**5. विदेशस्थं मित्रं प्रति भारतर्तुविषयकं पत्रम्।**

(विदेश में रहने वाले मित्र को भारत की ऋतुओं के विषय की जानकारी देते हुए पत्र। A letter to a friend living abroad giving information about seasons of India.)

डी–100,
विश्वविद्यालयपरिसरः,
कुरुक्षेत्रम्।
दिनाङ्कः 30.4.20...

प्रिय डेविड,
सप्रेम नमोनमः।

अत्र कुशलं तत्रास्तु। भवदीयं पत्रम् अद्यैव अधिगतम्। भवता लिखितम् इंग्लैंडदेशस्य ऋतूणां वर्णनम् पठित्वा मम जिज्ञासा शान्ता। भारतस्य विविध ऋतुविषयकं मम वृत्तं पठित्वा भवान् अनुभविष्यति यत् भवता भारतदेशे एकवर्षं यावत् निवासः अवश्यमेव करणीयः।

प्रकृतेः भारतस्योपरि ईदृशी कृपा वर्तते यत् भारते वसन्त, ग्रीष्म, वर्षा, शरद्, हेमन्त, शिशिर–नामानः षड् ऋतवः आयान्ति यान्ति च। एते ऋतवः प्रतिवर्षं चक्ररूपेण भ्रमन्ति। तेषां प्रसादात् जनाः विविधानाम् अन्नानाम्, औषधीनां, फलानां, पुष्पाणां च समृद्धिं लभन्ते। ऋतूणाम् इयम् उदारता विश्वस्य अन्येषु देशेषु न कुत्रापि विराजते।

आशासे अत्र आगत्य भवान् मम वचांसि प्रमाणिकरिष्यति।

भवदीयं मित्रम्,
रामचन्द्रः

**6. स्वाध्याय-प्रगति-विषयकं भ्रात्रे पत्रम्।**

(स्वाध्याय (अध्ययन) की प्रगति के विषय में भाई को पत्र। A letter to the brother about the progress of self-study.)

16, छात्रावासः,
गीताविद्यालयः,
कुरुक्षेत्रम्।
दिनाङ्कः 7.12.20...

आदरणीय भ्रातः,
सप्रेम नमः।

अत्र कुशलं तत्रास्तु। भवदिच्छाम् अनुपालयन् अद्यऽहं भवते निजाध्ययनविषयकीं वार्तां लिखामि। गतमासे मया भवत्प्रेरणापत्रं लब्धम्। तदा प्रभृति अहं हृदयेन पठने संलग्नोऽस्मि। अधुनाऽहं प्रतिविषयं एकां होरां प्रतिदिनं ददामि। गृहकार्यं प्रतिदिनं पूर्णं करोमि। अधुनाऽहं सायंकाले एव एकहोरापर्यन्तं क्रीडाक्षेत्रं गच्छामि। मम अध्यापकाः अपि मम प्रगतिं दृष्ट्वा प्रसीदन्ति। भवता इदानीं मम चिन्ता न कार्या। भगवत्कृपया वार्षिक्यां परीक्षायाम् अहं प्रथमां श्रेणीम् अवश्यमेव अधिगमिष्यामि।

मातृपितृभ्यां नमोनमः।

भवदीयः प्रियो भ्राता,
रविशंकरः

**7. विद्यागौरवविषये भगिनीं प्रति पत्रम्।**

(विद्या के गौरव (महत्त्व) के विषय में बहन को पत्र। A letter to the sister about the importance of education.)

1, प्रेम नगरम्,
यमुना नगरम्।
तिथिः 10.9.20...

स्नेहमयि प्रीतिलते,

सप्रेम नमः।

अत्र कुशलं तत्रास्तु। अद्यैव तव पत्रं लब्धम्। अस्याम् अवस्थायामपि विद्यार्जने तव अरुचिं ज्ञात्वा अतीव दुःखं जातम्। विद्याध्ययने यत् कष्टं भवति तत् त्वया बहु मन्यते। त्वं विस्मरसि यत् जीवने सफलतां प्राप्तुम् अपठितस्य जनस्य भाग्ये शारीरिकश्रमः एव तिष्ठति। आधुनिकसमाजे अपठितः गौरवास्पदं लब्धुं नार्हति। अविद्वान् विद्वांसम् अनुगच्छति। सः समाजस्य नेतृत्वं कर्तुं न पारयति। अपठितः पदे पदे काठिन्यं भजते, तद् दूरीकर्तुं च विदुषां शरणम् अनुयाति । अतः भवता अध्ययनविषये कदापि उपेक्षा न करणीया। इति मे परामर्शः।

भवदीयः भ्राता,

प्रमोद कुमारः

**8. राष्ट्रसेवाशिविरवृत्तान्ताय भगिनीं प्रति पत्रम्।**

(राष्ट्र-सेवा-शिविर के वर्णन हेतु बहन को पत्र। A letter to the sister about Nation-Service-Camp.)

10, प्रतापभवनम्,

कुरुक्षेत्रम।

तिथिः 25.8.20...

आदरणीय भगिनि,

सप्रेम नमः।

भवदीयं पत्रम् अद्यैव प्राप्तम्। अहम् ह्यः एव राष्ट्रीयसेवाविशिविरात् निवृत्तः अस्मि। ज्योतीश्वरग्रामे इदं शिविरम् आयोजितम् अभवत्। शिविराध्यक्षः मम संस्कृताध्यापकः श्रीविद्याभूषणमिश्रः आसीत्। ग्रामस्य समीपे दरिद्राणां वसतिः आसीत्। वीथीषु ये गर्ताः आसन् तान् भृत्वा मार्गाः सुगमाः कृताः। वसतिं ग्रामेण सह योजयितुं कश्चन मार्गः अपि अस्माभिः कृतः। सप्तदिवसेषु सर्वं कार्यं सम्पन्नम्। ग्रामीणाः अतीव प्रसन्नाः आसन्। अस्तु। सर्वेभ्यः पूज्येभ्यः नमोनमः।

भवदीयः प्रियो भ्राता,

राजेन्द्रः

**9. विद्यालयस्य पर्यटनकार्यक्रमे अनुमतिहेतोः पितरं प्रति पत्रम्।**

(विद्यालय के पर्यटन कार्यक्रम में आज्ञा के लिए पिता को पत्र। A letter to the father for permission to attend an excursion programme.)

परीक्षाभवनम्।

तिथिः 8.12.20...

पूज्यपादपितृमहोदयाः,

सादरं नमोनमः।

अत्र कुशलं तत्रास्तु। सविनयं निवेद्यते यद् अग्रिममासस्य पञ्चमदिनात् आरभ्य अस्माकं विद्यालये पञ्चाकिः अवकाशः निश्चितो जातः। एतेषु दिनेषु अस्माकं श्रेण्याः विंशतिः छात्राः सम्भूय पर्यटनार्थं शिमलानगरं गन्तुम् अभिलषन्ति। तैः सह भ्रमणार्थं ममापि रुचिः वर्तते। अतः पूर्वं न मया कदापि पर्वतभ्रमणस्य अनुभवः प्राप्तः। अस्माकं वरिष्ठः अध्यापकः अस्माभिः सह गमिष्यति। व्ययोऽपि नाधिको भविष्यति। व्ययस्य अर्धभागः तु विद्यालय एव वक्ष्यति। प्रतिच्छात्रं त्रिंशत् रुप्यकाणि देयं वर्तते। आशासे यद् भवान् मह्यम् अनुमतिं दत्त्वा, रुप्यकाणि च धनादेशद्वारा प्रेष्य ममोत्साहवृद्धिं करिष्यति।

गृहे सर्वेभ्यः नमोनमः।

भवदीयो विनीतो बालः,

क० ख० ग०

**10. पित्रे रक्तदानशिविरविषयकं पत्रम्।**

(पिता को रक्तदान शिविर के विषय में पत्र। A letter to the father about blood donation camp.)

परीक्षाभवनम्।

दिनाङ्कः 11.2.20...

पूज्य पितृमहोदय,
चरणवन्दना।

अत्र कुशलं तत्रास्तु। अद्याहं भवन्तं निवेदयामि यद् अस्माकं विद्यालये गतसप्ताहे रक्तदानशिविरम् आयोजितम्। अस्माकं कक्षायाः प्रमुखः अध्यापकः श्रीमान् रामचन्द्रः शिविरस्य प्रमुखः आयोजकः आसीत्। सः प्रथमं स्वरक्तं प्रायच्छत्। तदनन्तरम् दशमकक्षायाः पञ्च छात्राः एतस्मिन् शुभकार्ये अग्रेसराः अभवन्। तेषाम् उत्साहं दृष्ट्वा मम मनसि अपि भावना सञ्जाता तथा च मयाऽपि स्वरक्तम् प्रदत्तम्। आशासे यद् भवान् मम एतां भावनां दृष्ट्वा प्रसन्नो भविष्यति। अहं पूर्णतया सकुशलोऽस्मि। चिन्तया अलम्।

भवदाज्ञाकारी,
क० ख० ग०

**11. महाविद्यालये शिक्षा-लाभाय कन्या-शिक्षा-महत्त्व-बोधन-पुरस्सरं कन्यायाः मातरं प्रति पत्रम्।**

(महाविद्यालय (कॉलेज) में शिक्षा के लाभ हेतु कन्याओं की शिक्षा के महत्त्व की जानकारी देते हुए कन्या (लड़की) का माता को पत्र। A letter to a girl's mother informing her about the importance of girls education in a college.)

परीक्षाभवनम्।
तिथिः 5.10.20...

मम पूजनीयाः मातृपादाः,
भूयोभूयः सादरं नमामि।

अत्र कुशलं तत्रास्तु। सेवायाम् इदं निवेदनम् अस्ति यत् मम मैट्रिक-परीक्षा फलम् अद्यैव प्राप्तम्। मया प्रथमा श्रेणी लब्धा इति ज्ञात्वा भवती अतीव प्रसन्ना भविष्यति। अधुनाऽहं उच्चशिक्षालाभाय महाविद्यालयप्रवेशार्थं भवदनुमतिं कामये। आधुनिके वैज्ञानिके युगे पुरुषाः उच्चशिक्षां लब्ध्वा जीवनभारं सम्यक् वोढुं यतन्ते। आत्मानं योग्यां जीवनसंगिनीं साधयितुम् स्त्रियः अपि सुपठिताः बहुज्ञाः च भवेयुः इति अनिवार्यम् अस्ति। आशासे भवती ममाभीष्टं युक्तियुक्तं मत्वा महाविद्यालये शिक्षार्जनस्य निजानुमतिं अवश्यमेव प्रदास्यति इति।

भवत्प्रिया पुत्री,
क० ख० ग०

**12. संस्कृतभाषायाः पुस्तकानाम् कृते प्रकाशकम् प्रति पत्रम्।**

(संस्कृत भाषा की पुस्तकों के लिए प्रकाशक को पत्र। A letter to the publisher for Sanskrit language books.)

परीक्षाभवनम्।
तिथिः 16.3.20...

सेवायाम्,
श्रीमन् प्रबन्धक महोदय,
न्यू सरस्वती हाउस (इण्डिया) प्रा०लि०
दरियागंज, नव दिल्ली।

श्रीमन्,

सेवायाम् निवेदनम् अस्ति यद् अहम् अधस्तानि कानिचित् पुस्तकानि क्रेतुम् इच्छामि। अहम्मन्ये यत् एतानि पुस्तकानि भवत्पार्श्वे सुलभानि भविष्यन्ति।

कृपया यथानिर्देशितानि पुस्तकानि अचिरात् प्रदेय-शुल्क सहितानि-पार्सल-द्वारेण (वी०पी०पी० द्वारेण) प्रेषणीयानि।

| | पुस्तक का नाम | लेखक का नाम | प्रति |
|---|---|---|---|
| 1. | सरस्वती संस्कृत व्याकरणम् (भाग-1) | हरि ओ३म् शास्त्री | एका |
| 2. | डायमंड संस्कृत (भाग-1) | डॉ० मुनेश शर्मा | एका |
| 3. | मणिका (अभ्यास-पुस्तिका भाग-1) | केन्द्रीय माध्यमिक शिक्षा बोर्ड | एका |

सधन्यवादम्,

निवेदकः,
धर्मचन्दः

## कुछ अन्य अभ्यासार्थं पत्राणि

**( क ) पत्रसङ्केतं पठत**

सविधे

**प्रो. सतीश आनन्दः**
बी/डी 38 गान्धीनगरम्
जम्मूतवी-180001
जम्मू- काश्मीर-राज्यम्

**उदाहरणं दृष्ट्वा स्वपितुः पत्रसङ्केतं लिखत**

...........

..............................................

..............................................

..............................................

..............................................

**( ख ) प्रधानाचार्यं प्रति शुल्कक्षमापनार्थं पत्रम्**

प्रतिष्ठायां
प्रधानाचार्यमहोदय,
रोजरी विद्यालयः,
बड़ोदरा

**विषयः–** शुल्कक्षमापनार्थं निवेदनम्।

श्रीमन्,

सविनयं निवेदनम् अस्ति यत् अहं भवतः विद्यालये नवमकक्षायाः छात्रः अस्मि। मम पिता एकः लिपिकः अस्ति। तस्य मासिकं वर्तनं द्विसहस्ररूप्यकाणि मात्रमेव अस्ति। मम एकः भ्राता अष्टमकक्षायां भगिनी च पंचमकक्षायां पठति। अस्माकं कुटुम्बस्य निर्वाहः अतीव काठिन्येन भवति।

अहं कक्षायां प्रतिवर्षं प्रथमं स्थानं प्राप्नोमि। अतः शुल्कक्षमापनार्थं प्रार्थये। आशासे अत्रभवान् मम एतां प्रार्थनां स्वीकृत्य अनुग्रहीष्यति।

सधन्यवादाः,
विनीतः शिष्यः,
क, ख, ग
नवमकक्षास्थः, अनुक्रमांकः षोडशः
दिनांक : 5.10.99

(ख) 1. दिनत्रयस्य अवकाशप्राप्त्यर्थं प्रधानाचार्यां प्रति प्रार्थनापत्रम्

..............................

..............................

..............................

..............................

विषयः ............................................................

........................

........................................................................................................................

........................................................................................................................

........................................................................................................................

........................................................................................................................

........................................................................................................................

........................................................................................................................

............................................................

............................................................

............................................................

दिनांक : ..............................

(ग) स्वविद्यालयस्य वर्णनं कुर्वन् मित्रं प्रति पत्रम्

रामाकृष्णपुरम् सैक्टर-2

89/5 सोमविहारः नव दिल्ली

19.7.99

प्रिय वयस्य श्रीनिवास,

नमस्ते!

पितुः स्थानान्तरणवशात् वयं सकुटुम्बाः सकुशलं दिल्लीं प्राप्ताः। मया अत्र एकस्मिन् प्रख्याते विविधशैक्षिक-उपकरण सम्पन्ने 'नवजीवन' इति नाम्नि विद्यालये प्रवेशः लब्धः। प्रवेशं प्राप्य च भृशं प्रसन्नः अस्मि।

यद्यपि अत्र आंग्लभाषामाध्यमेन शिक्षा प्रदीयते तथापि संस्कृतपठनपाठनस्य विशिष्टा व्यवस्था वर्तते। 27 एकड़ भूमौ निर्मिते अस्मिन् विद्यालयभवने त्रयः विभागाः सन्ति–प्राथमिकः, माध्यमिकः, वरिष्ठमाध्यमिकः च।

अस्य विद्यालयस्य प्रमुखानि आकर्षणानि सन्ति–विशालानि क्रीडाक्षेत्राणि, निर्मलजलोपेतं तरणतालम्, विविधकला-कौशल-प्रशिक्षणार्थं कार्यशालाः विज्ञानप्रयोगशालाः समृद्धाः संगणकप्रयोगशालाः, व्यायामशाला, बृहत्पुस्तकालयः इत्यादयः।

एषः सहशिक्षाविद्यालयः। प्रधानाचार्यः अतीव विनम्रः परिश्रमी, कर्मठः सद्व्यवहारशीलः च अस्ति। शिक्षकाः शिक्षिकाः च अतीव सुयोग्याः शिक्षणप्रवीणाः च सन्ति।

विद्यार्थिनः सुसभ्याः अनुशासनप्रियाः परिश्रमिणः च वर्तन्ते। प्रतिवर्षं दशम-द्वादशकक्षयोः परीक्षापरिणामः शतप्रतिशतं भवति।

नान्यः विशेषः। स्वाध्यायविषये विस्तरेण पत्रं लिखतु। स्वगृहे सर्वेभ्यः मम वन्दनं निवेदयतु।

तव अभिन्नं मित्रम्,

क, ख, ग

सेवायाम् ............

द्वारा श्रीनिवासः

डॉ॰ राघवेन्द्रः

56 त्यागराजनगरम्

चेन्नई ☐☐☐☐☐☐

**(ग) 1. विद्यालयस्य वार्षिकोत्सवं वर्णयन् सखीं प्रति पत्रं लिखत।**

..........................

..........................

......... ........... .........

..........................

..........................................................................

..........................................................................

..........................................................................

..........................................................................

..........................................................................

..........................................................................

..........................................................................

..........................................................................

..........................................................................

.................. .................. ..................

..........................

..........................

..........................

..........................

..........................

(घ) **पर्वतीयं-स्थलस्य भ्रमणार्थं गतायाः सुतायाः मातरं प्रति पत्रम्**

77 बादामी-उद्यानम्

श्रीनगरम्,

जम्मू-काश्मीर-राज्यम्

7-9-99

श्रद्धेये मातृचरणे,

सादरं प्रणामाः।

भवत्याः आशीर्वादैः परह्यः सर्वे वयं जम्मूतः बसयानेन सकुशलं समागताः। यथाश्रुतं श्रीनगरं नूनं वसुन्धरायां नन्दनवनमिव विभाति।

जम्मूतः श्रीनगरस्य सम्पूर्णः मार्गः अतीव रमणीयः। ऊधमपुरतः ऊर्ध्वम् आरोहणं प्रारभते। मार्गे 'कुद्द' इति नामकं स्थानं अतीव रम्यं वर्तते। तत्रत्यम् च जलं पातुं दूरादपि जनाः आगच्छन्ति, स्वस्थाः च भवन्ति। ततः किंचिद्दूरे एकं 'पत्नीटाप' नामकम् उच्चतमं शिखरस्थं पर्यटनस्थलं यात्रिजनान् आकर्षयतीव।

श्रीनगरे अस्माकं वासः लालचौकस्य समीपे एकस्मिन् यात्रिनिवासे अस्ति।

अत्र शालीमार-चश्माशाही-निशातबाग-हारवन-नामधेयानि कृत्रिमनिर्झरसंवलितानि नाना-कुसुम-शबलानि च चत्वारि उद्यानानि काश्मीरम् अपरं देवलोकं कुर्वन्ति। काश्मीरस्य मध्ये 'डललेक' विद्यते यत्र जलपोतसमानाः सर्वसुविधापूर्णाः गृहनौकाः ('हाउस-बोट') पर्यटकेभ्यः गृहनिवासानन्दं यच्छन्ति।

नवनववस्त्रैः सुसज्जिताः 'शिकारा' इति नाम्न्यः लघुनौकाः नववधू-समानाः सन्ति यत्र यात्रिणः जलविहारस्य आमोदम् अनुभवन्ति। डललेकम् उभयतः विशालानि विपणनकेन्द्राणि विद्यन्ते। 'चारचिनार' नामकम् एकं कृत्रिमं पिकनिकस्थलं डललेकस्य मध्ये वर्तते। समीपे एव नेहरू-उद्यानमपि पर्यटकानां महत् आकर्षणकेन्द्रम्। दुर्गानाग-नामकात् निर्झरात् आरम्य 350 फुट-उपरि शंकराचार्यमन्दिरं काश्मीरं स्वयं गत्वा एव दर्शनीयम्। शेषं भ्रमणानन्तरं विस्तरेण लेखिष्ये।

पितृचरणयोः मे प्रणामाः कथनीयाः।

भवत्याः स्नेहमयी पुत्री

क, ख, ग

(घ) **1. पितरं प्रति पत्रं लिखत। यस्मिन् ग्रामस्य/नगरस्य/पर्वतीयस्थलस्य यात्रायाः वर्णनम् भवेत्।**

..............................

..............................

..............................

..............................

.........................,

..........................................................................................

..........................................................................................

..........................................................................................

..............................

..............................

..............................

..............................

( ङ ) पुस्तकप्रेषणविषये प्रकाशकं प्रति पत्रम्

सेवायाम्/प्रतिष्ठयाम्

श्रीमतां प्रबन्धकमहोदयनाम्

श्री अक्षर - प्रकाशन-संस्था

महात्मागान्धी-मार्गः

मुम्बई (महाराष्ट्रम्)

मान्याः,

अहं नवमकक्षायाः छात्रः अस्मि। भवद्भिः सद्यः प्रकाशितानि नवमकक्षायाः पाठ्यपुस्तकानि मया पुस्तकालये दृष्टानि। तेषु अहं कानिचित् क्रेतुम् इच्छामि। अधोलिखितानि पाठ्यपुस्तकानि वी.पी.पी. द्वारा शीघ्रं प्रेषणीयानि–

1. सरलसंस्कृतव्याकरणम्-रचनापद्धतिः
2. मणिका
3. निबन्ध-प्रकाशः
4. संस्कृत-अभ्यास-पुस्तिका

एभिः पुस्तकैः सह अन्यसन्दर्भग्रन्थसूची अपि यदि प्रेष्यते तर्हि आत्मानम् अनुगृहीतं मन्ये।

सधन्यवादम्

भवतां विश्वासपात्रम्,

श्रीनाथघोषः

173 नीलिगिरिः अलकनन्दा

दिल्ली–110019

**( ङ ) 1. दूरभाषयन्त्रस्य निष्क्रियतां दूरीकर्तुं दूरभाषकेन्द्रस्य कर्मकराणां उदासीनताम् अधिकृत्य दैनिकसमाचारपत्रस्य सम्पादकं प्रति पत्रम् लिखत।**

**सकाशात्**

..............................

..............................

**सेवायाम्**

..............................

..............................

..............................

..............................

विषयः – ..................................................................

मान्यवर, ..................................................................................................................

..................................................................................................................................

भवदीयः

..............................

..............................

..............................

..............................

**अस्माभिः अधीतम्**

पत्रस्य निम्नलिखितानि षड् अङ्गानि भवन्ति–

(अ) शीर्षकः

(ब) सम्बोधनम् / कुशलसमाचारः

(स) प्रतिपाद्यविषयः

(द) समाप्तिः

(इ) हस्ताक्षरम्

(ई) पत्र-सङ्केतः (पत्रं स्वीकर्तुः पत्रं प्रेषयितुः च)

**(अ) शीर्षकः**

(I) प्रारम्भे यस्मात् स्थानात् पत्रं लिख्यते तस्य स्थानस्य नाम/संकेतश्च निर्दिश्यते।

(II) स्थाननाम्नः अधः तस्य दिनस्य तिथिः दिनांकः वा लिख्यते।

**(आ) संबोधनम्/कुशलसमाचारः**

वैयक्तिपत्रेषु विविधानि संबोधनानि भवन्ति यथा, मान्ये! पूज्ये! प्रियबन्धो! प्रियसखि। नमस्कारः आशीर्वादः च (गुरुजनेभ्यः नमस्कारः, कनिष्ठेभ्यः आशीर्वादः)

संबोधनान्तरं वैयक्तिकपत्रेषु कुशलनिवेदनं कुशलप्रश्न लेखनीयम्।

(इ) पत्रस्य प्रतिपाद्यविषयः विस्तरेण लेखनीयः।

(ई) **समाप्तिः** पत्रस्य विषयप्रतिपादनानन्तरं वैयक्तिपत्रेषु नमस्कारनिवेदनादिकं भवति। अन्ते 'इति' शब्दोत्तरलेखितुः स्वीकर्तुः च सम्बन्धम् अवलम्ब्य एकं पदं पदद्वयं वा भवति यथा इति भवदीयः/त्वदीयः विश्वासी आदि।

- तदनन्तरं लेखकः स्वस्य हस्ताक्षरं करोति।
- वाणिज्यपत्रेषु कार्यालयीनपत्रेषु च लेखकस्य हस्ताक्षरोपरान्तं स्वस्य पदनाम, संकेतः निर्देशः च क्रियते।

## अभिनन्दनपत्रम्/वर्धापनपत्रम्/निमन्त्रणपत्रम्

अद्यत्वे प्रायः नूतनवर्षस्य शुभारम्भे, दीपावलि-होलिकादि-उत्सवार्थम्, मित्राणां जन्मदिवसे शुभाकाङ्क्षापत्राणि अभिनन्दनपत्राणि च प्रेष्यन्ते। अन्तःपृष्ठे च शुभकामनासन्देशाः लिख्यन्ते। एतेषां निर्माणे पर्याप्तः अवसरः मौलिक-प्रतिभायाः प्रदर्शनार्थं लभ्यते। उपरिपृष्ठस्य सज्जायां कलाप्रदर्शनार्थं भवति। अन्तःपृष्ठे स्वकीय-मनोभावनानुसारम् अथवा काश्चन सूक्तयः अपि लिख्यन्ते। प्रायः तत्र विशिष्टाः औपचारिकताः न सन्ति। अधः प्रेषकस्य नाम एव लिख्यते–

यथा–

## वर्धापनपत्रम्




वसन्ति हि गुणाः
प्रेम्णि न वस्तुनि

स्वस्थः निरामयः च भूत्वा
शतं वर्षाणि यशः कीर्तिं
च लभस्व।
कोटिशः वर्धापनानि

प्रेषकः

.................................................................

.................................................................

## वर्धापनपत्रम्

सर्वे सन्तु निरामयाः
भवतां .............. पावने जन्मदिने
कोटिशः वर्धापनानि

## वर्धापनपत्रम्

प्रियमित्र,

दशमकक्षायां शोभनाङ्कैः समुत्तीर्णाय
भवते हार्दिकानि वर्धापनानि

प्रेषक :

.................................................................

.................................................................

दूरभाष : .................................................................

## निमन्त्रणपत्रम्

(जीवेम शरदः शतम्)

कार्यक्रमः

दिनाङ्कः ...................... चिरञ्जीवस्य ...................... षोडशे जन्म-दिवससमारोहे श्रीमन्तः सादरं सस्नेहं च आमन्त्रिताः सन्ति।

समयः ...................... अस्मिन् अवसरे समुपस्थाय शुभाशिषः प्रदानेन अनुगृह्णन्तु।

स्थानम् ......................

दर्शनोत्सुकाः

..............................

दूरभाष : ..................

## निमन्त्रणपत्रम्

**नमो भगवते।**

मान्याः,

श्रीमती एवं श्री .................. आत्मजस्य, मम अनुजस्य

**कार्यक्रमः** चि० ...................... **उपनयन-यज्ञोपवीत-संस्कारस्य**

**दिनाङ्कः** ...................... **पावनावसरे सकुटुम्बं भवताम् उपस्थितिः सम्प्रार्थ्यते।**

**समयः** ...................... **भवदागमनस्य प्रतीक्षायाम्–**

**स्थानम्** ......................

**आमन्त्रकः**

......................................

**भवनसङ्ख्या** ..............................

**उपनगरम्** ..............................

**नगरम्** ..............................

**दूरभाषः** ..............................

## अभिनन्दनपत्रम्

*सेवायाम्/प्रतिष्ठायाम्*

*नववर्षं सुखदं, मंगलमयं,*
*सौभाग्यकरं च भूयात्।*

प्रेषकः

......................



## अभिनन्दनपत्रम्

ज्योतिर्विहगो विहरतु गगने

दीपमालिका

सौभाग्यदायिनी

मङ्गलकारिणी

सुखदायिनी

समृद्धिकारिणी

भूयात्

प्रेषकः

........................

## शुभाशंसा/शुभकामना

*शरीरमाद्यं खलु धर्मसाधनम्*

श्रुतं मया, रुग्णो भवान्।

भागवतः

अनुग्रहेण शीघ्रं स्वास्थ्यलाभं करोतु भवान्।

शुभैषी

......................




## अभ्यासार्थं पत्राणि

1. **भवत्याः नाम रम्या अस्ति। भवती स्व विद्यालयस्य प्रधानाचार्याय शुल्क-क्षमा-विषयक-प्रार्थनापत्रम् लेखितुम् इच्छति। अतः मञ्जूषायाः सहायतया इदं पत्रं उत्तरपुस्तिकायां पुनर्लिखतुभवती।**

(आपका नाम रम्या है। आप अपने विद्यालय के प्राचार्य को शुल्क की क्षमा हेतु प्रार्थना-पत्र लिखना चाहती हैं। इस हेतु मञ्जूषा की सहायता से यह पत्र उत्तर-पुस्तिका में फिर से लिखिए। Your name is Ramya. You want to write an application to your principal for the remission of fee. Write this letter in your answer-book with the help of the box.)

सेवायाम्,

श्रीमन्तः प्रधानाचार्याः,

(*i*) ................................,

जयपुरम्।

(*ii*) ................................,

सविनयं निवेदनम् अस्ति यत् मम (*iii*)........................ प्राथमिकपाठशालायाम् (*iv*)........................ कार्यं करोति। तस्य (*v*)............... वेतनं एक (*vi*)............... रुप्यकाणां रुपे अस्ति। एतस्मिन् परिमिते आये परिवारस्य निर्वाहः (*vii*)............ प्रकारेण क्रियते। (*viii*)......... प्रदानं तु कदापि न सम्भवति। अतः मम प्रार्थना अस्ति यत् शुल्कमुक्तिं प्रदाय माम् अनुगृह्णन्तु अत्र भवन्तः।

दिनाङ्कः 5.11.20...

(*ix*)............... शिष्या,

(*x*)...............

**मञ्जूषा**—लेखहारकस्य, रम्या, येन केन, रा०व०मा० विद्यालयः, भवतां, पितृमहाभागः, शुल्कस्य, मासिकं, सहस्रं, मान्यवर!

**2. विद्यालयात् दिनद्वयावकाशार्थं प्रार्थनापत्रम् दातुं भवान् कृष्णः इच्छति। एतदर्थं मञ्जूषायाः समुचितैः पदैः रिक्तस्थानानि पूरयन् इदं पत्रं पुनर्लिखत।**

(आप कृष्ण हैं, विद्यालय से दो दिन के अवकाश (छुट्टी) के लिए प्रार्थना-पत्र देना चाहते हैं। इसके लिए मञ्जूषा से उचित पदों के द्वारा रिक्त स्थानों को भरते हुए यह पत्र फिर से लिखिए। You are Krishna and wants to give an application for two day leave from your school. Write again this letter in your answer book after filling the blanks with suitable words from the box.)

सेवायाम्,

श्रीमन् मुख्याध्यापक (*i*)..........,

क०ख०ग० विद्यालयः,

(*ii*).......... ।

मान्यवराः,

सविनयं निवेद्यते यत् (*iii*).......... मासस्य पञ्चमे दिनाङ्के मम भगिन्याः विवाहः (*iv*).......... सम्पत्स्यते। विवाहतिथेः एकदिनस्य पूर्वमेव मया तत्र प्राप्तव्यम्। अतः (*v*).......... अवकाशं प्रदाय (*vi*).......... भवान् इति मदीया (*vii*).......... ।

दिनाङ्कः 11.11.20...

(*viii*).......... शिष्यः,

(*ix*)..........

कक्षा (*x*)..........

**मञ्जूषा**—आगामी, फरीदाबादे, महोदय, अनुगृह्णातु, कृष्णः, प्रार्थना, नवमी, दिनद्वयस्य, कर्णपुरम्, भवदीयः।

**3. भवान् वाराणस्यां स्थितः उमेशः अस्ति। भवतः मित्रं सोमेन्द्रः प्रयागे वसति। स नवमकक्षायां प्रथमश्रेण्याम् उत्तीर्णः। मञ्जूषायाः सहायतया तं प्रति वर्धापन-पत्रं लिखत।**

(आप वाराणसी में रहने वाले उमेश हैं। आपका मित्र सोमेन्द्र प्रयाग में रहता है, वह कक्षा नवमी में प्रथम श्रेणी में पास हुआ है। मञ्जूषा की सहायता से उसे बधाई-पत्र लिखिए। You are Umesh and lives in Varanasi. Your friend Somendra lives in Prayag who got first division in class IXth examination. Write a letter of congratulation to him with the help of the box.)

लक्ष्मीनारायण संस्कृतविद्यालयः,

(*i*).......... ।

दिनाङ्कः 2.2.20...

प्रिय मित्र (*ii*)..........,

नमस्ते। अत्र कुशलं (*iii*).......... । भवतः पत्रं पठित्वा ज्ञातं यत् भवान् (*iv*).......... प्रथमं स्थानं प्राप्तवान्। इदं (*v*).......... मम चित्तं प्रफुल्लितं जातम् (*vi*).......... एतत् सर्वं तव सततपरिश्रमस्य एव फलम् अस्ति। मम गृहस्य सर्वेषाम् (*vii*).......... पक्षतः भवते वर्धापनानि। भवान् उत्तरोत्तरं सफलतां प्राप्नोतु एषा अस्माकं शुभकामना। मातृपितृचरणेषु (*viii*).......... प्रणामाः। (*ix*).......... स्नेहराशिः।

भवतः (*x*)..........,

उमेशः

**मञ्जूषा**—वाराणसीतः, मित्रवर्य!, तत्रास्तु, सुहृद्, मम, ज्ञात्वा, परीक्षायाम्, सदस्यानाम्, अनुजाय, सोमेन्द्र।

4. **भवत्याः नाम लतिका। भवती 'सुरवाणीसन्देशः' इति पत्रिकां पठति। ग्राहकशुल्के समाप्ते सति अग्रिमवर्षार्थं शुल्कप्रेषणाय अत्र लिखिते पत्रे रिक्तस्थानपूर्तिः क्रियताम्। सहायतार्थे शब्दाः मञ्जूषायां प्रदत्ताः**

| पुरुषः + अपि = पुरुषोऽपि | रामः + अत्र = रामोऽत्र | रामः + अब्रवीत् = रामोऽब्रवीत् |
| सः + अपि = सोऽपि | शिवः + अर्च्यः = शिवोऽर्च्यः | कः + अत्र = कोऽत्र |
| नरः + अस्ति = नरोऽस्ति | सः + अहम् = सोऽहम् | कः + अवदत् = कोऽवदत् |
| देवः + अयम् = देवोऽयम् | रामः + अवदत् = रामोऽवदत् | नृपः + अगच्छत् = नृपोऽगच्छत् |
| पुरुषः + अहम् = पुरुषोऽहम् | | |

**2. विसर्ग का 'उ'—** *(हशि च, पा०अ० 6/1/110)*

**यदि विसर्ग के पहले 'अ' हो और उसके बाद हश् वर्ण अर्थात् किसी भी वर्ग का तीसरा, चौथा, पाँचवाँ वर्ण अथवा य्, र्, ल्, व्, ह् में से कोई वर्ण हो तो विसर्ग का 'उ' हो जाता है और 'अ + उ' मिलकर गुण सन्धि से 'ओ' हो जाता है; जैसे—**

| | | |
|---|---|---|
| छात्रः + हसति = छात्रो हसति | मृगः + धावति = मृगो धावति | देवः + गच्छति = देवो गच्छति |
| सः + रोचते = सो रोचते | मनः + रथः = मनोरथः | रामः + मन्यते = रामो मन्यते |
| यशः + गानम् = यशोगानम् | कः + बुध्यते = को बुध्यते | मनः + हरः = मनोहरः |
| कृष्णः + धन्यः = कृष्णो धन्यः | मनः + जवम् = मनोजवम् | कृपणः + ददाति = कृपणो ददाति |
| मनः + गतम् = मनोगतम् | छात्रः + नयति = छात्रो नयति | शिवः + वन्द्यः = शिवो वन्द्यः |
| रामः + दोग्धि = रामो दोग्धि | रामः + वेत्ति = रामो वेत्ति | नृपः + यजते = नृपो यजते |
| रामः + घोषति = रामो घोषति | सः + भाति = सो भाति | सः + हृष्यति = सो हृष्यति |
| अश्वः + घोषति = अश्वो घोषति | कः + गच्छति = को गच्छति | बलः + घोष्यते = बलो घोष्यते |
| अर्जुनः + जयति = अर्जुनो जयति | हरिद्वारः + लसति = हरिद्वारो लसति | रामः + वदति = रामो वदति |

## ( ग ) रत्व ( रुत्व ) विसर्ग सन्धि

**विसर्ग का 'र्'** *( ससजुषो रुः, पा०अ० 8/2/66)*

**विसर्ग से पहले अ, आ को छोड़कर अन्य कोई भी स्वर हो और उसके बाद कोई स्वर हो या घोष ( वर्गों का तीसरा, चौथा, पाँचवाँ ) वर्ण हो या य्, र्, ल्, व्, ह् में से कोई वर्ण हो तो विसर्ग को 'र्' हो जाता है; जैसे—**

| | |
|---|---|
| निः + बलः = निर्बलः | वह्निः + ज्वलति = वह्निर्ज्वलति |
| मुनिः + याति = मुनिर्याति | शिशुः + हसति = शिशुर्हसति |
| कविः + यच्छति = कविर्यच्छति | साधुः + गच्छति = साधुर्गच्छति |
| कविः + इच्छति = कविरिच्छति | हरेः + इदम् = हरेरिदम् |
| रविः + उदेति = रविरुदेति | गौः + अयम् = गौरयम् |
| मुनिः + अयम् = मुनिरयम् | देवीः + उवाच = देवीरुवाच |
| भानोः + इदम् = भानोरिदम् | वधूः + आयाति = वधूरायाति |
| कैः + उक्तम् = कैरुक्तम् | पितुः + इच्छा = पितुरिच्छा |

## ( घ ) विसर्ग लोप सन्धि

**1. विसर्ग का लोप—** *( एतत्तदोः सुलोपोऽकोरनञ्समासे हलि, पा०अ० 6/1/128)*

**यदि सः और एषः शब्द के परे 'अ' को छोड़कर कोई अन्य स्वर या व्यञ्जन हो तो 'सः' और 'एषः' शब्द के विसर्ग का लोप हो जाता है; जैसे—**

सः + एति = स एति    सः + गच्छति = स गच्छति    सः + पठति = स पठति

एषः + चलति = एष चलति    एषः + जयति = एष जयति    एषः + याति = एष याति

एषः + विष्णुः = एष विष्णुः    एषः + एति = एष एति

**2. विसर्ग का लोप—**

**यदि विसर्ग के पहले 'अ' हो और उसके बाद 'अ' से भिन्न कोई अन्य स्वर हो तो विसर्ग का लोप हो जाता है; जैसे—**

अर्जुनः + उवाच = अर्जुन उवाच    सूर्यः + उदेति = सूर्य उदेति    अर्जुनः + आगच्छति = अर्जुन आगच्छति

बालः + इच्छति = बाल इच्छति    अतः + एव = अतएव    बालः + आगतः = बाल आगतः

**3. विसर्ग का लोप—**

**विसर्ग के पहले 'आ' होने पर और उसके बाद कोई स्वर हो या वर्गों का तीसरा, चौथा, पाँचवाँ वर्ण हो या य्, र्, ल्, व्, ह् वर्णों में से कोई वर्ण हो तो वहाँ विसर्ग का तो लोप होगा ही, साथ ही यदि कोई सन्धि हो तो अथवा सन्धि न भी हो; जैसे—**

| | | |
|---|---|---|
| देवाः + जयन्ति = देवा जयन्ति | देवाः + गच्छन्ति = देवा गच्छन्ति | शिष्याः + एते = शिष्या एते |
| पुरुषाः + हसन्ति = पुरुषा हसन्ति | देवाः + अत्र = देवा अत्र | छात्राः + धावन्ति = छात्रा धावन्ति |
| नृपाः + अत्र = नृपा अत्र | छात्राः + नमन्ति = छात्रा नमन्ति | नराः + आयान्ति = नरा आयान्ति |
| पुरुषाः + यान्ति = पुरुषा यान्ति | अश्वाः + इमे = अश्वा इमे | नृपाः + जयन्ति = नृपा जयन्ति |
| जनाः + आयान्ति = जना आयान्ति | नराः + आगच्छन्ति = नरा आगच्छन्ति | बालाः + उपयान्ति = बाला उपयान्ति |
| सुमनाः + ऋच्छति = सुमना ऋच्छति | देवाः + लभन्ते = देवा लभन्ते | सुमनाः + यजन्ते = सुमना यजन्ते |
| वाताः + वान्ति = वाता वान्ति | सुमनाः + जयति = सुमना जयति | जनाः + इच्छन्ति = जना इच्छन्ति |
| सुमनाः + रोचते = सुमना रोचते | देवाः + इह = देवा इह | सुमनाः + घोषन्ति = सुमना घोषन्ति |
| सुमनाः + अस्ति = सुमना अस्ति | सुमनाः + ददति = सुमना ददति | सुमनाः + आसन् = सुमना आसन् |
| सुमनाः + धन्याः = सुमना धन्याः | सुमनाः + इच्छन्ति = सुमना इच्छन्ति | सुमनाः + नयन्ति = सुमना नयन्ति |

## अभ्यासः

**I. निम्नलिखितानां पदानाम् उचितं विच्छेदं कृत्वा लिखत।**

(निम्नलिखित पदों का उचित विच्छेद करके लिखिए। Separate of the following words.)

1. शिशुर्हसति    2. सोऽहसत्    3. छात्रा आगताः    4. रामो गच्छति

5. बालोऽवदत्    6. सोऽवसत्    7. कृष्णोऽपि    8. सिंहो गर्जति

9. देवोऽपि    10. शरीरस्थो महान्

**II. निम्नलिखितानां विच्छेदपदानाम् उचितं सन्धियुक्तं पदं चित्वा लिखतः।**

(निम्नलिखित विच्छेद पदों के उचित सन्धियुक्त पदों को चुनकर लिखिए।)

(Choose the right joined word from the following words.)

सः + अवसत्

(क) सोऽवसत् (ख) सोवसत् (ग) सोअवसत् (घ) सःअवदत्

एषः + नमति

(क) एष नमति (ख) एषो नमति (ग) एषःनमति (घ) एष णमति

सः + अपतत्

(क) सोपतत् (ख) सअपतत् (ग) सोऽपतत् (घ) सोऽपतत

एषः + अतीव

(क) एषोतीव (ख) एषोऽतीव (ग) एषातीव (घ) एषःतीव

बालः + उत्तिष्ठति

(क) बालो उत्तिष्ठति (ख) बाल उत्तिष्ठति (ग) बालरुत्तिष्ठति (घ) बालसुत्तिष्ठति

रामः + अस्ति

(क) रामोऽस्ति (ख) रामअस्ति (ग) रामरास्ति (घ) राममस्ति

पुरुषः + अपि

(क) पुरुषोऽपि (ख) पुरुषःअपि (ग) पुरुषरपि (घ) पुरुषोपि

चन्द्रः + अयम्

(क) चन्द्रोऽयम् (ख) चन्द्रःअयम् (ग) चन्द्ररयम् (घ) चन्द्रयम्

तरुणः + नमति

(क) तरुणोनमति (ख) तरुणनमति (ग) तरुणःनमति (घ) तरुणणमति

कः + अपि

(क) कोऽपि (ख) कअपि (ग) कोपि (घ) कःअपि

गोपालाः + हसन्ति

(क) गोपालोहसन्ति (ख) गोपालाहसन्ति (ग) गोपालाःहसन्ति (घ) गोपालहसन्ति

पुनः + अत्र

(क) पुनरत्र (ख) पुनत्र (ग) पुनररत्र (घ) पुनऽत्र

भक्तः + सेवते

(क) भक्तसेवते (ख) भक्तस्सेवते (ग) भक्तर्सेवते (घ) भक्तःसेवते

मृगः + इति

(क) मगृरिति (ख) मृगइति (ग) मृगःइति (घ) मृगसिति

शावकः + चलति

(क) शावकःचलति (ख) शावकश्चलति (ग) शावको चलति (घ) शावक चलति

पुनः + आस्ते

(क) पुनरासते (ख) पुनः आस्ते (ग) पुनरास्ते (घ) पुनरस्ते

## मिश्रिताभ्यासः

**1. अधोलिखितानां पदानां सन्धिच्छेदम् अथवा सन्धिं दत्तेषु पदेषु उचितं पदं चित्वा लिखत।**

(नीचे लिखे पदों के सन्धिविच्छेद अथवा सन्धि को दिए गए पदों में से उचित पद को चुनकर लिखिए।)

(Choose right after separating or joining from the following words.)

1. **अद्य + अवकाशः** ______ अस्ति।
   (क) अद्यवकाशः (ख) अद्यावकाशः (ग) अद्यवाकाशः (घ) अद्यअवकाशः
2. **अहम् + वाटिकां** ______ गमिष्यामि।
   (क) अहम्वाटिकां (ख) अहन्वाटिकां (ग) अहंवाटिकां (घ) अहमवाटिकां
3. अन्ये **छात्राः + अपि** ______ तत्र गमिष्यन्ति।
   (क) छात्राअपि (ख) छात्रारपि (ग) छात्राःअपि (घ) छात्रोअपि
4. **वाक् + ईशः** ______ मम मित्रम् अस्ति।
   (क) वाकीशः (ख) वागीशः (ग) वाक्ईशः (घ) वाजीशः
5. **सः + अपि** ______ मया सह गमिष्यति।
   (क) सअपि (ख) सोअपि (ग) सःअपि (घ) सोऽपि
6. तत्र **वन + उत्सवः** ______ अपि मान्यते।
   (क) वनोत्सवः (ख) वनुत्सवः (ग) वनूत्सवः (घ) वनउत्सवः
7. **अद्यावकाशः** ______ अस्ति।
   (क) अद्या + वकाशः (ख) अद्या + अवकाशः (ग) अद्य + अवकाशः (घ) अद्य + आवकाशः
8. **अहम् + वाटिकां** ______ पुनः गमिष्यामि।
   (क) अहंवाटिकां (ख) अहम्वाटिकां (ग) अहन्वाटिकां (घ) अहोवाटिकां
9. **तत्र + एव** ______ मम मित्रम् आगमिष्यति।
   (क) तत्रैव (ख) तत्रेव (ग) तत्रएव (घ) तत्राएव
10. अहो! तत्र क्रीडितुम् **भानुरपि** ______ ।
   (क) भानू + रपि (ख) भानु + रपि (ग) भानुः + अपि (घ) भानोः + अपि

**2. अधोलिखितेषु स्थूलपदेषु सन्धिच्छेदम् अथवा सन्धिं अधोदत्तैः पदैः चित्वा लिखत।**

(नीचे लिखे स्थूल शब्दों में सन्धिविच्छेद अथवा सन्धि नीचे दिए गए पदों से चुनकर लिखिए।)

(Choose the right join or separate bold words from the following words.)

(*i*) लता — सुमुधे! **नमः + ते।**
   (क) नमस्ते (ख) नमःतु (ग) नमश्ते (घ) नमष्ते

(*ii*) सुमुधा — लते! पश्य, **सूर्य + उदयः** भवति।
   (क) सूर्योदयः (ख) सूर्येदयः (ग) सूमूदयः (घ) सूर्यउदयः

(*iii*) लता — सुमुधे! अधुना **वागीशः** विद्यालयम् गच्छति।
   (क) वाग + ईशः (ख) वाक् + ईशः (ग) वाक + ईशः (घ) वाग् + ईशः

(*iv*) अहम् **वनोत्सवं** द्रष्टुं गच्छामि।
   (क) वन + ओत्सवं (ख) वन + औत्सवं (ग) वन + उत्सवं (घ) वना + उत्सवं

(*v*) त्वमपि **देवालयम्** गच्छ।

(क) देवा + अलयमं (ख) देव + अलयम् (ग) देव + आलयम् (घ) देवा + आलयम्

**3. अधोलिखितानि वाक्यानि अधोलिखितैः सन्धियुक्त पदैः पूरयत।**

(नीचे लिखे वाक्यों को निम्नलिखित सन्धियुक्त शब्दों से पूरा कीजिए।)

(Complete the following sentences with the following conjunct words.)

(*i*) (अद्य + अवकाशः) .................... अस्ति।

(क) अद्यावकाशः (ख) अद्यवकाशः (ग) अद्यवाकाशः (घ) आद्यवाकाशः

(*ii*) सः राष्ट्रपतेः (भो + अनम्) ................ द्रष्टुम् गमिष्यति।

(क) भावनम् (ख) भवनम् (ग) भवनाम् (घ) भोवनम्

(*iii*) तेन सह (जगत् + ईशः) .................... अपि अस्ति।

(क) जगतीशः (ख) जगतेशः (ग) जग्दीशः (घ) जगदीशः

(*iv*) तत्र स्वमित्रम् दृष्ट्वा रामः अहसत् (अवदत् + च) ..........।

(क) अवदच्च (ख) अवदन्च (ग) अवदत्त (घ) अवदतत

(*v*) त्वाम् अत्र प्राप्य अहम् अतीव (प्रसन्नः + अस्मि) ..........।

(क) प्रसन्नःअस्मि (ख) प्रसन्नःस्मि (ग) प्रसन्नोअस्मि (घ) प्रसन्नोऽस्मि

**4. अधोलिखितम् अनुच्छेदं पठित्वा स्थूलपदेषु सन्धिविच्छेदं संधिं वा कुरुत।**

(नीचे लिखे अनुच्छेद को पढ़कर स्थूल पदों में सन्धि विच्छेद अथवा सन्धि कीजिए।)

(Separate or join the bold words after reading the paragraph.)

अम्ब! **अद्याहम्** (*i*) [ ] मित्रेण सह शुक्रतालम् गतवान्। तत्र **गङ्गायाः + तटे**। (*ii*) [ ] एकः प्राचीनः विशालः वटः + अस्ति। **तरुच्छाया** (*iii*) [ ] सुघना **तत्र + एव** (*iv*) [ ] कश्चन महातपस्वी वसति। तस्य **मुखात् + अमृतं** (*v*) [ ] वचः श्रोतुं जनाः आगच्छन्ति।

**5. प्रतिवाक्यम् स्थूलपदयोः सन्धिं कृत्वा रिक्तस्थाने लिखत।**

(प्रत्येक वाक्य के स्थूलपदों में सन्धि करके खाली स्थान पर लिखिए।)

(Separate the bold conjunct words in each sentence and write them in the blank space.)

(*i*) **सहसा + एव** [ ] वृष्टिः आगता।

(*ii*) गुरुम् दृष्ट्वा कृष्णः **उत् + लसितः** [ ] जातः।

(*iii*) सुधे! कथं त्वं **विलम्बात् + आगता**। [ ]

(*iv*) **सः + अपि** [ ] मम मित्रम् अस्ति।

(*v*) रामस्य हृदयं **निः + छलम्** [ ] अस्ति।

**6. अधोलिखितेषु स्थूलपदेषु संधिच्छेदम् अथवा सन्धिं कृत्वा लिखत।**

(नीचे लिखे स्थूल शब्दों में सन्धि-विच्छेद अथवा सन्धि करके दिए गए स्थान पर लिखिए।)

(Separate or join the following bold words and write them in the blank spaces.)

(क) रमा – सुमेधे, **नमः+ते**। (*i*) .................... (ग) रमा – सुमेधे! अधुना **वागीशः** विद्यालयं गच्छति। (*iii*) ....................

(ख) सुमेधा – लते! पश्य, **सूर्य + उदयः** भवति। (*ii*) .................... (घ) सः दयालुः **चास्ति**। (*iv*) ....................

**7. स्थूलपदानाम् सन्धिच्छेदं कुरुत।**

(स्थूल शब्दों में सन्धि विच्छेद कीजिए।)

(Separate the following with sufficient words.)

(*i*) **अद्यावकाशः** अस्ति।

(*ii*) **भानुरपि** गृहादागतः।

(*iii*) **अहम् + वाटिकायाम्** गमिष्यामि।

(*iv*) तेन सह **श्यामः + अपि** अस्ति।

(*v*) **तत्र + एव** मम मित्रम् आगमिष्यति।

**8. स्थूलपदयोः सन्धिं कृत्वा रिक्तस्थानं पूरयत।**

(स्थूल पदों में सन्धि करके रिक्त स्थान पूर्ण कीजिए।)

(Fill in the blank spaces after joining the bold words.)

(*i*) इदं वाक्यं रामायणे **उत् + लिखितम्** [ ]।

(*ii*) स्वप्रजाम् दृष्ट्वा **नृपः + अतीव** [ ] प्रसन्नः अभवत्।

(*iii*) बालकः उद्याने **इतः + ततः** [ ] पश्यति।

(*iv*) जननी जन्मभूमि **स्वर्गात् + अपि** [ ] गरीयसी।

(*v*) श्रीरामः **पुरुष + उत्तमः** [ ] अस्ति।

(*vi*) **गण + ईशः** [ ] लम्बोदरः अपि कथ्यते।

**9. अधोलिखितेषु कोष्ठान्तर्गतेषु शब्देषु सन्धिविच्छेदं सन्धिं वा अधःदत्तानाम् पदानां सहायतया चित्वा लिखत।**

(नीचे लिखे कोष्ठक वाले शब्दों में सन्धि विच्छेद अथवा सन्धि नीचे दिए गए पदों की सहायता से चुनकर लिखिए।)

(Choose the following words given in the brackets after separating or joining them from the following words.)

(*i*) (हिम + आलयः) .................... अस्माकं देशस्य प्रहरी अस्ति।

(क) हिमालायः (ख) हिमलायः (ग) हिमालय (घ) हिमालयः

(*ii*) विवेकः (अद्यैव) अद्य + .................... उद्यानं गमिष्यति।

(क) ऐव (ख) एव (ग) ईव (घ) इव

(*iii*) (नीरोगः) .................... + रोगः पुरुषः सानन्देन जीवति।

(क) नी (ख) निर् (ग) नि (घ) नीर्

(*iv*) तत्र (कः + चित्) .................... बालकः धावति।

(क) कःचित् (ख) कश्चित् (ग) कास्वित् (घ) कष्वित्

(*v*) विश्वामित्रः एकः (महा + ऋषिः) .................... आसीत्।

(क) महाऋषि (ख) महार्षिः (ग) महर्षीः (घ) महर्षिः

(*vi*) रामः (प्रत्यवदत्) ....................।

(क) प्रति + अवदत् (ख) प्रती + अवदत (ग) प्रति + आवदत् (घ) प्रती + अवदत्

**10. दत्तानां पदानां सहायतया स्थूलपदेषु सन्धिच्छेदम् अथवा सन्धिं चित्वा लिखत।**

(दिए गए पदों की सहायता से स्थूल शब्दों में सन्धि विच्छेद अथवा सन्धि चुनकर लिखिए।)

(Choose the separate or join the bold words by given words.)

(*i*) **रजनी + ईश:** चन्दनवत् शीतल: भवति।

(क) रजनिश: (ख) रजनीश: (ग) रजानीश: (घ) राजनिश:

(*ii*) **वेद + उपदेश:** केन दत्त: ?

(क) वेदउपदेश: (ख) वेदूपदेशन: (ग) वेदोपदेश: (घ) बेदौपदेश:

(*iii*) **दिग्गज:** रक्षतु।

(क) दिग् + गज: (ख) दिक् + गज: (ग) दिच् + गज: (घ) दिज् + गज:

(*iv*) **कोऽवदत्** अधुना ?

(क) को + वदत् (ख) को + अवदत् (ग) को: + अवदत् (घ) क: + आवदत्

(*v*) स: **नीरोग:** एव।

(क) निर् + रोग: (ख) नी + रोग: (ग) निस् + रोग: (घ) नीस् + रोग:

(*vi*) **षट् + आनन:** दक्षिणप्रदेशे पूज्यते।

(क) षडानन: (ख) षडनन: (ग) षटानन: (घ) षटनन:

**11. दत्तानां पदानां सहायतया उचितं सन्धिं सन्धिच्छेदं वा चित्वा लिखत।**

(दिए गए पदों की सहायता से उचित सन्धि अथवा सन्धि विच्छेद चुनकर लिखिए।)

(Choose after separating or joining the suitable words by given words.)

(*i*) अद्य + अवकाश: ________ अस्ति।

(क) अद्यावकाश: (ख) अद्यवकाश: (ग) अद्यवावकाश: (घ) अद्याववाकाश:

(*ii*) सोऽपि ________ मया सह गमिष्यति।

(क) सो + अपि (ख) स: + अपि (ग) सो + पि (घ) सोअ + पि

(*iii*) वाक् + ईश: ________ मम मित्रम् अस्ति।

(क) वाकीश: (ख) वागीश: (ग) वागिश: (घ) वाकिश:

(*iv*) प्रत्येकम् ________ कार्यं ध्यानेन कुरु।

(क) प्रति + एकम् (ख) प्रति + ऐकम् (ग) प्रती + एकम् (घ) प्रती + ऐकम्

(*v*) शिवालयम् ________ गच्छ।

(क) शिवा + आलयम् (ख) शिव + अलयम् (ग) शिव + आलयम् (घ) शिवा + अलयम्

**12. प्रतिवाक्यम् स्थूलपदयो: सन्धिं लिखत।**

(प्रत्येक वाक्य के मोटे पदों की सन्धि लिखिए।)

(Join the bold words in each sentence.)

(*i*) देव! तव स्वागताय **तत्पर: + अस्मि**।

(*ii*) कुत्रास्ति **जगत् + ईश:**।

(*iii*) यज्ञदत्त: वृक्षं **वि + अलोकयत्**।

(*iv*) वनेषु **गजैः + गम्यते**।

(*v*) **तत्र + एव** मम मित्रम् आगमिष्यति।

(*vi*) सः **निर् + रसं** जलं किमर्थं पिबति?

**13. अधोलिखितवाक्येषु स्थूलपदेषु निम्नलिखितानां पदानां सहायतया उचितं सन्धिच्छेदं सन्धिं वा चित्वा लिखत।**

(नीचे लिखे वाक्यों में स्थूल पदों में नीचे दिए गए शब्दों की सहायता से उचित सन्धि विच्छेद अथवा सन्धि चुनकर लिखिए। Choose the separate or join the bold words in the following sentences by given words.)

(*i*) मुनिः **बद्धाञ्जलिः** तामवदत्।

(क) बद्ध + अञ्जलिः (ख) बद्धा + अञ्जलिः (ग) बद्ध + आञ्जलिः (घ) बद्धा + अञ्जलिः

(*ii*) एका बलाका **तस्य + उपरि** विष्ठाम् उदसृजत्।

(क) तस्यउपरि (ख) तस्योपरि (ग) तस्युपरि (घ) तस्यूपरि

(*iii*) हितोपदेशे कथानां **सङ्कलनम्** अस्ति।

(क) सम् + कलनम् (ख) सं + कलनम् (ग) सन् + कलनम् (घ) सङ् + कलनम्

(*iv*) साम्प्रतं वदतु, **कोऽहम्**।

(क) कः + अहम् (ख) को + आहम् (ग) कौ + अहम् (घ) को + हम्

(*v*) **एतत् + चिन्तयित्वा** राजा पण्डितसभां कारितवान्।

(क) एतचिन्तयित्वा (ख) एतच्चिन्तयित्वा (ग) एतज्चिन्तयित्वा (घ) एतज्चिन्तयित्वा

(*vi*) **दन्तैः + हीनः** शिलाभक्षी परपादेन गच्छति।

(क) दन्तैहीनः (ख) दन्तैस्हीनः (ग) दन्तैर्हीनः (घ) दन्तैष्हीनः

**14.. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिच्छेदं सन्धिं अधो दत्तैः शुद्धपदैः चित्वा लिखत।**

(नीचे लिखे रेखांकित शब्दों की सन्धि विच्छेद अथवा सन्धि नीचे दिए गए शुद्ध शब्दों द्वारा चुनकर लिखिए।)

(Choose the separate or join the following underlined by the given correct words.)

(*i*) आयुर्वेदः तृतीया विद्या आसीत्।

(क) आयुर् + वेदः (ख) आयुष् + वेदः (ग) आयुः + वेदः (घ) आयु + वेदः

(*ii*) मम + एतत् सौभाग्यं वर्तते।

(क) ममेतत् (ख) ममीतत् (ग) ममैतत् (घ) ममुतत्

(*iii*) तस्मै स्नेहं ददाम्यहम्।

(क) ददामि + अहम् (ख) ददानि + अहम् (ग) ददामी + अहम् (घ) ददामि + हम्

(*iv*) काष्ठात् + अग्निः मथ्यामानात् जायते।

(क) काष्ठादग्निः (ख) काष्ठाताग्नि (ग) काष्ठाताग्निः (घ) काष्ठादाग्निः

(*v*) भूमिः + तोयं खन्यमाना ददाति।

(क) भूमिष्तोयं (ख) भूमिस्तोयं (ग) भूमिर्तोयं (घ) भूमितोयं

(*vi*) तच्चन्दनपादपस्य शाखायां सर्पाः वसन्ति।

(क) तत् + चन्दनपादपस्य (ख) तद् + चन्दनपादपस्य (ग) तच् + चन्दनपादपस्य (घ) तन् + चन्दनपादपस्य

15. अधोलिखित रेखाङ्कितपदेषु यथास्थानं सन्धिं/विच्छेदं वा लिखत।

(नीचे लिखे रेखांकित शब्दों की सन्धि विच्छेद अथवा सन्धि लिखिए।)

(Separate or join the following underlined words.)

(*i*) मुनयः ईशभक्तौ तत् + लीनाः अभवन्।

(*ii*) राक्षसाः नीरसम् भोजनं खादन्ति।

(*iii*) आपणेषु + अपिः विद्युत् गता।

(*iv*) एते छात्रा सच्छीलाः सन्ति।

(*v*) यदि + अपि त्वं धर्मेन्द्रः तथापि सत्यं न जानाति।

(*vi*) पुनरपि त्वं अत्र आगमिष्यसि।

## बोर्ड द्वारा वार्षिक परीक्षायै प्रदत्ताः प्रश्नाः

**अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं विच्छेदं वा विकल्पेभ्यः चित्वा लिखत–**

**1. अधुना सूर्योदयः भवति।** [*CBSE 2010*]

(क) सूर्यो + दयः (ख) सूर्य + उदयः (ग) सूर्य + दयः (घ) सूर्य + ओदयः

**2. बालकाः विद्यालयं गच्छन्ति।** [*CBSE 2010*]

(क) विद्य + अलयम् (ख) विद्या + आलयम् (ग) विद्या + अलयम् (घ) विद्याः + आलयाम्

**3. तस्मै धनं ददाम्यहम्।** [*CBSE 2010*]

(क) ददामि + अहम् (ख) ददामी + अहम् (ग) ददानि + हम् (घ) ददामि + हम्

**4. देवेन अचिरेणैव कालेन यशः अर्जितम्।** [*CBSE 2010*]

(क) अचिरे + णैव (ख) अचिरेण + ऐव (ग) अचिरेणे + एव (घ) अचिरेण + एव

**5. अप्येवम् आश्चर्यजनकं दृश्यम्।** [*CBSE 2011*]

(क) अपी + एवम् (ख) अपि + एवम् (ग) अपि + ऐवम् (घ) अप + इवम्

**6. अथ बधूत्सवः मान्यते।** [*CBSE 2011*]

(क) वधु + उत्सवः (ख) वधू + उत्सवः (ग) वधुः + उत्सवः (घ) वधू + ऊत्सवः

**7. मम पिता दन्तैर्हीनः अस्ति।** [*CBSE 2010*]

(क) दन्तैर + हीनः (ख) दन्तैः + हीनः (ग) दन्तै + र्हीनः (घ) दन्तै + हीनः

**8. मम अनुजः नीरोगः अस्ति।** [*CBSE 2010*]

(क) निर् + रोगः (ख) निर् + रोंगः (ग) निर् + आरोगः (घ) निः + रोगः

**9. भवन्ति नम्रास्तरवः।** [*CBSE 2011*]

(क) नम्रा + तरवः (ख) नम्राः + स्तरवः (ग) नम्राः + तरवः (घ) नम्रः + तरवः

**10. प्रातर्वन्दनीयः नारायणः मम कुलदेवः अस्ति।** [*CBSE 2011*]

(क) प्रातः + वन्दनीयः (ख) प्रातर् + वन्दनीय (ग) प्रातृ + वन्दनीयः (घ) प्रात + वन्दनीयः

11. भूमिः + तोयं ददाति। [CBSE 2010]

(क) भूमिष्तोयम् (ख) भूमिर्तोयम् (ग) भूमिस्तोयम् (घ) भूमितोयम्

12. भक्तः + शोभते देवालये। [CBSE 2011]

(क) भक्तो शोभते (ख) भक्त शोभते (ग) भक्तश्शोभते (घ) भक्तस्शोभते

13. शिशुः + हसति अतः माता प्रसन्ना भवति। [CBSE 2011]

(क) शिशुः हसति (ख) शिशो हसति (ग) शिशुरहसति (घ) शिशुर्हसति

14. दशरथस्य कीदृशः + तनयस्य स्नेहः आसीत्। [CBSE 2011]

(क) कीदृशस्तनयस्य (ख) किदृशस्तनयस्य (ग) कीदृशतनयस्य (घ) कीदृशोतनयस्य

15. तेन सह रामः + अपि अस्ति। [CBSE 2011]

(क) रामोऽपि (ख) रामेऽपि (ग) रामरपि (घ) राम:अपि

16. अध्ययने तत् + लीनः भव। [CBSE 2011]

(क) तल्लीनः (ख) तद्लीनः (ग) तल्लीन (घ) ततलीनः

17. एष धर्मः सनातनः। [CBSE 2011]

(क) एष + धर्मः (ख) एषो + धर्मः (ग) एषः + धर्मः (घ) एषस् + धर्मः

18. क्रीडनकं दृष्ट्वा शिशुः + हसति। [CBSE 2012, 2014]

(क) शिशुहसति (ख) शिशुस्हसति (ग) शिशुर्हसति (घ) शिशोहसति

19. सङ्गीतम् विना जीवनम् निर् + रसम् भवति। [CBSE 2012, 2014]

(क) निरसम् (ख) निररसम् (ग) नीररसम् (घ) नीरसम्

20. वसन्ततौ सर्वत्र उत् + लासः दृश्यते। [CBSE 2012, 2014]

(क) उत्लासः (ख) उतलासः (ग) उल्लासः (घ) उललासः

21. स्वभाव एव + एष परोपकारिणाम्। [CBSE 2012, 2014]

(क) एवैष (ख) एवेष (ग) एवएष (घ) एविष

22. तरवः फल + उद्गमैः नम्राः भवन्ति। [CBSE 2012, 2014]

(क) फलुद्गमै (ख) फलोद्गमैः (ग) फलौद्गमैः (घ) फलूद्गमैः

23. कक्षायाम् छात्राः इतस्ततः भ्रमन्ति। [CBSE 2012]

(क) इतः + ततः (ख) इतस् + ततः (ग) इतस + ततः (घ) इत + स्ततः

24. नास्ति विद्यासमं चक्षुः। [CBSE 2014]

(क) ना + स्ति (ख) न + अस्ति (ग) ना + अस्ति (घ) नः + अस्ति

25. न प्रतिकूलोपहितम् अन्नं खादेत्। [CBSE 2014]

(क) प्रति + कूलो + पहितम् (ख) प्रतिकूलः + उपहितम् (ग) प्रतिकूलो + हितम् (घ) प्रतिकूल + उपहितम्

26. कीटोऽपि सुमनः सङ्गादारोहति सतां शिरः। [CBSE 2014]

(क) सङ्गात् + आरोहति (ख) सङ्गो + रहति (ग) सङ्ग + आरोहति (घ) सङ्गाद् + रहति

27. सैनिकाः देशम् + रक्षन्ति प्राणान् च त्यजन्ति। [CBSE 2014]

(क) देशो रक्षन्ति (ख) देशस्रक्षन्ति (ग) देशं रक्षन्ति (घ) देश रक्षन्ति

28. सद्भिः + तु लीलया प्रोक्तं शिलालिखितमक्षरम्। [CBSE 2014]

(क) सद्भिश्तु (ख) सद्भिस्तु (ग) सद्भिष्तु (घ) सद्भि तु

अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं विच्छेदं वा कृत्वा लिखत–

29. वाग्देवीं सरस्वतीं नमामि। [CBSE 2012]

30. एतच्चित्रम् दृष्ट्वा सर्वे प्रसीदन्ति। [CBSE 2012]

31. सोत्साहानां नराणां कृते असाध्यम् किमपि न + अस्ति। [CBSE 2012]

32. 'शीघ्रं गच्छ' इति + उक्त्वा नृपः तूष्णीम् अभवत्। [CBSE 2016]

33. यथेष्टं कार्यं कुरु। [CBSE 2016]

34. दिगम्बराणां रथयात्रा गच्छति। [CBSE 2016]

35. वृक्षस्य चित्रम् + पश्य। [CBSE 2016]

36. कः + ते उपाध्यायात् प्राप्तः। [CBSE 2016]

37. मम मित्रम् तत्रैव आगमिष्यति। [CBSE 2016]

38. अद्याहम् मित्रेण सह शुक्रतालं गतवान्। [CBSE 2016]

39. रमा–सुमेधे, नमः + ते। [CBSE 2016]

40. जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। [CBSE 2016]

41. तरुच्छाया सुघना अस्ति। [CBSE 2016]

42. छात्रः पठने तत् + लीनः। [CBSE 2016]

43. गुरु + उपदेशः कार्यं साधयति। [CBSE 2016]

44. एका बलाका तस्य + उपरि विष्ठाम् उदसृजत्। [CBSE 2016]

45. बालकः एतच्चित्रम् पश्यति। [CBSE 2016]

46. काष्ठात् + अग्निः मध्यमानात् जायते। [CBSE 2016]

47. दन्तैः + हीनः शिलाभक्षी परपादेन गच्छति। [CBSE 2016]

## विशेषाः नवीनाः प्रश्नाः

1. अधोलिखितेषु समुचितं सन्धिपदं चित्वा लिखत–

**यथा**–चन्द्र + उदयः = चन्द्रोदयः / चन्द्रौदयः / चन्द्रुदयः

**उत्तरम्**–चन्द्रोदयः

(*i*) मातृ + ऋणम् = मातर्णम् / मातृणम् / मातृणम् – .....................

(*ii*) यदि + अपि = यद्यपि / यदपि / यद्पि – .....................

(*iii*) मत + ऐक्यम् = मतेक्यम् / मतैक्यम् / मत्येकम् – .....................

(*iv*) भानु + उदयः = भान्वुदयः / भानुदयः / भानूदयः – .....................

(*v*) भौ + उकः = भावकः / भाविकः / भावुकः – ......................

(*vi*) विष्णो + इह = विष्णविह / विष्णवेह / विष्णोह – ......................

(*vii*) सर्वे + अत्र = सर्वे अत्र / सर्वेऽत्र / सर्व अत्र – ......................

(*viii*) गङ्गा + इव = गङ्गैव / गङ्गोव/ गङ्गेव – ......................

**2. अधोलिखितेषु सन्धिविच्छेदं रूपं पूरयित्वा सन्धेः नाम अपि लिखत–**

**यथा**–अन्वेषणम्– अनु + एषणम् – यण् सन्धि

(*i*) तवैव – .......... + एव – ......................

(*ii*) नदीव – नदी + .......... – ......................

(*iii*) केऽपि – .......... + अपि – ......................

(*iv*) अत्याचारः – अति + .......... – ......................

(*v*) शयनम् – .......... + अनम् – ......................

(*vi*) यथोचितम् – यथा + .......... – ......................

**3. यत्र प्रकृति भाव–सन्धिः अस्ति तत्पदं ( ✓ ) इति चिह्नेन चिह्नीकुरुत यत्र च नास्ति तत्पदं ( × ) इति चिह्नेन चिह्नीकुरुत–**

(*i*) नदी एते ( )

(*ii*) वृक्षे अपि ( )

(*iii*) मुनी एतौ ( )

(*iv*) साधू उपरि गच्छतः ( )

(*v*) सखी एषा ( )

(*vi*) मुनी इच्छतः ( )

(*vii*) सभायाम् कवी आगतौ ( )

(*viii*) नदी इयं वहति ( )

**4. अधोलिखितवाक्येषु स्थूलपदेषु सन्धिविच्छेदं कृत्वा लिखत–**

(*i*) **कवीन्द्रः** अद्य नवीनां कवितां श्रावयति।

...................... + ......................

(*ii*) कंसः सर्वेषु **अत्याचारम्** करोति स्म।

...................... + ......................

(*iii*) गंगा **गंगेति** यो ब्रूयात् योजनानां शतैरपि सः पापेभ्यः विमुच्यते।

...................... + ......................

(*iv*) यथा रामः पठति **तथैव** श्यामः पठति।

...................... + ......................

(*v*) वानराः सर्वत्र **वृक्षेऽपि** कूर्दन्ति।

...................... + ......................

**5. समुचितं सन्धिविच्छेदरूपं पूरयत–**

(*i*) दिगम्बर: – .......... + अम्बर: (दिक् / दिग्)

(*ii*) मच्छिर: – मत् + .............. (छिर: / शिर:)

(*iii*) जगदीश: – .............. + ईश: (जगत् / जगद्)

(*iv*) अयं गच्छति – .......... + गच्छति (अयं / अयम्)

(*v*) नीरोग: – .............. + रोग: (निर् / नीर्)

(*vi*) तल्लीन: – तत् + .............. (लिन: / लीन:)

**6. समुचितं सन्धिपदं चित्वा लिखत–**

(*i*) सत् + जन: – सज्जन: / सत्जन: ....................

(*ii*) तत् + श्रुत्वा – तच्श्रुत्वा / तच्छुत्वा ....................

(*iii*) विद्वान् + लिखति – विद्वांल्लिखति / विद्वाँल्लिखति ....................

(*iv*) सम् + कल्प: – सम्कल्प: / सङ्कल्प: ....................

(*v*) उत् + लेख: – उल्लेख: / उच्लेख: ....................

**7. अधोलिखितवाक्येषु स्थूलपदानां यथापेक्षं सन्धिम् अथवा सन्धिविच्छेदं कृत्वा लिखत–**

(*i*) सर्वे **जगच्छिवानि** कार्याणि कुर्वन्तु। ....................

(*ii*) यत्पाठे **उत् + लिखितम्** तत् सर्वं पठत। ....................

(*iii*) **नीरोग:** जन: सुखी भवति। ....................

(*iv*) कोकिल: **पं + चमे** स्वरे गायति। ....................

(*v*) स: **तरुच्छायायाम्** पठति। ....................

(*vi*) मानी **मानम् + न** त्यजति। ....................

('व्याकरण वीथित:' साभार:)

**8. समुचितं सन्धिपदं चित्वा लिखत–**

(*i*) इत: + तत: – इतस्तत: / इतशतत: ....................

(*ii*) दु: + कर्म – दुश्कर्म / दुष्कर्म ....................

(*iii*) शिव: + अवदत् – शिवावदत् / शिवोऽवदत् ....................

(*iv*) मुनि: + आगच्छति – मुनिरागच्छति / मुनिरगच्छित ....................

(*v*) मन: + रथ: – मनरथ: / मनोरथ: ....................

(*vi*) छात्र: + अयम् – छात्रोऽयम् / छात्रायम् ....................

(*vii*) प्रथम: + नाम – प्रथमो नाम / प्रथमोऽनाम ....................

(*viii*) कपि + चलति – कपिर्चलति / कपिश्चलति ....................

**9. सन्धिविच्छेदं कृत्वा लिखत–**

(*i*) कीटोऽपि – .................... + अपि।

(*ii*) भोजो नाम – .................... + नाम।

(*iii*) वर्षयोरुपरान्तम् – वर्षयो: + ....................।

(*iv*) शिविर्जयति – .................... + जयति।

(*v*) कैश्चित् – कै: + ………………।

(*vi*) महापुरुषैरपि – ……………… + अपि।

(*vii*) नमस्कार: – नम: + ………………।

(*viii*) धनुष्टङ्कार: – ……………… + टङ्कार।

**10. अधोलिखितवाक्येषु स्थूलपदेषु सन्धिविच्छेदं कृत्वा लिखत–**

(*i*) **पितुरिच्छा** वर्तते।

……………… + ………………

(*ii*) छात्र: **तपोवनम्** गच्छति।

……………… + ………………

(*iii*) अध्यापक: उत्तमं छात्रं **पुरस्करोति**।

……………… + ………………

(*iv*) मन्दबुद्धि: सेवक: स्वामिन: **मनस्तापस्य** कारणमभवत्।

……………… + ………………

(*v*) **निष्कपट:** जन: शोभते।

……………… + ………………

(*vi*) **बालो गच्छति**।

……………… + ………………

**11. अधोलिखि तानि यथापेक्षितं योजयत–**

(*i*) जननीजनकविहीनम् अनाथम् पश्यामि = ………………………………

(*ii*) सीता पुस्तकम् अपठत् = ………………………………

(*iii*) कुरु न त्वम् अनर्थम् = ………………………………

(*iv*) बालकम् अनाथम् पालय = ………………………………

(*v*) सर्वम् अहर्निशं मानय = ………………………………

**12. सन्धिविच्छेद रूपं पूरयत–**

(*i*) वृक्षच्छायायाम् = ……………… + छायायाम्

(*ii*) नाववतु = ……………… + अवतु

(*iii*) वागर्थाविव = वाक् + ……………… + इव

(*iv*) कोऽत्र = ……………… + अत्र

(*v*) वेत्तासि = वेत्ता + ………………

(*vi*) महोदय: = महा + ………………

(*vii*) सर्वैरत्र = ……………… + अत्र

(*viii*) अभ्युदय: = अभि + ………………

(*ix*) तदर्थम् = तत् + ………………

(*x*) शरच्चन्द्र: = ……………… + चन्द्र:

13. सन्धिं कृत्वा लिखत–

(*i*) जगत् + जननी = ..................................

(*ii*) महा + ऐश्वर्यम् = ..................................

(*iii*) न + अधीतम् = ..................................

(*iv*) अहः + अहः = ..................................

(*v*) जीवति + अनाथः + अपि = ..................

(*vi*) गृहे + अपि = ..................................

(*vii*) जगत् + माता = ..................................

(*viii*) महान् + लिखति = ..................................

(*ix*) द्वौ + एतौ = ..................................

(*x*) यत् + भविष्यः + विनश्यति = ..................

14. निम्नपदानां सन्धिं विच्छेदं वा कुरुत्–

(*i*) मृदुं गाय – .................. + ..................

(*ii*) गीतिम् + ललित – ....................................

(*iii*) लसन्तीह – .................. + ..................

(*iv*) कविन्दात्मजायास्सवानीरतीरे – .................. + ..................

(*v*) पम् + क्तिम् – ....................................

(*vi*) मलयमारुतोच्चुम्बिते – .................. + ..................

(*vii*) स्वनन्तीन्ततिम्प्रेक्ष्य – .................. + ..................

(*viii*) प्र + ईक्ष्य – ....................................

(*ix*) तवाकर्ण्य – .................. + ..................

(*x*) चलेदुच्छलेत् – .................. + ..................

(*xi*) कस्मिंश्चिद् – .................. + ..................

(*xii*) तस्याः + च + एका – ....................................

(*xiii*) न्यवसत् – .................. + ..................

(*xiv*) चासीत् – .................. + ..................

(*xv*) ग्रामाद् बहिः – .................. + ..................

(*xvi*) हसन्तञ्च – .................. + ..................

(*xvii*) तत्रोपस्थिता – .................. + ..................

(*xviii*) मातुः + दुहिता + अस्मि – ....................................

(*xix*) प्रबुद्धस्तदा – .................. + ..................

(*xx*) श्रान्तं ताम् – .................... + ....................

(*xxi*) सञ्जाता – .................... + ....................

(*xxii*) चात्रैव – .................... + ....................

(*xxiii*) इत्युक्त्वा – .................... + .................... + ....................

(*xxiv*) प्रत्यवदत् – .................... + ....................

(*xxv*) एकाऽपरा – .................... + ....................

(*xxvi*) प्रात: + तत्र – ........................................

(*xxvii*) वृत्ततस्तु – .................... + ....................

(*xxviii*) हतोहत: – .................... + ....................

(*xxix*) गुणेष्वेव – .................... + ....................

(*xxx*) नेश्वरैरगुणै: – .................... + ....................

('व्याकरण वीथित:' साभार:)

□□

# ग3 शब्द-रूप प्रकरणम्

मूल धातु, प्रत्यय, उपसर्ग को छोड़कर सार्थक शब्द प्रातिपदिक कहलाते हैं। इन्हीं प्रातिपदिकों के अन्त में पद-निर्माण के लिए सुप् प्रत्यय लगाए जाते हैं।

संज्ञा अथवा सर्वनाम शब्दों के साथ लगने वाले कारक चिह्नों को **सुप् प्रत्यय** तथा क्रिया रूप बनाने के लिए धातुओं के साथ लगने वाले प्रत्ययों को **तिङ् प्रत्यय** कहते हैं।

**प्रातिपदिक शब्द दो प्रकार के होते हैं :**

1. **अजन्त** अर्थात् स्वरान्त (जिनके अन्त में व्यञ्जन होते हैं); जैसे—राम, हरि, गुरु, गौ आदि।
2. **हलन्त** अर्थात् व्यञ्जनान्त (जिनके अन्त में व्यञ्जन होते हैं); जैसे—वाच्, भगवत्, महत्, सरस्, सखिन् आदि।

सुप् प्रत्ययों को मूल रूप (अवशिष्ट अर्थात् बचा हुआ रूप) कुछ परिवर्तनों के साथ ही अजन्त के साथ जुड़ता है, जबकि हलन्त शब्दों के साथ वह बिना किसी परिवर्तन के सीधे जुड़ जाता है।

परिश्रमी छात्रों की सुविधा के लिए **सुप् प्रत्ययों** के मूल रूप तथा कोष्ठक (Brackets) में परिवर्तित रूप दिए जा रहे हैं। आशा है विद्यार्थी इसका लाभ उठाएँगे।

## सुप् प्रत्यय

| विभक्ति | कारक | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|---|
| प्रथमा | कर्ता | सु-स् (:) | औ | जस् (अः) |
| द्वितीया | कर्म | अम् | औट् (औ) | शस् (अः) |
| तृतीया | करण | टा (आ) | भ्याम् | भिस् (भिः) |
| चतुर्थी | सम्प्रदान | ङे (ए) | भ्याम् | भ्यस् (भ्यः) |
| पंचमी | अपादान | ङसि (अः) | भ्याम् | भ्यस् (भ्यः) |
| षष्ठी | सम्बन्ध | ङस् (अः) | ओस् (ओः) | आम् |
| सप्तमी | अधिकरण | ङि (इ) | ओस् (ओः) | सुप् (सु-षु) |
| सम्बोधन | सम्बोधन | सु | औ | जस् (अः) |

**संज्ञा शब्दों के छः भेद हो जाते हैं—**

1. **अजन्त पुंल्लिग**—जिनके अन्त में स्वर हों; जैसे—राम, हरि, गुरु, साधु, पितृ आदि।
2. **अजन्त पुंल्लिग**—जिनके अन्त में स्वर हों; जैसे—लता, मति, नदी, धेनु, वधू, मातृ, गौ आदि।
3. **अजन्त नपुंसकलिंग**—जिनके अन्त में स्वर हों; जैसे—फल, वारि, मधु आदि।
4. **हलन्त पुंल्लिग**—जिनके अन्त में व्यञ्जन हों; जैसे—राजन्, भवत्, गच्छत्, सम्राज्, विद्वस् आदि।
5. **हलन्त स्त्रीलिंग**—जिनके अन्त में व्यञ्जन हों; जैसे—सरित्, सम्पद्, समिध्, वाच्, दिश् आदि।
6. **हलन्त नपुंसकलिंग**—जिनके अन्त में व्यञ्जन हों; जैसे—मनस्, महत्, नामन् आदि।

# अजन्त पुंल्लिङ्गम्

## अकारान्त पुंल्लिङ्गम्

### 1. बालक

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | बालकः | बालकौ | बालकाः |
| द्वितीया | बालकम् | बालकौ | बालकान् |
| तृतीया | बालकेन | बालकाभ्याम् | बालकैः |
| चतुर्थी | बालकाय | बालकाभ्याम् | बालकेभ्यः |
| पंचमी | बालकात् | बालकाभ्याम् | बालकेभ्यः |
| षष्ठी | बालकस्य | बालकयोः | बालकानाम् |
| सप्तमी | बालके | बालकयोः | बालकेषु |
| सम्बोधन | हे बालक! | हे बालकौ! | हे बालकाः! |

### 2. राम

| | | | |
|---|---|---|---|
| प्रथमा | रामः | रामौ | रामाः |
| द्वितीया | रामम् | रामौ | रामान् |
| तृतीया | रामेण | रामाभ्याम् | रामैः |
| चतुर्थी | रामाय | रामाभ्याम् | रामेभ्यः |
| पंचमी | रामात् | रामाभ्याम् | रामेभ्यः |
| षष्ठी | रामस्य | रामयोः | रामाणाम् |
| सप्तमी | रामे | रामयोः | रामेषु |
| सम्बोधन | हे राम! | हे रामौ! | हे रामाः! |

**नियम**—र्, ऋ तथा ष् के बाद न् को ण् हो जाता है; जैसे—रामेण, रामाणाम्। किन्तु न् के हलन्त होने पर नहीं होता; जैसे—रामान् या हरीन्।

**समान शब्द:** **जनक** = पिता। **भूप, नृप** = राजा। **पिक** = कोयल। **वृक** = भेड़िया। **बक** = बगला। **चटक** = चिड़ा। **अज** = बकरा। **नर, मानव** = मनुष्य। **नाग** = साँप। **गज** = हाथी। **अश्व** = घोड़ा। **देव** = देवता। **बिडाल** = बिल्ला, बिलाव। **द्विज** = ब्राह्मण। **मेघ** = बादल। **हरिण, मृग** = हिरन। **सागर** = समुद्र। **खग** = पक्षी। **मत्स्य** = मछली। **भ्रमर, मधुकर** = भौंरा। **छात्र** = विद्यार्थी। **सिंह** = शेर। **भुजंग** = साँप आदि।

## इकारान्त पुंल्लिङ्गम्

### 3. कवि

| | | | |
|---|---|---|---|
| प्रथमा | कविः | कवी | कवयः |
| द्वितीया | कविम् | कवी | कवीन् |
| तृतीया | कविना | कविभ्याम् | कविभिः |
| चतुर्थी | कवये | कविभ्याम् | कविभ्यः |
| पंचमी | कवेः | कविभ्याम् | कविभ्यः |
| षष्ठी | कवेः | कव्योः | कवीनाम् |
| सप्तमी | कवौ | कव्योः | कविषु |
| सम्बोधन | हे कवे! | हे कवी! | हे कवयः! |

**समान शब्द** : **मुनि** = ऋषि। **विधि** = ब्रह्मा। **रश्मि** = किरण। **हरि** = विष्णु। **रवि** = सूर्य। **अग्नि, वह्नि** = आग। **कपि**= बन्दर। **मरीचि** = किरण। **असि** = तलवार। **गिरि** = पर्वत। **सारथि** = रथवान्। **निधि** = खजाना। **अरि** = शत्रु। **यति** = योगी। **व्याधि**= रोग। **नृपति, भूपति, महीपति** = राजा।

### 4. पति

| | | | |
|---|---|---|---|
| **प्रथमा** | पतिः | पती | पतयः |
| **द्वितीया** | पतिम् | पती | पतीन् |
| **तृतीया** | पत्या | पतिभ्याम् | पतिभिः |
| **चतुर्थी** | पत्ये | पतिभ्याम् | पतिभ्यः |
| **पंचमी** | पत्युः | पतिभ्याम् | पतिभ्यः |
| **षष्ठी** | पत्युः | पत्योः | पतीनाम् |
| **सप्तमी** | पत्यौ | पत्योः | पतिषु |
| **सम्बोधन** | हे पते! | हे पती! | हे पतयः! |

**विशेष**—यदि 'पति' शब्द समास के अन्त में आए तो उसके रूप 'मुनि' शब्द की तरह चलते हैं; जैसे—भूपति, नृपति, महीपति आदि।

### 5. सखि (मित्र)

| | | | |
|---|---|---|---|
| **प्रथमा** | सखा | सखायौ | सखायः |
| **द्वितीया** | सखायम् | सखायौ | सखीन् |
| **तृतीया** | सख्या | सखिभ्याम् | सखिभिः |
| **चतुर्थी** | सख्ये | सखिभ्याम् | सखिभ्यः |
| **पंचमी** | सख्युः | सखिभ्याम् | सखिभ्यः |
| **षष्ठी** | सख्युः | सख्योः | सखीनाम् |
| **सप्तमी** | सख्यौ | सख्योः | सखिषु |
| **सम्बोधन** | हे सखे! | हे सखायौ! | हे सखायः! |

## ईकारान्त पुंल्लिङ्गम्

### 6. सुधी (बुद्धिमान्)

| | | | |
|---|---|---|---|
| **प्रथमा** | सुधीः | सुधियौ | सुधियः |
| **द्वितीया** | सुधियम् | सुधियौ | सुधियः |
| **तृतीया** | सुधिया | सुधीभ्याम् | सुधीभिः |
| **चतुर्थी** | सुधिये | सुधीभ्याम् | सुधीभ्यः |
| **पंचमी** | सुधियः | सुधीभ्याम् | सुधीभ्यः |
| **षष्ठी** | सुधियः | सुधियोः | सुधीनाम् |
| **सप्तमी** | सुधियि | सुधियोः | सुधीषु |
| **सम्बोधन** | हे सुधि! | हे सुधियौ! | हे सुधियः! |

## उकारान्त पुंल्लिङ्गम्

### 7. साधु (सज्जन)

| | | | |
|---|---|---|---|
| **प्रथमा** | साधुः | साधू | साधवः |
| **द्वितीया** | साधुम् | साधू | साधून् |
| **तृतीया** | साधुना | साधुभ्याम् | साधुभिः |
| **चतुर्थी** | साधवे | साधुभ्याम् | साधुभ्यः |

| | | | |
|---|---|---|---|
| **पंचमी** | साधोः | साधुभ्याम् | साधुभ्यः |
| **षष्ठी** | साधोः | साध्वोः | साधूनाम् |
| **सप्तमी** | साधौ | साध्वोः | साधुषु |
| **सम्बोधन** | हे साधो! | हे साधू! | हे साधवः! |

**विशेष**—सभी उकारान्त पुंल्लिग शब्दों के रूप 'साधु' की तरह होंगे।

**समान शब्द :** **बिन्दु** = बूँद। **वायु** = हवा। **गुरु** = आचार्य। **सूनु** = पुत्र। **बन्धु** = सम्बन्धी। **भानु** = सूर्य। **विधु** = चन्द्रमा। **बांहु** = भुजा। **रिपु** = शत्रु। **सिन्धु** = समुद्र। **प्रभु** = स्वामी। **शम्भु** = महादेव। **शिशु** = बालक। **ऋतु** = मौसम। **तरु** = पेड़। **पलाण्डु** = प्याज।

## ऋकारान्त पुंल्लिङ्गम्

### 8. पितृ (पिता, जनक)

| | | | |
|---|---|---|---|
| **प्रथमा** | पिता | पितरौ | पितरः |
| **द्वितीया** | पितरम् | पितरौ | पितॄन् |
| **तृतीया** | पित्रा | पितृभ्याम् | पितृभिः |
| **चतुर्थी** | पित्रे | पितृभ्याम् | पितृभ्यः |
| **पंचमी** | पितुः | पितृभ्याम् | पितृभ्यः |
| **षष्ठी** | पितुः | पित्रोः | पितॄणाम् |
| **सप्तमी** | पितरि | पित्रोः | पितृषु |
| **सम्बोधन** | हे पितः! | हे पितरौ! | हे पितरः! |

### 9. कर्तृ (कर्ता)

| | | | |
|---|---|---|---|
| **प्रथमा** | कर्ता | कर्तारौ | कर्तारः |
| **द्वितीया** | कर्तारम् | कर्तारौ | कर्तॄन् |
| **तृतीया** | कर्त्रा | कर्तृभ्याम् | कर्तृभिः |
| **चतुर्थी** | कर्त्रे | कर्तृभ्याम् | कर्तृभ्यः |
| **पंचमी** | कर्तुः | कर्तृभ्याम् | कर्तृभ्यः |
| **षष्ठी** | कर्तुः | कर्त्रोः | कर्तॄणाम् |
| **सप्तमी** | कर्तरि | कर्त्रोः | कर्तृषु |
| **सम्बोधन** | हे कर्तः! | हे कर्तारौ! | हे कर्तारः! |

### 10. दातृ (देने वाला)

| | | | |
|---|---|---|---|
| **प्रथमा** | दाता | दातारौ | दातारः |
| **द्वितीया** | दातारम् | दातारौ | दातॄन् |
| **तृतीया** | दात्रा | दातृभ्याम् | दातृभिः |
| **चतुर्थी** | दात्रे | दातृभ्याम् | दातृभ्यः |
| **पंचमी** | दातुः | दातृभ्याम् | दातृभ्यः |
| **षष्ठी** | दातुः | दात्रोः | दातॄणाम् |
| **सप्तमी** | दातरि | दात्रोः | दातृषु |
| **सम्बोधन** | हे दातः! | हे दातारौ! | हे दातारः! |

**समान शब्द :** **भर्तृ** = स्वामी, पति। **क्रेतृ** = खरीदने वाला। **कर्तृ** = करने वाला। **धातृ** = ब्रह्मा। **देवृ** = देवर। **वक्तृ** = वक्ता। **गन्तृ** = जाने वाला। **नपृ** = दोहित्र, पौत्र। **नेतृ** = नेता। **श्रोतृ** = सुनने वाला। **सवितृ** = सूर्य। **भ्रातृ** = भाई। **होतृ** = हवन करने वाला। **गोपृ** = रक्षक। **दृष्टृ** = देखने वाला। **जामातृ** = दामाद।

# अजन्त स्त्रीलिंगम्

## आकारान्त स्त्रीलिंगम्

### 1. रमा (लक्ष्मी)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | रमा | रमे | रमाः |
| द्वितीया | रमाम् | रमे | रमाः |
| तृतीया | रमया | रमाभ्याम् | रमाभिः |
| चतुर्थी | रमायै | रमाभ्याम् | रमाभ्यः |
| पंचमी | रमायाः | रमाभ्याम् | रमाभ्यः |
| षष्ठी | रमायाः | रमयोः | रमाणाम् |
| सप्तमी | रमायाम् | रमयोः | रमासु |
| सम्बोधन | हे रमे! | हे रमे! | हे रमाः! |

**समान शब्द :** **रमा** = लक्ष्मी। **माला** = हार। **प्रजा** = सन्तान। **शाला** = घर। **भार्या** = स्त्री। **शिला** = पत्थर। **कन्या** = लड़की। **विद्या** = विद्या। **क्रीडा** = खेल। **कला** = हुनर। **कक्षा** = कमरा/श्रेणी। **भिक्षा** = भीख। **निशा** = रात। **शिखा** = चोटी। **जटा** = बालों की जटा। **होरा** = घण्टा। **कला** = मिनट। **जिह्वा** = जीभ। **ग्रीवा** = गर्दन आदि।

## इकारान्त स्त्रीलिंगम्

### 2. मति (बुद्धि)

| | | | |
|---|---|---|---|
| प्रथमा | मतिः | मती | मतयः |
| द्वितीया | मतिम् | मती | मतीः |
| तृतीया | मत्या | मतिभ्याम् | मतिभिः |
| चतुर्थी | मत्यै, मतये | मतिभ्याम् | मतिभ्यः |
| पंचमी | मत्याः, मतेः | मतिभ्याम् | मतिभ्यः |
| षष्ठी | मत्याः, मतेः | मत्योः | मतीनाम् |
| सप्तमी | मत्याम्, मतौ | मत्योः | मतिषु |
| सम्बोधन | हे मते! | हे मती! | हे मतयः! |

मति के समान ही बुद्धि, गति, रति, शुद्धि, भक्ति, शक्ति, स्मृति, शान्ति, रीति, नीति, श्रुति, जाति, पंक्ति, रात्रि, धूलि, रुचि, कृति तथा मूर्ति आदि शब्दों के रूप होते हैं। रात्रि शब्द के षष्ठी बहुवचन में रात्रीणाम् रूप होता है।

**समान शब्द :** **श्रुति** = वेद। **भूति** = ऐश्वर्य। **गति** = जाना। **स्तुति** = प्रशंसा। **प्रीति** = प्रेम। **विपणि** = दुकान। **कटि** = कमर। **कृति** = काम, रचना। **शान्ति** = शान्ति। **प्रकृति** = स्वभाव/राजा। **प्रणति** = प्रणाम। **आकृति** = आकार। **वीचि, ऊर्मि** = लहर। **सरणि** = सड़क। **रुचि** = इच्छा आदि।

## ईकारान्त स्त्रीलिंगम्

### 3. नदी (नदी)

| | | | |
|---|---|---|---|
| प्रथमा | नदी | नद्यौ | नद्यः |
| द्वितीया | नदीम् | नद्यौ | नदीः |
| तृतीया | नद्या | नदीभ्याम् | नदीभिः |
| चतुर्थी | नद्यै | नदीभ्याम् | नदीभ्यः |

| | | | |
|---|---|---|---|
| **पंचमी** | नद्याः | नदीभ्याम् | नदीभ्यः |
| **षष्ठी** | नद्याः | नद्योः | नदीनाम् |
| **सप्तमी** | नद्याम् | नद्योः | नदीषु |
| **सम्बोधन** | हे नदि! | हे नद्यौ! | हे नद्यः! |

**समान शब्द :** **नारी** = स्त्री। **जननी** = माता। **पत्नी** = भार्या। **राज्ञी** = रानी। **पुत्री** = लड़की। **पौत्री** = पोती। **विदुषी** = पढ़ी-लिखी स्त्री। **भगिनी** = बहन। **महिषी** = भैंस, पटरानी। **पृथ्वी** = पृथ्वी। **कौमुदी** = चाँदनी। **कदली** = केला। **मसी** = स्याही। **धात्री** = धाय। **रजनी** = रात आदि।

### 4. स्त्री (भार्या)

| | | | |
|---|---|---|---|
| **प्रथमा** | स्त्री | स्त्रियौ | स्त्रियः |
| **द्वितीया** | स्त्रियम् | स्त्रियौ | स्त्रीः |
| **तृतीया** | स्त्रिया | स्त्रीभ्याम् | स्त्रीभिः |
| **चतुर्थी** | स्त्रियै | स्त्रीभ्याम् | स्त्रीभ्यः |
| **पंचमी** | स्त्रियाः | स्त्रीभ्याम् | स्त्रीभ्यः |
| **षष्ठी** | स्त्रियाः | स्त्रियोः | स्त्रीणाम् |
| **सप्तमी** | स्त्रियाम् | स्त्रियोः | स्त्रीषु |
| **सम्बोधन** | हे स्त्रि! | हे स्त्रियौ! | हे स्त्रियः! |

## ऊकारान्त स्त्रीलिंगम्

### 5. वधू (बहू)

| | | | |
|---|---|---|---|
| **प्रथमा** | वधूः | वध्वौ | वध्वः |
| **द्वितीया** | वधूम् | वध्वौ | वधूः |
| **तृतीया** | वध्वा | वधूभ्याम् | वधूभिः |
| **चतुर्थी** | वध्वै | वधूभ्याम् | वधूभ्यः |
| **पंचमी** | वध्वाः | वधूभ्याम् | वधूभ्यः |
| **षष्ठी** | वध्वाः | वध्वोः | वधूनाम् |
| **सप्तमी** | वध्वाम् | वध्वोः | वधूषु |
| **सम्बोधन** | हे वधौ! | हे वध्वौ! | हे वध्वः! |

## ऋकारान्त स्त्रीलिंगम्

### 6. मातृ (माता)

| | | | |
|---|---|---|---|
| **प्रथमा** | माता | मातरौ | मातरः |
| **द्वितीया** | मातरम् | मातरौ | मातॄः |
| **तृतीया** | मात्रा | मातृभ्याम् | मातृभिः |
| **चतुर्थी** | मात्रे | मातृभ्याम् | मातृभ्यः |
| **पंचमी** | मातुः | मातृभ्याम् | मातृभ्यः |
| **षष्ठी** | मातुः | मात्रोः | मातॄणाम् |
| **सप्तमी** | मातरि | मात्रोः | मातृषु |
| **सम्बोधन** | हे मातः! | हे मातरौ! | हे मातरः! |

# अजन्त नपुंसकलिंगम्

## अकारान्त नपुंसकलिंगम्

### 1. फल (फल)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | फलम् | फले | फलानि |
| द्वितीया | फलम् | फले | फलानि |
| तृतीया | फलेन | फलाभ्याम् | फलैः |
| चतुर्थी | फलाय | फलाभ्याम् | फलेभ्यः |
| पंचमी | फलात् | फलाभ्याम् | फलेभ्यः |
| षष्ठी | फलस्य | फलयोः | फलानाम् |
| सप्तमी | फले | फलयोः | फलेषु |
| सम्बोधन | हे फल! | हे फले! | हे फलानि! |

**समान शब्द :** **ज्ञान** = ज्ञान। **धन, वित, द्रविण** = धन। **वस्त्र** = कपड़ा। **रत्न** = रत्न। **पुष्प, कुसुम** = फूल। **उद्यान** = बाग। **पाप** = पाप। **पुण्य** = पुण्य। **स्वर्ण, सुवर्ण** = सोना। **नेत्र, नयन** = आँख। **हिम** = बर्फ। **गगन** = आकाश। **कार्य** = कार्य। **कर्त्तव्य** = कर्त्तव्य। **नगर, पुर** = शहर। **चक्र** = पहिया। **उदर** = पेट। **तीर, कूल** = किनारा। **नवनीत** = मक्खन। **कमल** = कमल। **गीत** = गीत। **व्यजन** = पंख। **ललाट** = माथा। **विष** = ज़हर। **गृह** = घर। **सत्य** = सच।

## इकारान्त नपुंसकलिंग

### 2. वारि (जल)

| | | | |
|---|---|---|---|
| प्रथमा | वारि | वारिणी | वारीणि |
| द्वितीया | वारि | वारिणी | वारीणि |
| तृतीया | वारिणा | वारिभ्याम् | वारिभिः |
| चतुर्थी | वारिणे | वारिभ्याम् | वारिभ्यः |
| पंचमी | वारिणः | वारिभ्याम् | वारिभ्यः |
| षष्ठी | वारिणः | वारिणोः | वारीणाम् |
| सप्तमी | वारिणि | वारिणोः | वारिषु |
| सम्बोधन | हे वारि, हे वारे! | हे वारिणी! | हे वारीणि! |

अस्थि, दधि, अक्षि, सक्थि (जंघा)—इन शब्दों के रूप प्रथमा तथा द्वितीया में वारि की तरह होंगे, शेष अलग होंगे।

### 3. अस्थि (हड्डी)

| | | | |
|---|---|---|---|
| प्रथमा | अस्थि | अस्थिनी | अस्थीनि |
| द्वितीया | अस्थि | अस्थिनी | अस्थीनि |
| तृतीया | अस्थ्ना | अस्थिभ्याम् | अस्थिभिः |
| चतुर्थी | अस्थ्ने | अस्थिभ्याम् | अस्थिभ्यः |
| पंचमी | अस्थ्नः | अस्थिभ्याम् | अस्थिभ्यः |
| षष्ठी | अस्थ्नः | अस्थ्नोः | अस्थ्नाम्/अस्थीनाम् |
| सप्तमी | अस्थिनि | अस्थ्नोः | अस्थिषु |
| सम्बोधन | हे अस्थे, हे अस्थि ! | हे अस्थिनी! | हे अस्थीनि! |

### 4. दधि (दही)

| | | | |
|---|---|---|---|
| **प्रथमा** | दधि | दधिनी | दधीनि |
| **द्वितीया** | दधि | दधिनी | दधीनि |
| **तृतीया** | दध्ना | दधिभ्याम् | दधिभिः |
| **चतुर्थी** | दध्ने | दधिभ्याम् | दधिभ्यः |
| **पंचमी** | दध्नः | दधिभ्याम् | दधिभ्यः |
| **षष्ठी** | दध्नः | दध्नोः | दध्नाम् |
| **सप्तमी** | दध्नि, दधिनि | दध्नोः | दधिषु |
| **सम्बोधन** | हे दधे, हे दधि! | हे दधिनी! | हे दधीनि! |

### 5. अक्षि (आँख)

| | | | |
|---|---|---|---|
| **प्रथमा** | अक्षि | अक्षिणी | अक्षीणि |
| **द्वितीया** | अक्षि | अक्षिणी | अक्षीणि |
| **तृतीया** | अक्ष्णा | अक्षिभ्याम् | अक्षिभिः |
| **चतुर्थी** | अक्ष्णे | अक्षिभ्याम् | अक्षिभ्यः |
| **पंचमी** | अक्ष्णः | अक्षिभ्याम् | अक्षिभ्यः |
| **षष्ठी** | अक्ष्णः | अक्ष्णोः | अक्ष्णाम् |
| **सप्तमी** | अक्ष्णि, अक्षिणि | अक्ष्णोः | अक्षिषु |
| **सम्बोधन** | हे अक्षे, हे अक्षि! | हे अक्षिणी! | हे अक्षीणि! |

## उकारान्त नपुंसकलिंगम्

### 6. मधु (शहद)

| | | | |
|---|---|---|---|
| **प्रथमा** | मधु | मधुनी | मधूनि |
| **द्वितीया** | मधु | मधुनी | मधूनि |
| **तृतीया** | मधुना | मधुभ्याम् | मधुभिः |
| **चतुर्थी** | मधुने | मधुभ्याम् | मधुभ्यः |
| **पंचमी** | मधुनः | मधुभ्याम् | मधुभ्यः |
| **षष्ठी** | मधुनः | मधुनोः | मधूनाम् |
| **सप्तमी** | मधुनि | मधुनोः | मधुषु |
| **सम्बोधन** | हे मधो, हे मधु! | हे मधुनी! | हे मधूनि! |

## ऋकारान्त नपुंसकलिंगम्

### 7. कर्तृ (करने वाला)

| | | | |
|---|---|---|---|
| प्रथमा | कर्तृ | कर्तृणी | कर्तॄणि |
| द्वितीया | कर्तृ | कर्तृणी | कर्तॄणि |
| तृतीया | कर्त्रा | कर्तृभ्याम् | कर्तृभिः |
| चतुर्थी | कर्त्रे | कर्तृभ्याम् | कर्तृभ्यः |
| पंचमी | कर्तुः | कर्तृभ्याम् | कर्तृभ्यः |
| षष्ठी | कर्तुः | कर्त्रोः | कर्तॄणाम् |
| सप्तमी | कर्तरि | कर्त्रोः | कर्तृषु |
| सम्बोधन | हे कर्तः! | हे कर्तृणी! | हे कर्तॄणि! |

## सर्वनाम-शब्द प्रकरण

### 1. यत् (जो पुरुष) (पुंल्लिङ्गम्)

| | | | |
|---|---|---|---|
| प्रथमा | यः | यौ | ये |
| द्वितीया | यम् | यौ | यान् |
| तृतीया | येन | याभ्याम् | यैः |
| चतुर्थी | यस्मै | याभ्याम् | येभ्यः |
| पंचमी | यस्मात् | याभ्याम् | येभ्यः |
| षष्ठी | यस्य | ययोः | येषाम् |
| सप्तमी | यस्मिन् | ययोः | येषु |

### 2. यत् (जो स्त्री) (स्त्रीलिङ्गम्)

| | | | |
|---|---|---|---|
| प्रथमा | या | ये | याः |
| द्वितीया | याम् | ये | याः |
| तृतीया | यया | याभ्याम् | याभिः |
| चतुर्थी | यस्यै | याभ्याम् | याभ्यः |
| पंचमी | यस्याः | याभ्याम् | याभ्यः |
| षष्ठी | यस्याः | ययोः | यासाम् |
| सप्तमी | यस्याम् | ययोः | यासु |

### 3. यत् (जो वस्तु) (नपुंसकलिङ्गम्)

| | | | |
|---|---|---|---|
| प्रथमा | यत् | ये | यानि |
| द्वितीया | यत् | ये | यानि |

शेष रूप पुंल्लिग के समान होते हैं।

### 4. तत् (वह) (पुंल्लिङ्गम्)

| | | | |
|---|---|---|---|
| प्रथमा | सः | तौ | ते |
| द्वितीया | तम् | तौ | तान् |
| तृतीया | तेन | ताभ्याम् | तैः |

| | | | |
|---|---|---|---|
| **चतुर्थी** | तस्मै | ताभ्याम् | तेभ्यः |
| **पंचमी** | तस्मात् | ताभ्याम् | तेभ्यः |
| **षष्ठी** | तस्य | तयोः | तेषाम् |
| **सप्तमी** | तस्मिन् | तयोः | तेषु |

## 5. तत् (स्त्रीलिङ्गम्)

| | | | |
|---|---|---|---|
| **प्रथमा** | सा | ते | ताः |
| **द्वितीया** | ताम् | ते | ताः |
| **तृतीया** | तया | ताभ्याम् | ताभिः |
| **चतुर्थी** | तस्यै | ताभ्याम् | ताभ्यः |
| **पंचमी** | तस्याः | ताभ्याम् | ताभ्यः |
| **षष्ठी** | तस्याः | तयोः | तासाम् |
| **सप्तमी** | तस्याम् | तयोः | तासु |

## 6. तत् (नपुंसकलिङ्गम्)

| | | | |
|---|---|---|---|
| **प्रथमा** | तत् | ते | तानि |
| **द्वितीया** | तत् | ते | तानि |

शेष रूप पुंल्लिग के समान होते हैं।

## 7. किम् (कौन) (पुंल्लिङ्गम्)

| | | | |
|---|---|---|---|
| **प्रथमा** | कः | कौ | के |
| **द्वितीया** | कम् | कौ | कान् |
| **तृतीया** | केन | काभ्याम् | कैः |
| **चतुर्थी** | कस्मै | काभ्याम् | केभ्यः |
| **पंचमी** | कस्मात् | काभ्याम् | केभ्यः |
| **षष्ठी** | कस्य | कयोः | केषाम् |
| **सप्तमी** | कस्मिन् | कयोः | केषु |

## 8. किम् (स्त्रीलिङ्गम्)

| | | | |
|---|---|---|---|
| **प्रथमा** | का | के | काः |
| **द्वितीया** | काम् | के | काः |
| **तृतीया** | कया | काभ्याम् | काभिः |
| **चतुर्थी** | कस्यै | काभ्याम् | काभ्यः |
| **पंचमी** | कस्याः | काभ्याम् | काभ्यः |
| **षष्ठी** | कस्याः | कयोः | कासाम् |
| **सप्तमी** | कस्याम् | कयोः | कासु |

## 9. किम् (नपुंसकलिङ्गम्)

| | | | |
|---|---|---|---|
| **प्रथमा** | किम् | के | कानि |
| **द्वितीया** | किम् | के | कानि |

शेष रूप पुंल्लिग के समान होते हैं।

## 10. इदम् (यह) (पुंल्लिङ्गम्)

| | | | |
|---|---|---|---|
| प्रथमा | अयम् | इमौ | इमे |
| द्वितीया | इमम् | इमौ | इमान् |
| तृतीया | अनेन | आभ्याम् | एभिः |
| चतुर्थी | अस्मै | आभ्याम् | एभ्यः |
| पंचमी | अस्मात् | आभ्याम् | एभ्यः |
| षष्ठी | अस्य | अनयोः | एषाम् |
| सप्तमी | अस्मिन् | अनयोः | एषु |

## 11. इदम् (स्त्रीलिङ्गम्)

| | | | |
|---|---|---|---|
| प्रथमा | इयम् | इमे | इमाः |
| द्वितीया | इमाम् | इमे | इमाः |
| तृतीया | अनया | आभ्याम् | आभिः |
| चतुर्थी | अस्यै | आभ्याम् | आभ्यः |
| पंचमी | अस्याः | आभ्याम् | आभ्यः |
| षष्ठी | अस्याः | अनयोः | आसाम् |
| सप्तमी | अस्याम् | अनयोः | आसु |

## 12. इदम् (नपुंसकलिङ्गम्)

| | | | |
|---|---|---|---|
| प्रथमा | इदम् | इमे | इमानि |
| द्वितीया | इदम् | इमे | इमानि |

शेष रूप पुंल्लिग के समान होते हैं।

## 13. सर्व (सब) (पुंल्लिङ्गम्)

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | सर्वः | सर्वौ | सर्वे |
| द्वितीया | सर्वम् | सर्वौ | सर्वान् |
| तृतीया | सर्वेण | सर्वाभ्याम् | सर्वैः |
| चतुर्थी | सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः |
| पंचमी | सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्यः |
| षष्ठी | सर्वस्य | सर्वयोः | सर्वेषाम् |
| सप्तमी | सर्वस्मिन् | सर्वयोः | सर्वेषु |

सर्वनाम शब्दों में **सम्बोधन** नहीं होता।

## 14. सर्व (स्त्रीलिङ्गम्)

| | | | |
|---|---|---|---|
| प्रथमा | सर्वा | सर्वे | सर्वाः |
| द्वितीया | सर्वाम् | सर्वे | सर्वाः |
| तृतीया | सर्वया | सर्वाभ्याम् | सर्वाभिः |
| चतुर्थी | सर्वस्यै | सर्वाभ्याम् | सर्वाभ्यः |

| | | | |
|---|---|---|---|
| **पंचमी** | सर्वस्याः | सर्वाभ्याम् | सर्वाभ्यः |
| **षष्ठी** | सर्वस्याः | सर्वयोः | सर्वासाम् |
| **सप्तमी** | सर्वस्याम् | सर्वयोः | सर्वासु |

### 15. सर्व (नपुंसकलिङ्गम्)

| | | | |
|---|---|---|---|
| **प्रथमा** | सर्वम् | सर्वे | सर्वाणि |
| **द्वितीया** | सर्वम् | सर्वे | सर्वाणि |

शेष रूप पुल्लिग के समान होते हैं।

### 16. एतद् (यह) (पुंल्लिङ्गम्)

| | | | |
|---|---|---|---|
| **प्रथमा** | एषः | एतौ | एते |
| **द्वितीया** | एतम् | एतौ | एतान् |
| **तृतीया** | एतेन | एताभ्याम् | एतैः |
| **चतुर्थी** | एतस्मै | एताभ्याम् | एतेभ्यः |
| **पंचमी** | एतस्मात् | एताभ्याम् | एतेभ्यः |
| **षष्ठी** | एतस्य | एतयोः | एतेषाम् |
| **सप्तमी** | एतस्मिन् | एतयोः | एतेषु |

### 17. एतद् (स्त्रीलिङ्गम्)

| | | | |
|---|---|---|---|
| **प्रथमा** | एषा | एते | एताः |
| **द्वितीया** | एताम् | एते | एताः |
| **तृतीया** | एतया | एताभ्याम् | एताभिः |
| **चतुर्थी** | एतस्यै | एताभ्याम् | एताभ्यः |
| **पंचमी** | एतस्याः | एताभ्याम् | एताभ्यः |
| **षष्ठी** | एतस्याः | एतयोः | एतासाम् |
| **सप्तमी** | एतस्याम् | एतयोः | एतासु |

### 18. एतद् (नपुंसकलिङ्गम्)

| | | | |
|---|---|---|---|
| **प्रथमा** | एतत्, एतद् | एते | एतानि |
| **द्वितीया** | एतत्, एतद् | एते | एतानि |

शेष रूप पुंल्लिग के समान होते हैं।

### 19. अदस् (वह) (पुंल्लिङ्गम्)

| | | | |
|---|---|---|---|
| **प्रथमा** | असौ | अमू | अमी |
| **द्वितीया** | अमुम् | अमू | अमून् |
| **तृतीया** | अमुना | अमूभ्याम् | अमीभिः |
| **चतुर्थी** | अमुष्मै | अमूभ्याम् | अमीभ्यः |

| | | | |
|---|---|---|---|
| **पंचमी** | अमुष्मात् | अमूभ्याम् | अमीभ्य: |
| **षष्ठी** | अमुष्य | अमुयो: | अमीषाम् |
| **सप्तमी** | अमुष्मिन् | अमुयो: | अमीषु |

## 20. अदस् (स्त्रीलिङ्गम्)

| | | | |
|---|---|---|---|
| **प्रथमा** | असौ | अमू | अमू: |
| **द्वितीया** | अमुम् | अमू | अमू: |
| **तृतीया** | अमुया | अमूभ्याम् | अमूभि: |
| **चतुर्थी** | अमुष्यै | अमूभ्याम् | अमूभ्य: |
| **पंचमी** | अमुष्या: | अमूभ्याम् | अमूभ्य: |
| **षष्ठी** | अमुष्या: | अमुयो: | अमूषाम् |
| **सप्तमी** | अमुष्याम् | अमुयो: | अमूषु |

## 21. अदस् (नपुंसकलिङ्गम्)

| | | | |
|---|---|---|---|
| **प्रथमा** | अद: | अमू | अमूनि |
| **द्वितीया** | अद: | अमू | अमूनि |

शेष रूप पुंल्लिग के समान होते हैं।

## 22. अस्मद् (मैं, हम)

### उत्तम पुरुषवाचक सर्वनाम

| | | | |
|---|---|---|---|
| **प्रथमा** | अहम् | आवाम् | वयम् |
(Join the sentences by using 'ल्यप्' suffix in the underline word.)

**उदाहरणम्—** सुधा विहसति। सुधा मातरं वदति। (**सुधा <u>विहस्य</u> मातरं वदति।**)

उमा आचार्यं <u>प्रणमति</u>। उमा पृच्छति।

(क) प्रनम्य (ख) प्रणमयं (ग) प्रणम्य (घ) प्रणत्य

(*ii*) **रेखाङ्कितपदे 'तुमुन्' प्रत्ययं प्रयुज्य मञ्जूषाया: सहायतया वाक्यसंयोजनं क्रियताम्।**

(रेखांकित पद में वाक्य में 'तुमुन्' प्रत्यय का प्रयोग करके मंजूषा की सहायता से वाक्य जोड़िए।)

(Join the sentences by using 'तुमुन्' suffix in the underline word.)

**उदाहरणम्—** राघव: विद्यालयं गच्छति। राघव: सज्ज: भवति। (**राघव: विद्यालयं गन्तुं सज्ज: भवति।**)

विनय: क्रीडति। विनय: मित्रम् आह्वयति।

(क) क्रीडितुम् (ख) क्रीडतुम् (ग) क्रीडयितुम् (घ) क्रीडायितुम्

**8. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययविभागं कृत्वा लिखत।**

(निम्नलिखित वाक्यों में रेखांकित शब्दों के प्रकृति-प्रत्ययों का विभाग करके लिखिए।)

(In the following sentences, separate the origin word and suffix of the underlined words and write.)

(*i*) रमा विद्यालयं गत्वा पठति। .................... + क्त्वा।

(*ii*) छात्रा: पाठं पठित्वा क्रीडाक्षेत्रे क्रीडन्ति। .................... ।

(*iii*) सर्वान् जनान् दृष्ट्वा एव चलेत्। .................... + क्त्वा।

(*iv*) शीलभद्र: मातरं प्रणम्य विद्यालयं गच्छति। .................... + ल्यप्।

**9. रेखाङ्कितपदस्य स्थाने 'ल्यप्' प्रत्ययं प्रयुज्य वाक्यद्वयं योजयत।**

(रेखांकित शब्द के स्थान पर 'ल्यप्' प्रत्यय का प्रयोग करके दो वाक्यों को जोड़िए। Join the two sentences with the use of 'ल्यप्' suffix in the underline word.)

**यथा—** हरि: कविताम् आकर्णयति। हरि: लिखति। (**हरि: कविताम् आकर्ण्य लिखति।**)

श्याम: बसयानम् आरोहति। श्याम: आपणं गच्छति।

10. (*i*) **पूर्वक्रियायाम् 'ल्यप्' प्रत्ययं प्रयुज्य वाक्यद्वयं योजयत।**

(पहली क्रिया में 'ल्यप्' प्रत्यय का प्रयोग करके दोनों वाक्यों को जोड़िए।)

(Join the two sentences with the use of 'ल्यप्' suffix in the first verb.)

**यथा—** श्याम: बसयानम् आरोहति। श्याम: आपणं गच्छति। (**श्याम: बसयानम् आरुह्य आपणं गच्छति।**)

छात्र: गुरुम् प्रणमति। छात्र: पठति।

(*ii*) **रेखाङ्कितपदे 'तुमुन्' प्रत्ययं प्रयुज्य वाक्यद्वयं योजयत।**

(रेखांकित शब्द में 'तुमुन्' प्रत्यय का प्रयोग करके दोनों वाक्यों को जोड़िए।)

(Join the two sentences with the use of 'तुमुन्' suffix in the underline word.)

**यथा—** सीता पाठं पठति। सीता उपविशति। (**सीता पाठं पठितुम् उपविशति।**)

लता विद्यालयं गच्छति। लता सज्जा भवति।

(*iii*) **रेखाङ्कितपदे 'क्त्वा' प्रत्ययं प्रयुज्य वाक्यद्वयं योजयत।**

(रेखांकित शब्द में 'क्त्वा' प्रत्यय का प्रयोग करके दोनों वाक्यों को जोड़िए। Join the sentences with the use of 'क्त्वा' suffix in the underline word.)

**यथा—** बाल: आपणं गच्छति। बाल: शाकं क्रीणाति। (**बाल: आपणं गत्वा शाकं क्रीणाति।**)

बाल: पठति। बाल: क्रीडति।

11. (*i*) **रेखाङ्कितपदे उदाहरणानुसारं 'ल्यप्' प्रत्ययं प्रयुज्यवाक्यसंयोजनं क्रियताम्।**

(रेखांकित शब्द में उदाहरण के अनुसार 'ल्यप्' प्रत्यय का प्रयोग करके वाक्य-संयोजन कीजिए।)

(Join the sentences with the use of 'ल्यप्' suffix according to the example in the underline word.)

**यथा—** वानरः वृक्षम् आरोहति। सः जम्बुफलानि पातयति। (**वानरः वृक्षम् आरुह्य जम्बुफलानि पातयति।**)

देशभक्ताः मातृभूमिं प्रणमन्ति। ते देशं रक्षन्ति।

(*ii*) **रेखाङ्कितपदे उदाहरणमनुसृत्य 'क्त्वा' प्रत्ययं प्रयुज्यवाक्यसंयोजनं क्रियताम्।**

(रेखांकित शब्द में उदाहरणानुसार 'क्त्वा' प्रत्यय का प्रयोग करके वाक्य जोड़िए।)

(Join the sentences with the use of 'क्त्वा' suffix according to the example in the underline word.)

**यथा—** सुरेशः गच्छति। सः फलानि आनयति। (**सुरेशः गत्वा फलानि आनयति।**)

उषा खादति। सा भ्रमति।

(*iii*) **रेखाङ्कितपदे उदाहरणमनुसृत्य 'तुमुन्' प्रत्ययं प्रयुज्यवाक्यसंयोजनं क्रियताम्।**

(रेखांकित शब्द में उदाहरण के अनुसार 'तुमुन्' प्रत्यय का प्रयोग करके वाक्यों को जोड़िए।)

(Join the sentences with the use of 'तुमुन्' suffix according to the example.)

**यथा—** जनकः धनं प्रेषयति। सः धनादेशं कारयति। (**जनकः धनं प्रेषयितुम् धनादेशं कारयति।**)

सुलेखा आपणम् गच्छति। सा यानम् आरोहति।

12. **धातुभिः सह निर्दिष्टप्रत्ययान् योजयित्वा रिक्तस्थानानि पूरयत।**

(धातुओं के साथ निर्दिष्ट प्रत्ययों को जोड़कर खाली स्थान भरिए।)

(Join the indicated suffixes with verb stems and fill in the blanks.)

भक्ताः कथां **श्रु + तुमुन्** आगताः। = ........................ ।

13. **अधोलिखितवाक्येषु स्थूलपदानां प्रकृतिप्रत्ययविभागं चित्वा लिखत।**

(नीचे लिखे वाक्यों में स्थूल पदों के प्रकृति प्रत्ययों का विभाजन चुनकर लिखिए। In the following sentences, separate the origin words and suffixes of the bold words and write by the choosing of sufficient words.)

(*i*) श्यामः **कथयितुम्** तत्परः अस्ति।

(क) कथ् + तुम् (ख) कथ् + तुमुन् (ग) कथयि + तुम् (घ) कथि + तुमुन्

(*ii*) रामाय **दत्त्वा** खादत।

(क) दा + क्त्वा (ख) द + त्वा (ग) दा + क्त्वा (घ) दा + कतवा

(*iii*) देवं **प्रणम्य** पठ।

(क) प्र + नम् + ल्यप् (ख) प्रणम् + ल्यप् (ग) प्रणम + ल्यप् (घ) प्रनत् + ल्यप्

(*iv*) रमा विद्यालयं **गत्वा** पठति।

(क) गम् + कत्वा (ख) गम् + क्त्वा (ग) गम + क्त्वा (घ) ग + त्वा

(*v*) सीता पाठं **पठितुम्** उपविशति।

(क) पठि + तुम् (ख) पठ् + तुमुन् (ग) पठि + तुमुन् (घ) पठ + तुमुन्

14. (*i*) **उदाहरणानुसारं 'क्त्वा' प्रत्यय-युक्तं पदं चित्वा वाक्यसंयोजनं क्रियताम्।**

(उदाहरण के अनुसार 'क्त्वा' प्रत्यय युक्त पद को चुनकर वाक्य जोड़िए।)

(Join the sentences with the use of 'क्त्वा' suffix according to the example.)

**उदाहरण**—अहं गृहं गच्छामि। अहं पाठं पठामि। (**अहं गृहं गत्वा पठामि।**)

छात्रः कवितां स्मरति। सः कवितां गायति।

(क) स्मृत्वा (ख) स्मरित्वा

(ग) स्मृरित्वा (घ) समित्वा

(*ii*) **उदाहरणानुसारं 'ल्यप्' युक्तं पदं चित्वा प्रयुज्य वाक्यसंयोजनं क्रियताम्।**

(उदाहरण के अनुसार 'ल्यप्' प्रत्यय युक्त पद को चुनकर वाक्य-संयोजन कीजिए।)

(Join the sentences with the use of 'ल्यप्' suffix according to the example.)

**उदाहरण**—भक्तः देवालयं प्रविशति। सः देवं पूजयति। (**भक्तः देवालयं प्रविश्य देवं पूजयति।**)

बालिका पितरौ प्रणमति। सा विद्यालयं गच्छति।

(क) प्रणमय (ख) प्रणम्य

(ग) प्रणाम्य (घ) प्राणम्य

(*iii*) **उदाहरणानुसारं 'तुमुन्' प्रत्ययं प्रयुज्य वाक्यसंयोजनं क्रियताम्।**

(उदाहरण के अनुसार 'तुमुन्' युक्त पद को चुनकर वाक्य-संयोजन कीजिए।)

(Join the sentences with the use of 'तुमुन्' suffix according to the example.)

**उदाहरण**— बालः आपणं गच्छति। सः सज्जः भवति। (**बालः आपणं गन्तुम् सज्जः भवति।**)

पथिकः स्नाति। पथिकः सरोवरं प्रति गच्छति।

15. **रेखाङ्कितपदे दत्तं प्रत्ययं प्रयुज्य वाक्यसंयोजनं कुरुत।**

(रेखांकित पद में दिए गए प्रत्ययों का प्रयोग करके वाक्यों को जोड़िए।)

(Join the sentences with the use of the suffixes given in the brackets in the underline words.)

**उदाहरणम्**— बालकः पठति। सः विद्यालयं गच्छति। (तुमुन्) (**बालकः पठितुं विद्यालयं गच्छति।**)

(*i*) भावना धावति। भावना उद्यानं गच्छति। (तुमुन्)

(*ii*) शिष्यः गुरुम् उपगच्छति। शिष्यः कथयति। (ल्यप्)

(*iii*) सुधा पठति। सा क्रीडति। (क्त्वा)

16. **अधोलिखितवाक्येषु स्थूलपदानां प्रकृतिप्रत्ययविभागं कुरुत।**

(नीचे लिखे वाक्यों में स्थूल शब्दों की प्रकृति व प्रत्यय का विभाग कीजिए)

(In the following sentences, separate the origin words and suffixes of the bold words.

(*i*) अहम् कुपथं **परित्यज्य** सुपथं ग्रहीष्यामि।

(*ii*) रामः क्रीडकानि **क्रेतुम्** गमिष्यति।

(*iii*) सेवकः नृपं **प्रणम्य** उपविशति।

(*iv*) भटः अञ्जलिं **बन्ध् + क्त्वा** नृपं नमति।

(*v*) राजा प्रतापः स्वप्राणैः स्वदेशं स्वतन्त्रं **कर्तुम्** इच्छति स्म।

17. **निर्देशम् अनुसृत्य उदाहरणानुसारं प्रत्ययं संयोज्य वाक्यसंयोजनं क्रियताम्।**

(निर्देश के अनुसार उदाहरण को देखकर प्रत्यय जोड़कर वाक्यों का संयोजन कीजिए।)

(Join the sentences with the use of the suffixes as the example according to the instruction.)

(*i*) **पूर्ववाक्यस्य रेखाङ्कितपदे 'क्त्वा' प्रत्ययं प्रयुज्यवाक्यं संयोजयत।**

(पहले वाक्य के रेखांकित पद में 'क्त्वा' प्रत्यय जोड़कर वाक्यों को जोड़िए।)

(Join the sentences with 'क्त्वा' suffix in the first sentence in the underline word.)

**यथा—** रमेशः पठति। रमेशः खेलति (**रमेशः पठित्वा खेलति।**)

दिनेशः भोजनं खादति। दिनेशः स्वपिति।

(*ii*) **उदाहरणमनुसृत्य 'तुमुन्' प्रत्यय—प्रयोगं कृत्वा वाक्यसंयोजनं क्रियताम्।**

(उदाहरण को देखकर 'तुमुन्' प्रत्यय का प्रयोग करके वाक्यों को जोड़िए।)

(Join the sentences according to the example with the use of 'तुमुन्' suffix.)

**यथा—** रामः विद्यालयं गच्छति। रामः बसयानम् आरोहति। (**रामः विद्यालयं गन्तुं बसयानम् आरोहति।**)

जनः मुम्बापुरीं गच्छति। जनः रेलयानम् आरोहति।

18. **उदाहरणानुसारं निर्देशानुसारं वाक्यानि लिखत।**

(उदाहरण के अनुसार निर्देशों का पालन करते हुए वाक्यों को लिखिए।)

(Write the sentences following the instructions according to the example.)

**I. पूर्ववाक्ये 'क्त्वा' प्रत्ययं प्रयुज्य वाक्य-संयोजनं कुरुत।**

(पहले वाक्य में 'क्त्वा' प्रत्यय प्रयोग करके वाक्यों को जोड़िए।)

(Join the sentences in the first sentence using 'क्त्वा' suffix.)

**यथा–** दिव्या पठति। दिव्या लिखति। (**दिव्या पठित्वा लिखति**)

सुरेशः आपणं गच्छति। सुरेशः मिष्टान्नम् आनयति।

**II. पूर्ववाक्ये 'तुमुन्' प्रत्ययं प्रयुज्य वाक्यं पुनः लिखत।**

(पहले वाक्य में 'तुमुन्' प्रत्यय को जोड़कर वाक्य फिर लिखिए।)

(Write again the sentence using 'तुमुन्' suffix in the first sentence.)

**यथा–** ऋचा मातरं सेवते। ऋचा ग्रामं गच्छति। (**ऋचा मातरं सेवितुं ग्रामं गच्छति**)

छात्रः पत्रं प्रेषयति। छात्रः पत्रालयं गच्छति।

19. **I. उदाहरणमनुसृत्य पूर्ववाक्यस्य रेखाङ्किते पदे ''ल्यप्'' प्रत्ययं प्रयुज्य वाक्यसंयोजनं क्रियताम्।**

(उदाहरण के अनुसार पहले वाक्य के रेखांकित पद में 'ल्यप्' प्रत्यय का प्रयोग करके वाक्य-संयोजन कीजिए। Join the sentences with the use of 'ल्यप्' suffix acording to the example in the first sentence.)

**उदाहरणम्–** सुधा विहसति। सुधा मातरं वदति।

सुधा विहस्य मातरं वदति।

उमा आचार्यम् प्रणमति। उमा पृच्छति।

**II. पूर्ववाक्ये ''तुमुन्'' प्रत्ययं प्रयुज्य वाक्यसंयोजनं क्रियताम्।**

(पहले वाक्य में ''तुमुन्'' प्रत्यय को जोड़कर वाक्य-संयोजन कीजिए।)

(Join the sentences using ''तुमुन्'' suffix in the first sentences.)

**उदाहरणम्–** राघवः विद्यालयं गच्छति। राघवः सज्जः भवति।

राघवः विद्यालयं गन्तुं सज्जः भवति।

विनयः क्रीडति। विनयः मित्रम् आह्वयति।

***20. निम्नलिखितान् स्थूलपदेषु प्रत्यान् विभज्य शुद्धं पदं चिनुत।**

(निम्नलिखित **मोटे** पद में दिए गए प्रत्ययों का विभाजन करके शुद्ध पद को चुनकर लिखिए।)

(Choose the right **bold** words after separating the suffixes.)

1. **स्मरन्** मा वद।

(क) स्मर + न् (ख) स्मृ + शतृ (ग) स्मृ + अत (घ) स्मृ + क्त

2. अध्यापकः **प्रकुपितः** अस्ति।

(क) प्र + कुप + क्त (ख) प्रकुप् + कत (ग) प्रकुप + कत (घ) प्र + कुप् + क्त

3. सः जीवनम् धर्मरक्षायै **समर्पितवान्**।

(क) सम् + अर्प + क्तवतु (ख) सम् + अर्प् + क्तवतु (ग) समर्प + वान् (घ) समर्प् + तवान्

4. हिडिम्बा नरमांस**लुब्धा** आसीत्।

(क) लुभ् + क्त (ख) लभ् + क्त (ग) लभ् + धा (घ) लुभ् + धा

5. सीताम् रामः **मिलितवान्**।

(क) मिल् + कतवत् (ख) मिल् + क्तवतु (ग) मिल् + त्वान् (घ) मिल् + तवत्

6. स्वदेशम् परित्यज्य कुत्र **प्रस्थितः** ?

(क) प्र + स्था + क्त (ख) प्रस्था + य (ग) प्रस्था + कत (घ) प्र + स्थ + क्त

7. सर्वे **भीताः** आसन्।

(क) भि + क्त (ख) भी + क्त (ग) भी + कत (घ) भि + क्त्

8. चलचित्रं **पश्यन्** प्रसीदति।

(क) दृश् + शत् (ख) दृश् + क्त्वा (ग) दृश् + शतृ (घ) दृश् + शन्

***21. निम्नलिखितान प्रकृतिप्रत्ययान् योजयित्वा शुद्धं पदं चिनुत।**

(निम्नलिखित प्रकृति-प्रत्ययों को जोड़कर शुद्ध पद चुनिए। Choose the right word after joining the suffixes.)

1. फलम् **लभ् + शानच्** बाला प्रसीदति।

(क) लभमाना (ख) लभमानाः (ग) लभमानः (घ) लभमानम्

2. रामः शिवम् **पूज् + क्तवतु**।

(क) पूजतवान् (ख) पूजितवान् (ग) पूजितवात् (घ) पूजितवती

*नोटः* ***नवमी कक्षा के नवीन पाठ्यक्रम में ये प्रत्यय नहीं हैं।**

3. सः किम् अत्र **कृ + क्तवतु**।

(क) कृतवत् (ख) कृतवान् (ग) कृतवती (घ) कृतवन्तः

4. देशम् **रक्ष्** + **शतृ** सैनिकाः सीमाम् अधिवसन्ति।

(क) रक्षतः (ख) रक्षन् (ग) रक्षत् (घ) रक्षन्तः

5. सः लेखम् **लिख्** + **क्तवतु**।

(क) लिखितवान् (ख) लिखितवत् (ग) लिखितवती (घ) लिखितबन्तः

6. भक्तः देवम् **सेव्** + **क्तवतु**।

(क) सेवितवान् (ख) सेवितवती (ग) सेवितवत् (घ) सेवितः

7. तदैव वृष्टिः **आ** + **रभ्** + **क्त**।

(क) आरब्धा (ख) आरब्धम् (ग) आरब्धः (घ) आरब्ध

8. सः **श्रु** + **क्तवतु** वर्तते।

(क) श्रूतवत् (ख) श्रुतवन्तः (ग) श्रुतवान् (घ) श्रुतवती

9. का समस्या **उप** + **स्था** + **क्त**।

(क) उपस्थितः (ख) उपस्थितम् (ग) उपस्थिता (घ) उपस्थित

10. सा **चल्** + **क्तवतु**।

(क) चलितवती (ख) चलितवान् (ग) चलितवत् (घ) चलितवन्तः

11. सत्यमेव **कथ्** + **क्त**।

(क) कथितम् (ख) कथिताः (ग) कथिता (घ) कथितः

12. तत्र एकः पण्डितः **आ** + **गम्** + **क्त**।

(क) आगत (ख) आगतः (ग) आगता (घ) आगतम्

13. **भ्रम्** + **शतृ** सः परिश्रान्तः अभवत्।

(क) भ्रमत् (ख) भ्रमता (ग) भ्रमन् (घ) भ्रमन्तः

14. किम् **रुच्** + **शानच्** ते प्रसीदन्ति।

(क) रोचमाणाः (ख) रोचमाणा (ग) रोचमाणं (घ) रोचमाणः

15. त्वम् **चल्** + **शानच्** चक्रम् पश्य।

(क) चल्यमान (ख) चल्यमानं (ग) चल्यमाना (घ) चल्यमानाः

16. सः **मुच्** + **क्त** अभवत्।

(क) मुचक्तः (ख) मुक्तः (ग) मोचितः (घ) मोचितम्

17. तेन किम् **शिक्ष्** + **क्त**।

(क) शिक्षितम् (ख) शिक्षितः (ग) शिक्षिताः (घ) शिक्षिता

18. गुरुः छात्रान् **प्रच्छ्** + **क्तवतु**।

(क) पृष्टवान् (ख) पृष्टवत् (ग) पृच्छवान् (घ) पृच्छवती

19. सः पुस्तकम् **क्रीण्** + **क्तवतु**।

(क) क्रीतवान् (ख) क्रितवान् (ग) कृतवान् (घ) कीतवान्

20. **पत्** + **शतृ** पत्रम् पश्य।

(क) पतन् (ख) पतत् (ग) पतत (घ) पतद्

21. छात्रः **हस् + क्तवतु**।

(क) हसितवत् (ख) हसितवान (ग) हसितवान् (घ) हसितवती

22. कालिदासेन **रच् + क्त** एतन्नाटकम्।

(क) रचितः (ख) रचितम् (ग) रचितन् (घ) रचिता

23. भवान् शत्रुम् **जि + क्तवतु**।

(क) जितवत् (ख) जितवान् (ग) जीतवत् (घ) जीतवान्

24. कार्यम् **कृ + शानच्** जनं मा वद।

(क) कुर्वाणम् (ख) कुर्वाणः (ग) कुर्वाणा (घ) कुर्वाण

## बोर्ड द्वारा वार्षिक परीक्षायै प्रदत्ताः प्रश्नाः

**प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा चिन्हत–**

1. सज्जनाः विचार्य एव कार्यं कुर्वन्ति। [CBSE 2010]
(क) वि + चर् + ल्यप् (ख) वि + चार् + ल्यप् (ग) वि + चर + य (घ) वि + चर् + लप्
2. छात्रः शिक्षकं प्रणम्य गच्छति। [CBSE 2011]
(क) प्र + णम् + ल्यप् (ख) प्रण + म्यप् (ग) प्र + नम् + ल्यप् (घ) प्रनम + ल्यप्
3. रमा वि + हस् + ल्यप् वार्तालापं करोति। [CBSE 2011]
(क) विहस्य (ख) विहसय (ग) विहाय (घ) विहृस्य
4. सेवकः नृपं प्र + नम् + ल्यप् उपविशति। [CBSE 2011]
(क) प्रणम्य (ख) प्रणत्वा (ग) प्रणमितुम् (घ) प्रणयन्
5. सैनिकः सीमाप्रदेशं प्राप्य देशं रक्षन्ति। [CBSE 2011]
(क) प्राप् + यप् (ख) प्र + आप् + ल्यप् (ग) प्र + ल्यप् (घ) प्राप् + य
6. आलस्यं वि + हा + ल्यप् उद्यमं कुरु। [CBSE 2011]
(क) विहाय (ख) वीहाय्य (ग) विहत्वा (घ) विहातुम्
7. त्वं समाचारं वि + ज्ञा + ल्यप् गच्छ। [CBSE 2011]
(क) विज्ञाय (ख) विज्ञातम् (ग) विज्ञातुम् (घ) विज्ञात्वा
8. छात्रः पुस्तकालयम् आ + गम् + ल्यप् पठति। [CBSE 2011]
(क) आगम्य (ख) आगत्वा (ग) आगन्तुम् (घ) आगतः
9. छात्राः विद्यालयं प्रविश्य गुरुं नमन्ति। [CBSE 2011]
(क) प्र + विश् + ल्यप् (ख) प्रविशय + ल्यप् (ग) प्रा + विश् + ल्यप् (घ) प्र + विश्य् + ल्यप्

**रेखाङ्कितपदेषु प्रकृति-प्रत्ययोः संयोज्य विभज्य वा उत्तरं लिखत।**

1. श्वेतकेतुः वेदान् अधीत्य गृहम् प्रत्यागच्छत्। [CBSE 2012]
2. साधुः गङ्गायाम् स्नात्वा देवालयम् गच्छति। [CBSE 2012]
3. शुकः फलम् खादितुं वृक्षे तिष्ठति। [CBSE 2014]
4. अहं नृत् + क्त्वा जलं पिबामि। [CBSE 2014]
5. रमेश मातुलं द्रष्टुं गच्छति। [CBSE 2014]

6. अष्टावक्रं <u>वि+ ईक्ष् + ल्यप्</u> पण्डिताः अहसन्। [CBSE 2014]

7. वानरः फलानि <u>भक्ष् + तुमुन्</u> वृक्षम् आरोहति। [CBSE 2014]

8. छात्रः प्रश्नान् <u>अवगम्य</u> उत्तराणि लिखति। [CBSE 2014]

9. माता दूरे <u>स्थित्वा</u> शिशुं पश्यति। [CBSE 2014]

10. रामः भरतं राज्यं <u>पालयितुम्</u> आदिशत्। [CBSE 2014, 2016]

11. सः मित्रस्य गृहसंकेतं <u>विस्मृत्य</u> इतस्ततः पश्यति। [CBSE 2014, 2016]

12. शिशुः कथाम् <u>उक्त्वा</u> सर्वान् प्रीणयति। [CBSE 2014, 2016]

13. त्वं भोजनं <u>कृ + क्त्वा</u> पाठं पठ। [CBSE 2014, 2016]

14. सा गृहं <u>प्र + आप् + ल्यप्</u> विश्राम्यति। [CBSE 2014, 2016]

15. वानराः शीते प्र + कम्प् + ल्यप् विश्राम्यन्ति। [CBSE 2014, 2016]

16. मयूराः ( नृत् + क्त्वा ) .................................... वृक्षे विश्राम्यन्ति। [CBSE 2016]

17. छात्राः पुस्तकानि <u>आ + दा + ल्यप्</u> .................................... पंक्तिबद्धाः तिष्ठन्ति। [CBSE 2016]

18. पुत्रः पितरौ <u>प्रणम्य</u> ( ........................+........................ ) विद्यालयं गच्छति। [CBSE 2016]

19. प्रातराशं <u>कृ + क्त्वा</u> ( .................................... ) छात्राः विद्यालयं गच्छन्ति। [CBSE 2016]

20. गंगाजले <u>प्र + विश्+ल्यप्</u> ( ................................ ) भक्ताः ध्यानं कुर्वन्ति। [CBSE 2016]

21. ग्रीष्मकाले जनाः शीतलपेयम् <u>पा + तुमुन्</u> ( ................................ ) इच्छन्ति। [CBSE 2016]

22. प्राचार्यं <u>नत्वा</u> ( ....................+.................... ) छात्राः कक्षायां प्रविशन्ति। [CBSE 2016]

23. श्वेतकेतुः उपाध्यायम् <u>उपगम्य</u> ( ....................+.................... ) वेदान् अधीतवान्। [CBSE 2016]

24. समाचारान् <u>श्रु + तुमुन्</u> ( ....................+.................... ) अहं दूरदर्शनं पश्यामि। [CBSE 2016]

## विशेषाः नवीनाः प्रश्नाः

**1. प्रत्यय संयुज्य वियुज्य वा लिखत–**

(*i*) दृश् + क्त्वा = ....................................

(*ii*) प्रणम्य = ....................................

(*iii*) उपविश्य = ....................................

(*iv*) सोढुम् = ....................................

(*v*) सह् + क्त्वा = ....................................

(*vi*) आ + नी + ल्यय् = ....................................

**2. अधोलिखितवाक्येषु कोष्ठके प्रदत्तधातुषु क्त्वा/ल्यप्/तुमुन्प्यो-प्रगेण निष्पन्नपदैः रिक्तस्थानानि पूरयत–**

यथा– सः पुस्तकम् <u>आदाय</u> (आ + दा + ल्यप्) गच्छति।

सः पुस्तकं <u>दत्त्वा</u> (दा + क्त्वा) क्रीडति।

(*i*) रामः कन्दुकम् ........................ (आ + नी + ल्यप्) क्रीडति।

(*ii*) श्यामः कन्दुकम् ........................ (नी + क्त्वा) गच्छति।

(*iii*) रामः कन्दुकम् ........................... (ग्रह् + तुमुन्) श्यामम् अनुधावति।

(*iv*) श्यामः ........................... (वि + हस् + ल्यप्) कन्दुकम् ददाति।

(*v*) रामः कन्दुकम् ........................... (प्र + आप् + ल्यप्) पुनः प्रसन्नः भवति।

**3. उदाहरणमनुसृत्य स्थूलपदेषु धातून् प्रत्ययान् च वियुज्य लिखत–**

**यथा–** बालकः गुरुं **नत्वा** गच्छाति। **नम् + क्त्वा**

(*i*) सः अत्र **आगत्य** पठति। ...........................

(*ii*) त्वं कुत्र **गत्वा** क्रीडसि। ...........................

(*iii*) बालकः **विहस्य** वदति। ...........................

(*iv*) त्वं पुस्तकं **क्रेतुम्** गच्छसि। ...........................

(*v*) छात्रः **पठितुं** विद्यालयं गच्छति। ...........................

(*vi*) नायकः निर्देशकं **द्रष्टुं** गच्छति। ...........................

**4. क्त्वाप्रत्ययस्य प्रयोगेण वाक्यानि संयोजयत–**

**यथा–** बालिका उद्यानं गच्छति। बालिका क्रीडिष्यति।

**बालिका उद्यानं गत्वा क्रीडिष्यति।**

(*i*) अहम् विद्यालयं गच्छामि। अहं पठिष्यामि।

(*ii*) सीता पुस्तकं पठति। सा ज्ञानं प्राप्स्यति।

(*iii*) सः आपणं गच्छति। सः पुस्तकं क्रेष्यति।

(*iv*) रमेशः पुस्तकालयमगच्छत्। सः समाचारपत्रं पठति।

(*v*) देवदत्तः पाकशालामगच्छत्। सः भोजनं करोति।

**5. तुमुन्प्रत्ययस्य योगेन वाक्यानि संयोजयत–**

**यथा–** बालिका क्रीडिष्यति। सा उद्यानं गच्छति।

**बालिका क्रीडितुम् उद्यानं गच्छति।**

(*i*) अहम् पठिष्यामि। अहं पुस्तकं क्रीणामि।

(*ii*) बालिका परीक्षायाम् उत्तमानि अङ्कानि प्राप्स्यति। सा परिश्रमेण पठति।

(*iii*) निशा क्रीडिष्यति। सा आपणात् कन्दुकमानयति।

(*iv*) माता भोजनं पचति। सा शाकमानयत्।

(*v*) आचार्यः पाठयति। सः कक्षामगच्छत्।

(*'व्याकरण वीथितः' साभारः*)

# ग 7 उपसर्गाः

## उपसर्ग की परिभाषा

**शब्दों अथवा धातु रूपों तथा धातु से निष्पन्न शब्दरूपों से पूर्व प्रयुक्त होकर उनके अर्थ का परिवर्तन करने वाले शब्दों को उपसर्ग कहते हैं अर्थात् उपसर्गों के प्रयोग से मूलशब्दों अथवा धातुओं के अर्थों में परिवर्तन हो जाता है।**

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।
प्रहाराहार-संहार-विहार-परिहारवत्।।

उपसर्गों के जुड़ने से पद का अर्थ बदल जाता है, यथा–हार शब्द का अर्थ–'माला' परन्तु जब उसमें 'प्र' उपसर्ग लगता है तो शब्द बनता है 'प्रहार' और उसका अर्थ होता है–मारना। इसी प्रकार 'आ' उपसर्ग लगने पर 'आहार' बनता है, जिसका अर्थ है–भोजन। इसी प्रकार यदि 'हार' शब्द में 'सम्' उपसर्ग जुड़ता है तो 'संहार' शब्द बनता है जिसका अर्थ है नष्ट करना, परन्तु इसी शब्द में 'वि' उपसर्ग लगने पर 'विहार' शब्द बनता है जिसका अर्थ होता है–घूमना-फिरना। इसी तरह 'परि' उपसर्ग जुड़कर 'परिहार' शब्द बनता है जिसका अर्थ होता है–सुधार करना/त्याग करना। इस प्रकार हमने देखा कि अलग-अलग उपसर्गों के जुड़ने से शब्दों के अर्थों में परिवर्तन आ जाता है। उपसर्गों का स्वतंत्र प्रयोग नहीं होता।

| उपसर्गप्रयोगेण शब्दनिर्माणम् | एकस्य पदस्य वाक्यप्रयोगः |
|---|---|
| 1. प्र–प्रभवति, प्रकर्षः, प्रयत्नः प्रतिष्ठा | तस्य प्रयत्नः कदापि वृथा न भविष्यति। |
| 2. परा–पराजयते, पराभवति | रामः राक्षसान् पराजयते। |
| 3. अप–अपहरति, अपकरोति | दुष्टः सज्जनान् सदैव अपकरोति। |
| 4. सम्–संस्करोति, संगच्छते | अध्यापकः छात्रान् संस्करोति। |
| 5. अनु–अनुगच्छति, अनुसरति | शिष्यः गुरुम् अनुसरति। |
| 6. अव–अवगच्छति, अवतरति | पाणिनिः व्याकरणम् अवगच्छति। |
| 7. निर्–निर्गच्छति, निराकरोति | अधिकारी स्वकार्यालयात् निर्गच्छति। |
| 8. निस्–निश्चयम्, निस्सरति | देवाः परोपकारस्य निश्चयं कुर्वन्ति। |
| 9. दुस्–दुस्त्याज्यः, दुस्साध्यम् | प्राणिनां स्वभावः दुस्त्याज्यः भवति। |
| 10. दुर्–दुर्बोध्यः, दुर्लभम् | विद्यारत्नं संसारे दुर्लभं वर्तते। |
| 11. वि–विजयते, विहरति | सत्यं सदा विजयते। |
| 12. आङ्–आकण्ठम्, आजीवनम् | तस्मै आजीवनं करावासं प्राप्तम्। |
| 13. नि–निगदति, निपतति | बालकः मातुः क्रोडात् अपः निपतति। |
| 14. अधि–अधिराजते, अधिशेते | विद्वान् सर्वत्र अधिराजते। |

| | |
|---|---|
| 15. अति–अतिकथनम्, अत्याचारः | अत्याचारः कदापि न कर्तव्यः। |
| 16. सु–सुपुत्रेण, सुशोभते | सुपुत्रेण कुलं शोभते। |
| 17. उत्–उड्डयते, उत्थानम् | दीनजनानाम् उत्थानं पुण्यं भवति। |
| 18. अभि–अभिगच्छति, अभ्यागतः | अभ्यागतः सर्वैः सदा पूजनीयः। |
| 19. प्रति–प्रत्युपकारः, प्रत्यवदत् | संसारे जनैः प्रत्युपकारः सदैव कर्तव्यः। |
| 20. परि–परित्यजामि, परिवर्तनम् | विद्यया जनजीवने परिवर्तनं भवति। |
| 21. उप–उपगच्छति, उपहरति | पुत्रः भोजनार्थं मातरम् उपगच्छति। |
| 22. अपि–अपिदधाति/अप्यधानम् | अग्नौ सामग्रीम् अप्याधानं सदैव कर्तव्यम्। |

किसी भी धातु में उपसर्ग जुड़ने से अर्थ-परिवर्तन होता जाता है, यथा–

*√गम्–जाना

आ + √गम् – आना

उप + √गम् – पास जाना

अनु + √गम् – पीछे जाना

अव + √गम् – समझना

यहाँ हमें यह भी ध्यान रखना आवश्यक है कि जब हमें किसी उपसर्ग युक्त धातु का वाक्य में प्रयोग करने की आवश्यकता पड़ती हैं, तब धातुरूप के सामान्य प्रयोग में ही पदनिर्माण करने के पश्चात् निर्मित पद में उपसर्ग को सन्धि-नियमों के अनुसार जोड़ना चाहिए, यथा–

| लकार | धातुरूप | उपसर्ग + धातुरूप |
|---|---|---|
| लट् गम् | गच्छति | अनुगच्छति |
| लृट् | गमिष्यति | अनुगमिष्यति |
| लङ् | अगच्छत् | अनुअगच्छत्-अन्वगच्छत् (यण् सन्धि) |
| लोट् | गच्छतु | अनुगच्छतु |
| विधिलिङ् | गच्छेत् | अनुगच्छेत् |

## अभ्यासः

**1. अधोलिखितेषु पदेषु उपसर्गान् धातून् च पृथक् कृत्वा लिखत–**

(नीचे लिखे पदों में उपसर्गों और धातुओं को अलग करके लिखिए।)

| | उपसर्ग | धातु | क्रियापद |
|---|---|---|---|
| (*i*) उत्तिष्ठति | ...................... | ...................... | ...................... |
| (*ii*) निरगच्छन् | ...................... | ...................... | ...................... |
| (*iii*) निस्सरतु | ...................... | ...................... | ...................... |

| | | | |
|---|---|---|---|
| (*iv*) संवदन्ति | ...................... | ...................... | ...................... |
| (*v*) प्रत्यवदत् | ...................... | ...................... | ...................... |
| (*vi*) सुशोभते | ...................... | ...................... | ...................... |
| (*vii*) विशिष्यते | ...................... | ...................... | ...................... |
| (*viii*) अनुकरोति | ...................... | ...................... | ...................... |
| (*ix*) प्रसीदत | ...................... | ...................... | ...................... |
| (*x*) अवागच्छ: | ...................... | ...................... | ...................... |
| (*xi*) उपविशामि | ...................... | ...................... | ...................... |
| (*xii*) उत्थापयामि | ...................... | ...................... | ...................... |
| (*xiii*) उन्नयति | ...................... | ...................... | ...................... |
| (*xiv*) अपाकुर्व | ...................... | ...................... | ...................... |
| (*xv*) विजयते | ...................... | ...................... | ...................... |
| (*xvi*) परितुष्यति | ...................... | ...................... | ...................... |

**2. कोष्ठकात् शुद्धपदानि चित्वा रिक्तस्थाने लिखत–**

(कोष्ठक से शुद्ध शब्दों को चुनकर खाली जगह को भरिए)

(*i*) हे प्रभो! मयि ................................................ । (प्रासीदतु/प्रसीदतु)

(*ii*) गुरु: शिष्यस्य अज्ञानम् ................................................। (उपहरति/अपहरति)

(*iii*) वानरा: जनान् ................................................। (अनुकुर्वन्ति/अन्वकुर्वन्ति)

(*iv*) अहं संस्कृतम् ................................................। (अवजानामि/अवाजानामि)

(*v*) ................................................सत्यम् एव वदनीयम्। (आजीवनम्/आजीवन:)

(*vi*) अध्यापक: प्रश्नान् पृच्छति। छात्रा: ................................................। (प्रतिवदन्ति/संवदन्ति)

(*vii*) कामात् क्रोध: ................................................। (पराभवति/उद्‌भवति)

(*viii*) सभायाम् विद्वांस: एव ................................................। (सुशोभन्ते/सुशोभन्ति)

(*ix*) चौर: रात्रौ धनम् ................................................। (व्यहरत्/अहरत्)

(*x*) माता पुत्र: च परस्परम् ................................................। (प्रतिवदत:/संवदत:)

(*xi*) गुरु: आश्रमात् ................................................। (प्रविशति/निर्गच्छति)

(*xii*) नागरिका: एव स्वदेशम् ................................................। (उद्रयन्ति/उन्नयन्ति)

(*xiii*) वयं चलच्चित्रं द्रष्टुम् अत्र ................................................। (अवागच्छाम/आगच्छाम)

(*xiv*) माता पुत्रम् ................................................। (संस्करोति/समकरोति)

(*xv*) नदी पर्वतात् ................................................। (प्रवहति/उद्‌भवति)

3. (*i*) **'हार:'**, **'योग:'** इति शब्दाभ्याम् सह अधोलिखितान् उपसर्गान् संयुज्य प्रत्येकं पदद्वयस्य निर्माणं कुरुत। निर्मितैः पदैः च सार्थकवाक्यानि रचयत–

('**हार:**', '**योग:**' इन दोनों शब्दों के साथ नीचे लिखे उपसर्गों को जोड़कर प्रत्येक से दो-दो शब्दों को बनाइए और बने हुए शब्दों से सार्थक वाक्यों का निर्माण कीजिए।)

उपसर्गा:–आ, वि, प्र, सम्।

(*ii*) **'भू'** **'हृ'**, इति एताभ्याम् धातुभ्याम् प्राक् अधोलिखितान् उपसर्गान् संयुज्य प्रत्येकं पदद्वयस्य निर्माणं कुरुत। निर्मितैः पदैः च सार्थकवाक्यानि रचयत–

('**भ**', '**हृ**' इन धातुओं के पहले नीचे लिखे उपसर्गों को जोड़कर प्रत्येक से दो-दो शब्दों का निर्माण करें और बनाए गए शब्दों से सार्थक वाक्यों को बनाएँ।)

उपसर्गा:–प्र, अनु, सम्

(*iii*) **'लेख:'** **'गच्छति'**, इति शब्दाभ्याम् सह निम्नलिखितान् उपसर्गान् प्रयुज्य द्वि पदयोः निर्माणं कुरुत सहैव तयोः प्रयोगं कृत्वा द्विवाक्ययोः निर्माणं कुरुत।

('**लेख:**', '**गच्छति**' इन दो शब्दों के साथ निम्नलिखित उपसर्गों को जोड़कर दो शब्दों की रचना करें साथ ही उनका प्रयोग करके दो वाक्यों का भी निर्माण कीजिए।)

उपसर्गा:–उत्, निर्, अव।

(*'व्याकरण वीथित:' साभार:*)

# ग अनुप्रयुक्तं व्याकरणस्य विचारबिन्दवः

**विषयः — वर्णमाला** **उपविषयः — उच्चारणस्थानानि**

- **कार्यकलापः—( प्रथमः ) : वर्णानाम् उच्चारणं केन स्थानेन भवति इति ज्ञानम्।**

  - **उद्देश्यम्** : वर्णानाम् उच्चारणस्य स्थानानि ज्ञात्वा तेषां शुद्धम् उच्चारणं कथं भवेत् अथवा अशुद्धम् उच्चारणं कथं शुध्येत् इत्यर्थं प्रयासं करणम्।
  - **कौशल-विकासः** : अस्य पाठस्य अध्ययनेन वर्णानां शुद्धोच्चारणं, वर्णनिर्माणं **मूल्याङ्कनम् वा**-तेषां च प्रकृतिः अपि ज्ञायन्ते। अतः संभाषणे भविष्ये कदापि उच्चारण दोषः न भवति।
  - **अवधिः** : पञ्चदशकला परिमितम् ( 15 मिनट)
  - **सामग्री** :

1. वर्णमालायाः अध्यापनार्थं कक्षायां निम्नां सामग्रीं साधनं वा आवश्यकं वर्तते।
2. मार्जनी, सुधाखण्डः, सङ्केतयष्टिः, मुखस्य अन्तर्भागस्य अङ्गानां चित्रम्।
3. शिक्षकाः छात्रान् क्रमशः उ, प्, श्, ह्, त्, भ्, ङ् इत्यादीनां वर्णानाम् उच्चारणस्थानानि पृच्छेयुः छात्राश्च स्व बुद्धिः अनुसारं तेषां प्रश्नानाम् उत्तराणि यच्छेयुः।
4. पुनः शिक्षकाः छात्रेभ्यः, पञ्चमः, सीता, अन्तरा, अन्या, तन्मयः, शिल्पिका इत्यादीन् शब्दान्, दत्त्वा, तेषां प्रथमस्य, मध्यमस्य अन्तस्य वा वर्णस्य उच्चारणस्थानं पृच्छेयुः अथवा किञ्चित् स्थानं उक्त्वा तस्य वर्णं पृच्छेयुः।

- **कक्षाकार्यम्**

1. सर्वप्रथमं शिक्षकाः कक्षां द्वयोः भागयोः विभक्तयन्तु। सदैव छात्राणां वर्गयोः उच्चारणस्थानानुसारेण् नामानि अपि धारयन्तु।
2. कण्ठ-तालु-मूर्धा-दन्त-ओष्ठ-नासिकानुसारं छात्रान् सम्बोधयन्तु।
3. पुनः शिक्षकाः वर्णानाम् उच्चारणं कृत्वा तदनुसारं उच्चारणस्थानं पृच्छन्तु। यस्य छात्रस्य नाम उच्चारणस्थानेन सह मिलेत् सः एव उत्थाय स्वनाम उच्चारयतु।
4. यदि नाम उच्चारणस्थाने न सह मिलेत् तर्हि अध्यापकाः छात्राय साधुवादं दत्त्वा प्रोत्साहितं कुर्यात्।
5. यः छात्रः शुद्धम् उच्चारणस्थानं कथयितुम् अशक्यो भवेत् तस्य सहायतां कृत्वा शिक्षकाः उत्साहवर्धनं कुर्वन्तु।
6. पुनः शब्दं दत्त्वा तस्य मध्यतः वर्णस्य उच्चारणस्थानं उक्त्वा अथवा उच्चारणस्थानवाचकं छात्रम् उत्थाप्य तम् उचितं वर्णं पृच्छन्तु। छात्राः अपि तं वर्णं शोधयितुं प्रयत्नं कुर्वन्तु।
7. पुनरपि एकस्य अन्यस्य शब्दस्य एकं वर्णं प्रति सङ्केतं कृत्वा तस्य उच्चारणस्थानं पृच्छन्तु। उचितस्थाननाम छात्रः तस्योत्तरं दद्यात्।

- **गृहकार्यम्**

1. एवमेव शिक्षकाः छात्रेभ्यः कतिचिद्वर्णान् शब्दान् वा दत्त्वा गृहात् तस्य उच्चारणस्थानानि लिखित्वा आनेतुं कथयिष्यन्ति।
2. छात्रेभ्यः यद् साहाय्यम् अपेक्षते तत् शिक्षकाः यथा समयं दास्यन्ति अपि।

## ❑ कार्यनिरीक्षणम्

1. आगामिदिवसे यत्कार्यं कृत्वा छात्राः कक्षायाम् आनेष्यन्ति तस्य सम्यगवलोकनं शिक्षकाः कुर्वन्तु अपि।
2. तेषां कृते तालिकावादनं उत्साहवर्धनमपि यदि भवेताम् तर्हि साधु भविष्यति।
3. ये छात्राः कार्यकरणे असमर्थाः भविष्यन्ति तेषाम् कृते उचितं मार्गदर्शनं शिक्षकाः प्रयच्छेयुः।

## ❑ प्रश्नकार्यम्

अनेन प्रकारेण कक्षायाः मध्ये एवं यथारुचि यथामति च शिक्षकाः छात्रान् प्रश्नान् पृच्छेयुः। येन छात्राणाम् रुचिः वर्धेत।

## ❑ अन्तेनिवेदनम्

शिक्षकाः छात्रेभ्यः स्वगृहात् एकस्मिन् सुन्दरे चित्रकर्गदेऽपि कांश्चिद् शब्दान् वर्णान् वा लिखित्वा तेषाम् उच्चारणस्थानानि लिखित्वा आनेतुं कथयिष्यन्ति।

## विषयः — वर्णमालायाः ज्ञानम्      उपविषयः — उच्चारणस्थानानि

## ❑ कार्यकलापः—( द्वितीयः ) : वर्णानां शुद्धम् उच्चारणं कदा कथञ्च भवेत् इति ज्ञानं प्राप्तव्यम्।

➢ **विशिष्ट उद्देश्यम्** : मुखान्तर्गतानाम् उपाङ्गानां नामानि संरचनां च ज्ञात्वा तत्-तत् स्थानात् निर्गतां वर्णानां शुद्धं उच्चारणं करणं सदैव अशुद्धोच्चारणं शुद्धं कथं भवेत् इति प्रयासमपि कुर्यात्।

➢ **मूल्याङ्कनम्**

1. अस्य पठनस्य सम्यक्तया ज्ञानेन समस्त वर्णानाम् उच्चारणं शुद्धं भूत्वा वर्णानाम् प्रकृतिः मात्राणां ज्ञानं नवीनं वर्णनिर्माणं तस्य सम्यक्तया अन्यैः सह मेलनमपि ज्ञायन्ते।
2. अनेन कार्येण भविष्यकाले संभाषणे कोऽपि दोषः न भवति।

➢ **अवधिः** : पञ्चदशकला यावत् ( 15 मिनट)

➢ **सामग्री** : मार्जनी, सङ्केतयष्टिः, सुधाखण्डाः मुख्य अन्तर्भागानां चित्रम्, केचिच्च शब्दाः।

➢ **कक्षाकार्यम्** :

1. शिक्षकाः छात्राणां द्वे पङ्क्ती रचयित्वा तेषां नामानि क्रमशः नासिका, तालुः, कण्ठः, दन्ताः, कण्ठतालव्यौ, दन्तौष्ठः आदयः करिष्यन्ति।
2. पुनः ते (शिक्षकाः) छात्रान् सम्बोध्य क्रमशः एकमेकम् उत्थाप्य तेन केषां वर्णानाम् उच्चारणं भवति इति प्रक्ष्यन्ति; यथा- नासिका उत्थाय कथयतु यत् तया कति के च वर्णाः उच्चारिताः भवन्ति। नासिका सम्यगुत्तरं दास्यति। पुनः अन्यस्य उपाङ्गस्य क्रमः आगमिष्यति।
3. पश्चात् शिक्षकाः कश्चित् शब्दान् नीत्वा तेषां कस्यचिद् एकस्य वर्णस्य उच्चारणस्थानं पृच्छन्तु छात्राश्च उत्तरं यच्छन्तु।
4. तत्पश्चात् शिक्षकाः उच्चारणस्थानानां नामानि कथयित्वा तैः सह उच्चरितस्य वर्णस्य विषये पृच्छन्तु; यथा-'अवन्तिका' इति शब्दे 'दन्तोष्ठः' कः वर्णः अस्ति, इति कथ्यताम्। अथवा अस्मिन् शब्दे कः व्यञ्जनः कण्ठ्यः वर्तते इति कथ्यताम्।
5. एवमेव प्रश्नोत्तराणां माध्यमेन शुद्धं उच्चारणज्ञानं स्थानानि वा ज्ञात्वा छात्राः योग्याः भविष्यन्ति। एवमेव शिक्षकाः अपि प्रयतेरन्।

➢ **गृहकार्यम्**

1. शिक्षकाः स्व छात्रेभ्यः गृहे करणीयं कार्यमपि प्रयच्छेयुः; यथा—अनेन प्रकारेण पञ्च अथवा सप्त शब्दान् नीत्वा तेषां वर्णानां उच्चारणस्थानानि ज्ञात्वा लिखेयुः।
2. अध्यापकेभ्यः या सहायता अपेक्षते सा अवश्यमेव मिलिष्यति। अतः ध्यानं दत्त्वा एतत्कार्यं कुर्वन्तु भवन्तः।

## ❑ कार्यनिरीक्षणम्

1. आगामिदिने छात्राः यत्कार्यं कृत्वा आनेष्यन्ति तदध्यापकैः अवश्यमेव द्रष्टव्यम्।
2. योग्यानां छात्राणां कृते तालिकावादनमपि यदि भवेत् तर्हि उचितम्।
3. कार्यकरणे ये छात्राः समर्थाः न भविष्यन्ति तेभ्यः उचितं मार्गदर्शनं शिक्षकाः अवश्यमेव प्रदास्यन्ति।

❑ **प्रश्नकार्यम्**

1. शिक्षकाः कक्षायां कार्य निरीक्षणं कुर्वन्तः छात्रान् प्रश्नान् पृच्छन्तु छात्राश्च यथामति यथारुचि उत्तरमपि यच्छन्तु। येन छात्राणां बुद्धि-उत्साह-ज्ञानवर्धनञ्च भवेत्।
2. एवमेव शिक्षकाः छात्रेभ्यः चित्रकर्गदेऽपि उच्चारणस्थानानां चित्रं कृत्वा आनेतुं कथयन्तु। अनेन कार्येण छात्राणां रचनात्मक कार्यक्षमता वर्धयिष्यति।

## विषयः — वर्णमाला | उपविषयः — वर्णविन्यासः

❑ **कार्यकलापः—( तृतीयः ) : वर्णानाम् निर्माणं प्रकृतिश्च कथं ज्ञायेत इति ज्ञानम् अनेन क्रियाकलापेन ज्ञायते।**

➢ **उद्देश्यम्** :

1. वर्णानाम् वर्गीकरणं भेदांश्च कृत्वा तेषां संयोजनं विभाजनं च करणम्।
2. व्यञ्जनानां संयोगः स्वरैः सह कथं भवति एतदपि ज्ञातव्यम्।
3. हलन्तस्य किं महत्त्वम् भवतिं, एतदपि ज्ञातव्यम्।

➢ **कौशल-विकासः** स्वरव्यञ्जनानाञ्च संयोगेन शब्दानां निर्माणं कथं भवति ? तेषाञ्च संशोधनं ज्ञानमपि वर्णविन्यासेन एव ज्ञातुं शक्यते।

➢ **अवधिः** : दशकला परिमितम् ( 10 मिनट )

➢ **आवश्यक-सामग्री** : वर्ण-विन्यासस्य (संयोजनं विभाजनं वा) अध्यापनार्थम् निम्न साधनानि अपेक्ष्यन्ते।
श्यामपट्टः, मार्जनी, सुधाखण्डाः, सङ्केतयष्टिः, स्वरव्यञ्जनानाञ्च प्रदर्शनचित्रम्।

➢ **कक्षाकार्यम्** :

1. सर्वप्रथमं शिक्षकाः छात्राणां सुविधानुसारं द्वि-त्रि-चतुर् वा समूहान् रचयेयुः।
2. पुनः क्, ख्, ग्, घ् इत्यादिभ्यः नामभ्यः समूहेभ्यः पञ्च संयुक्तशब्दान् पञ्च च विभक्त वर्णान् दत्त्वा क्रमशः तान् पृच्छेयुः।

➢ **यथा**– प्रोद्भाषित, साधूक्तम्, ग्रामीणार्थम्, हार्दिकाभिनन्दनम्, घटोद्भिज्जः
क् + अ + र् + ग् + अ + द् + आ + द् + ई + ष् + उ। स् + अ + फ् + अ + ल् + अ + त् + आ + म्। क् + र् + ई + ड् + आ + क् + ष् + ए + त् + र् + ए। ब् + अ + ह् + उ + व् + अ + च् + अ + न् + आ + न् + इ। व् + इ + र् + आ + म् + अ + च् + इ + न् + ह् + अ + म् आदयः।

3. पुनः शिक्षकाः छात्रेषु अपि कञ्चिद् एकम् उत्थाप्य एकं कठिनं शब्दं वक्तुं कथयेयुः तथा स्वयं तस्य वर्ण विभाजनं कृत्वा छात्रान् शिक्षयेयुः। एवमेव वर्ण विभाजनम् उक्त्वा छात्रेभ्यः तस्य संयोजनं कर्तुं कथयेयुः, छात्राश्च तस्य संयोजनं कुर्वन्तु।
4. शिक्षकाः छात्रान् संयुक्तान् व्यञ्जनान् अपि ज्ञापयेयुः;
यथा—त्र, ज्ञ, क्ष, क्र, घ्र, कृ, प्र आदयः।
अनेन प्रकारेण शिक्षणेन छात्राः वर्णानां ज्ञाने योग्याः भविष्यन्ति। तेषाञ्च लेखन पाठनयोः अशुद्धिः अपि दूरी भविष्यति।

➢ **गृहकार्यम्**

1. छात्रान् वर्णविन्यासं पाठयित्वा शिक्षकाः तेषामभ्यासार्थं गृहकार्यरूपे सरल-कठिन अनेकान् शब्दान् वर्ण समूहान् वा दद्युः।
2. यत्र छात्राः शिक्षकस्य सहायतायाः आवश्यकताम् अनुभवेषुः तत्र तेषां मार्गदर्शनमपि कुर्युः।

❑ **कार्यनिरीक्षणम्**

1. आगामिदिवसे छात्राः यत्कार्यं कृत्वा आनेष्यन्ति तदवश्यमेव शिक्षकाः निरीक्ष्य छात्रान्, प्रोत्साहितान् करिष्यन्ति।
2. ये छात्राः कार्यकरणे असमर्थाः भविष्यन्ति तेभ्यः उचितं मार्गदर्शनं शिक्षिकाः प्रदास्यन्ति।
3. ये छात्राः शोभनं कार्यं कृत्वा आनेष्यन्ति तेषां कृते शिक्षकाः तालिकावादनमपि कारयिष्यन्ति।

## ❑ अन्तेनिवेदनम्

1. शिक्षका: कक्षायां कार्यनिरीक्षयन् छात्रान् प्रश्नान् अपि पृच्छेयुः।
2. छात्राश्च यथामति उत्तरं प्रदास्यन्ति सदैव तेषाम् उत्साहवर्धनमपि शिक्षका: करिष्यन्ति।
3. एवमेव शिक्षका: अनेकान् शब्दान् वर्णान् च नीत्वा चित्र कर्गदेऽपि चित्राङ्कनम् कर्तुम् वदिष्यन्ति। अनेन कार्येण छात्राणां रचनात्मककार्य-क्षमतांया: वृद्धि: भविष्यति।

**विषय: — सन्धि-प्रकरणम्** **उपविषय: — स्वरसन्धि:**

## ❑ क्रियाकलाप:—( चतुर्थ: ) : शब्दानां प्रकृति: तेषां निर्माणं महत्त्वञ्च ज्ञात्वा वाक्येषु तेषां सम्यक्तया प्रयोगम् करणम्।

- **उद्देश्यम्** : शुद्धाशुद्ध-शब्दानां ज्ञानं तेषां चिह्नीकरणं संशोधनं च ज्ञात्वा भाषायां प्रावीण्यं प्राप्तुं प्रयासं करणम्।
- **मूल्याङ्कनम्** : सन्धिप्रकरणं स्वरसन्धिं वा ज्ञात्वा छात्रा: स्वराणां विभिन्न रूपाणि ज्ञास्यन्ते तथा वाक्ये तेषां मेलनं कृत्वा भाषाया: सम्यक्तया उच्चारणं लेखनं च करिष्यन्ति।
- **अवधि:** : दशकला परिमितम् (10 मिनट)
- **कक्षाकार्यम्** :

1. सर्वप्रथमं शिक्षका: कक्षाया: छात्रान् द्वयो: वर्गयो: विभजन्तु। एकस्यनाम-सन्धि: द्वितीयस्य च नाम विच्छेद: कुर्वन्तु।
2. पुन: प्रथमवर्गस्य छात्रेभ्य: स्वर सन्धि-युक्तम् शब्दान् दत्त्वा क्रमश: तेषां विच्छेदं पृच्छन्तु;
   यथा— हिमालय:, गणेश:, वनोत्सव:, महोदधि:, पञ्चामृतम्, भीष्मादय:, वनौषधि:, लघूत्सव: लघ्वपि, नायिकाम्, नायक:, पवन:, पावनम् इत्यादय:।
3. तत्पश्चात् द्वितीयवर्गस्य 'विच्छेदस्य' छात्रेभ्य: स्वर सन्धे: विच्छेदान् दत्त्वा तेषां सन्धियुक्तं पदं पृच्छन्तु; यथा — जल + आशय:, बाल + आदय:, करुणा + ईश:, देव + ऐश्वर्यम्, जन + एकता, दीप + उत्सव:, रामो + अपि, राम + ओषधि:, पौ + अक: आदय:।
4. पुन: शिक्षका: स्वर सन्धे: प्रत्येकं भागस्य नाम दत्त्वा तस्य भागस्य उदाहरणं पृच्छेयु: छात्राश्च तस्य उत्तरं दद्यु:।
5. एवमेव विच्छेदं दत्त्वा छात्रान् सन्धियुक्तं पदं पृच्छेयु: छात्राश्चापि तस्य उत्तरं यच्छेयु:। मध्ये-मध्ये तालिकावादनमपि भवेत् येन छात्राणाम् उत्साहं वर्धयेत्।

- **सामग्री** : सन्धि परिचयं पाठनार्थं निम्न साधनानाम् आवश्यकता भवति; यथा—श्यामपट्ट:, मार्जनी, सुधाखण्डा: सङ्केतयष्टि: तथा सन्धि-विच्छेद-विषयस्य चित्रमयं लेखनम्।
- **गृहकार्यम्** : शिक्षका: कक्षायाम्, छात्रान्, सन्धिं विच्छेदं वा पाठयित्वा छात्रेभ्य: गृहकार्यमपि दास्यन्ति। गृहकार्यरूपे ते छात्रेभ्य: स्वर सन्धे: दशशब्दा: सन्धे: दश च शब्दा: विच्छेदस्य प्रदास्यन्ति। तत्कार्यं छात्रा: परिश्रमेण गृहे करिष्यन्ति।

## ❑ कार्यनिरीक्षणं हस्ताक्षरञ्च:

1. छात्रै: कृतं कार्यं कक्षायां शिक्षका: निरीक्षणं करिष्यन्ति।
2. अशुद्ध कार्ये भवति सति ते छात्रेभ्य: स्व मार्गदर्शनमपि प्रदास्यन्ति।
3. यस्य छात्रस्य कार्यं सन्तोषजनकं शुद्धं वा भविष्यति शिक्षका: तस्मै साधुवादं प्रदास्यन्ति तालिकावादनञ्च तस्मै कारयिष्यन्ति।
4. तत्पश्चात् छात्राणाम् उत्तरपुस्तिकायां यथास्थानं शिक्षका: स्वहस्ताक्षरमपि करिष्यति।

## ❑ प्रश्नकार्यम्

1. शिक्षका: छात्राणां कार्यं पश्यन्तु तथा मध्ये-मध्ये यथा रुचि प्रश्नान् अपि पृच्छन्तु। छात्रा: अपि यथामति उत्तराणि प्रदास्यन्ति। अनेन छात्राणां ज्ञानवर्धनं भविष्यति।
2. एवमेव शिक्षका: छात्रेभ्य: चित्रकर्गदेऽपि सन्धियुक्तपदानां विच्छेदपदानाञ्च रचना कृत्वा आनेतुं कथयन्ति। येन छात्राणाम् उत्साहं वर्धिष्यति।

❑ **कार्यकलापः—( पञ्चमः ): पदानां प्रकृतिः, निर्माणं स्वरूपञ्च ज्ञात्वा वाक्येषु सम्यक्तया तेषां प्रयोगं करणम्।**

➢ **उद्देश्यम्** : शब्दानां पदानाञ्च ज्ञानं तेषां संशोधनं प्रयोगम् अर्थञ्च ज्ञात्वा वाक्येषु तेषां सम्यक्तया प्रयोगं कृत्वा तस्य शोभां वर्धनम्।

➢ **मूल्याङ्कनम् कौशलम्**

**विकासो वा** : सन्धिं विच्छेदं वा विना भाषायां सौन्दर्यं न भवति। सन्ध्याः ज्ञानेन जनाः भाषायाः सम्यक्तया ज्ञानं प्राप्तुं समर्थाः भवन्ति सदैव च तस्याः उच्चारणं लेखनं च सरलं भवति।

➢ **अवधिः** : दशकला परिमितम् (10 मिनट)

➢ **सामग्री** : सन्ध्याः (सन्धेः)अध्यायनार्थं कक्षायां शिक्षकान् निम्न वस्तुनि अपेक्ष्यन्ते यैः ते सम्यक्तया छात्रान् पाठयितुं समर्थाः भवेयुः। तानि सन्ति — मार्जनी, श्यामपट्टः, सुधाखण्डाः सङ्केतयष्टिः एवं चित्रमयं सन्धि विषयस्य लेखनम् आदयः।

➢ **कक्षाकार्यम्** :

1. शिक्षकाः छात्रान् प्रथमं चतुर्षु वर्गेषु विभजन्तु; यथा—कालिदासः वर्गः, भासःवर्गः, माघः वर्गः बाणभट्टः वर्गश्च।
2. पुनः तेभ्यः क्रमशः व्यञ्जन सन्धिः, विग्रहः, विसर्गसन्धिः विग्रहः च शब्दान् दत्त्वा पृथक्, उपस्थापयेयुः; यथा—कालिदासवर्गाय-रामं याति, जगदीशः, चञ्चल, सज्जनः, वाङ्मयं आदयः।

   भासवर्गाय— जगत् + ईशः, तत् + शक्तिः, विश्वम् + जयति, एतत् + शक्तम्, तत् + लीनः आदयः।

   माघवर्गाय— रामोगच्छति, शनैश्च, हरिरिच्छति, नमस्ते, नरा हसन्ति आदयः।

   बाणभट्टवर्गाय— सेवकः + तरति, हरिः + इच्छति, बालकाः + च, सः + गच्छति, मुनिः + उवाच आदयः।
3. इत्यादीनि कार्याणि दत्त्वा शिक्षकाः किञ्चित् कालं विरम्य पुनः तान् प्रश्नान् प्रक्ष्यन्ति; यथा—भासवर्गाय प्रश्नमिदं **यत् 'तत् + लीनः'** इत्यस्य सन्धिं कृत्वा कः शब्दः जायते ? छात्राः उत्तरंप्रदास्यन्ति यत् —'**तल्लीनः**'। एवमेव कालिदासवर्गाय '**वाङ्मयं**' पदं कथयित्वा तस्य विच्छेदं पृच्छन्तु। अधुना तद्वर्गस्य छात्राः '**वाक् + मयं** वदिष्यन्ति'।
4. एवमेव छात्राः शिक्षकाणां प्रश्नानामुत्तराणि दास्यान्ति शिक्षकाश्च तेषामुत्साहं वर्धनाय मध्ये-मध्ये छात्राणां प्रशंसां साधुवादं च करिष्यन्ति छात्रान् च तालिकावादनाम प्रोत्साहितान् अपि करिष्यन्ति।

➢ **गृहकार्यम्** : शिक्षकाः कक्षायां, छात्रेभ्यः व्यञ्जन विसर्ग च सन्ध्योः आधारितान् प्रश्नान् गृहे करणाय दास्यन्ति। ते छात्रेभ्य्ः दश पदान् व्यञ्जन सन्धेः दश च पदाय् विसर्गसन्धेः प्रदान छात्राणाम् उत्साहवर्धयन्तः गृहात् कृत्वा आनेतुं कथयिष्यन्ति। छात्राश्च तत्कार्यं गृहे करिष्यन्ति अपि।

❑ **अवलोकनकार्यम्** :

1. आगामि दिवसे छात्रैः कृतं कार्यं शिक्षकाः द्रक्ष्यन्ति।
2. अशुद्धे कार्ये सति ते छात्रेभ्यः स्वामूल्यं मार्गदर्शनं दास्यन्ति अपि। छात्राः पुनरपि शिक्षकाणां समक्षे एव स्वकार्यं करिष्यन्ति।
3. यस्य छात्रस्य कार्यं सन्तोषप्रदं उत्तमं शुद्धं वा भविष्यति शिक्षकाः तस्मै आशीर्वादं साधुवादं च प्रदास्यन्ति। तस्मै तालिकाः वादनाय छात्रान् प्रेरयिष्यन्ति अपि।
4. छात्रस्य अभ्यास पुस्तिकायामुपरि ते शिक्षकाः स्व हस्ताक्षरं अपि करिष्यन्ति।

❑ **प्रश्नकार्यम्**

निरीक्षणसमये शिक्षकाः स्वमत्यानुसारमेव छात्रान् प्रश्नान् अपि प्रक्ष्यन्ति येन छात्राः सन्नद्धाः भूत्वा तिष्ठेयुः।

## ❑ कार्यकलापः—(षष्ठः) : शब्द-धातुरूपाणां वाक्येषु प्रयोगः अशुद्धिशोधनम् च

➢ **उद्देश्यम्**

1. शब्दरूपाणां ज्ञानेन संज्ञा, सर्वनाम, संख्या, विशेषणानां निर्माणम् अन्तरं वा करणम्।
2. धातुरूपाणां प्रकृतिः, रूपाणि च ज्ञात्वा सम्यक् क्रियानिर्माण हेतुः शक्तिग्रहणम्।
3. वाक्यस्य संज्ञा-सर्वनाम-क्रियाणाम् अन्विति-ज्ञानम् अपि भवेत्।
4. वाक्यस्य अशुद्धिमपि जानीयात्।

➢ **कौशल-विकासः**

1. छात्राणां बौद्धिकविकासः भविष्यति।
2. तेषां व्याक्यनिरीक्षण प्रतिभा वर्धिष्यते।
3. लेखनस्य अशुद्धिः अपि दूरी भविष्यति।

➢ **अवधिः** : होरार्धम् (30 मिनट)

➢ **सामग्री** : व्याकरणपुस्तकम्, मार्जनी, सुधाखण्डाः, श्यामपट्टः, सङ्केतयष्टिः आदयः।

➢ **विधिः**

1. सर्वप्रथमं शिक्षकाः सम्पूर्णां कक्षां द्वि-भागयोः विभाजनं करिष्यन्ति।
2. पुनः एक वर्गस्य नाम शब्दरूपः द्वितीयस्य च नाम धातुरूपः करिष्यन्ति।
3. निर्धारितान् शब्दरूपान् धातुरूपवर्गस्य छात्राः शब्दरूप वर्गस्य छात्रान् प्रक्ष्यन्ति। अतः ते छात्राः क्रियायाः अनुसारेण तेषामुत्तराणि दास्यन्ति।
4. पुनः निर्धारितान् धातुरूपान् शब्दरूपवर्गस्य छात्राः धातुरूप-वर्गस्य छात्रान् प्रच्छन्ति। तेऽपि तादृशमेव कर्ता-अनुसारेण क्रियायाः निर्माणं, तस्याः अशुद्धि शोधनम् आदि करिष्यन्ति।
5. मध्ये-मध्ये अध्यापकाः तेषां सहायतामपि करिष्यन्ति।
6. छात्राः शब्दान् दत्त्वा तेषां मूलशब्दं, विभक्तिं वचनं लिङ्गञ्च प्रक्ष्यन्ति एवमेव एतान् दत्त्वा शब्दनिर्माणं प्रक्ष्यन्ति।
7. तथैव द्वितीयवर्गं धातुरूपान् / क्रियारूपान् दत्त्वा तेषां मूलधातुं, लकारं, पुरुषं वचनञ्च छात्राः प्रक्ष्यन्ति अथवा एतान् सर्वान् दत्त्वा क्रियानिर्माणं प्रक्ष्यन्ति।

## ❑ शिक्षकाय निवेदनम्

1. अध्यापकाः ध्यानं दद्युः (यच्छेयुः) यत् सर्वेणां छात्राणां क्रमः अवश्यमेव आगच्छेत्। कश्चिदपि छात्रः वञ्चितः न भवेत्।
2. छात्राः यां सहायताम् अपेक्षन्ते तामपि अध्यापकाः तेभ्यः दास्यन्ति।

## ❑ कक्षाकार्यम्

1. 'एक' पदस्य सप्तमी विभक्तेः रूपं किम्?
2. 'गम्' धातोः लोट् लकारस्य मध्यपुरुषः लिखत।

## ❑ गृहकार्यम्

अध्यापकाः कान्चिद् वाक्यान् दत्त्वा क्रमशः च तेषां कर्ता-क्रियाम् रेखाङ्किताम् कृत्वा गृहात् तेषां मूलशब्दं, विभक्तिं, वचनं, लिङ्गं अथवा मूलधातुं, लकारं, पुरुषं, वचनं च लिखित्वा आनेतुं कथयिष्यन्ति; यथा—रेखाङ्कितपदस्य वचनं किम्?

1. ते कथं लभेरन्?
2. विद्वांसः किं भाषन्ते?

## ❑ मौखिकप्रश्नाः

छात्रैः कृतस्य कार्यस्य निरीक्षणं कृत्वा शिक्षकाः तस्योपरि छात्रान् प्रश्नान् प्रक्ष्यन्ति;

यथा—अस्य क्रिया पदस्य मूल धातुः / लकारः / पुरुषः / वचनञ्चकिम् एवमेव अस्य कर्तृ पदस्य मूल शब्दः / लिङ्गः / विभक्तिः / वचनञ्च किम् अस्ति। छात्राः यथाज्ञानम् तेषामुत्तराणि दास्यन्ति। मध्ये-मध्ये शिक्षकाः तालिका वादनमपि कारयिष्यन्ति।

## ❑ निर्देशनम्

शिक्षकाः छात्रान् अन्येषां शब्दानां धातूनाञ्च रूपाणि ज्ञातुं कथयिष्यन्ति। ते छात्रैः एकस्मिन् सुन्दरे चित्रकर्गदे शब्दानां धातूनाञ्च वर्गीकरणं कर्तुं कथयिष्यन्ति।

## विषयः — उपपदविभक्तिः प्रत्ययाश्च प्रयोगः    उपविषयः — वाक्यसंशोधनम् शब्द शुद्धिः च।

## ❑ कार्यकलापः—( सप्तमः ) : वाक्यानां संशोधनम् प्रत्ययान्त-शब्दानां च निर्माणम्

➢ **उद्देश्यम्**

1. विभिन्न विशेष शब्दैः सह का विभक्तिः प्रयुज्यते तस्याः च किं महत्त्वम् कश्च प्रयोगः इत्यस्य ज्ञानम् करणम्।
2. धातुभिः सह प्रत्ययानां प्रयोगो भूत्वा कथं क्रिया, क्रियाविशेषणं, विशेषणं च भवन्ति। एतस्य अपि ज्ञानं भवेत्।

➢ **कौशल-विकासः**

1. छात्राणां बौद्धिकः विकासः भवेत्।
2. तेषां निरीक्षणक्षमतायाः विकासः भवेत्।
3. वाक्यानाम् अशुद्धि-शोधनम् शुद्धा क्रिया च निर्मिता भवेत्।

➢ **अवधिः** : होरार्धम् (30 मिनट)

➢ **सामग्री** : व्याकरणपुस्तकम्, मार्जनी, सुधाखण्डाः, श्यामपट्टः, सङ्केतयष्टिः आदयः।

➢ **विधिः**

1. शिक्षकाः छात्रान् चतुर्षु वर्गेषु विभक्ताः करिष्यन्ति।
2. द्वौ वर्गौ उपपदविभक्तिनां कृते द्वौ च वर्गौ प्रत्ययानां कृते भविष्यन्ति।
3. अध्यापकाः छात्रेभ्यः अपूर्णं वाक्यं दत्त्वा तस्य मध्ये आगतस्य उपपदशब्दस्य प्रयोगं कारयिष्यन्ति। पुनः अशुद्धं वाक्यं दत्त्वा तस्य शोध नार्थमपि छात्रान् प्रेरयिष्यन्ति।
4. एवमेव धातुं दत्त्वा प्रत्ययं च निर्दिश्य क्रियायाः क्रियाविशेषणस्य च निर्माणार्थं छात्रान् वदिष्यन्ति। पुनः क्रियां क्रियाविशेषणं च दत्त्वा ते धातु-प्रत्ययानां विभाजनं प्रक्ष्यन्ति।
5. छात्राः अपि स्व ज्ञानानुसारम् उत्तराणि दास्यन्ति।

## ❑ शिक्षकाय निर्देशाः

1. सर्वेषां छात्राणां क्रमः आगच्छेत् इत्यस्य ध्यानं अवश्यमेव दद्यात्।
2. कश्चिदपि छात्रः अनुत्तरितः न भवेत्।
3. उत्तरार्थं वर्गेभ्यः अङ्काः अपि प्रदास्यन्ते।
4. यस्य वर्गस्य अधिकाः अङ्काः भविष्यन्ति सः वर्गः विजयी भविष्यति।

## ❑ कक्षाकार्यम्

1. सीता रामं स्वमुद्रिकाम् अयच्छत्। इति वाक्यं शुद्धं कृत्वा लिखन्तु।
2. 'नगरस्य निकषा' इति वाक्यम् अपि शुद्धं कुरु।
3. 'नमः कृष्णम्' इति वाक्ये का अशुद्धिः वर्तते?

## ❑ गृहकार्यम्

1. शिक्षका: छात्रेभ्य: अशुद्धान् वाक्यान् दत्त्वा तेषां शोधनाय अथवा विशेष-उपपदान् दत्त्वा तेषां वाक्येषु प्रयोगाय कार्यं यच्छन्तु। यथा—सीता <u>रामेण</u> सह वनं अगच्छत्। अत्र 'रामेण' इति पदे का विभिक्ति: किमर्थं च अगता ?
2. मम विश्वास: <u>तस्मिन्</u> वर्तते। अत्र रेखांङ्किते पदे का विभक्ति केन च कारणेन ?

## ❑ मौखिकप्रश्ना:

शिक्षका: सुविधानुसारं छात्रान् प्रश्नमपि प्रक्ष्यन्ति; यथा—''प्रयोजने'' का विभक्ति प्रयुज्यते ? उदाहरणेन सह उत्तरत।

## ❑ क्रियाकलाप:

1. शिक्षका: छात्रान् कलाकर्गदद्वये उपपदशब्दानां प्रत्ययानाञ्च चित्राङ्कनाय निर्देशनम् यच्छन्तु। यस्य छात्रस्य कार्यम् सुन्दरं भवेत् तस्य कार्यस्य कक्षायां टङ्कनम् कुर्यु:।
2. यस्य छात्रस्य कार्यम् उत्तमं भविष्यति तस्य कृते तालिकावादनमपि कारयिष्यन्ति।

## विषय: — शब्दधातुरूपाणां ज्ञानम् प्रयोगश्च उपविषय: — शब्दशुद्धि: क्रियाशुद्धिश्च।

## ❑ कार्यकलाप: —( अष्टम: ): लिङ्ग-विभक्ति-वचनानां ज्ञानम्

➢ **उद्देश्यम्**

1. छात्राणां योग्यता शब्द-धातु रूपै: सह वाक्य निर्माणे भवेत्।
2. ते पाठस्य अर्थं ज्ञातुं समर्था: भवेयु:।
3. संस्कृत-पठन-पाठन, लेखन-श्रवण-वाचन इत्यादीनां योग्यता भवेत्।
4. शब्दानां मध्ये अन्तर-ज्ञातुं योग्यता भवेत्।
5. शब्द निर्माणस्य, वर्तनी अवलोकनस्य अपि सामर्थ्यम् आगच्छेत्।
6. दैनिक व्यवहारे संस्कृतस्य प्रयोगाय योग्यता भवेत्।

➢ **अवधि:** : होरार्धम् (30 मिनट)

➢ **सामग्री** : व्याकरणपुस्तकम्, मार्जनी, सुधाखण्डा:, श्यामपट्ट:, सङ्केतयष्टि: आदय:।

➢ **विधि:**

1. शिक्षका: छात्रान् अजन्तशब्दानां रूपाणि अवबोधयेयु:। तेषां मध्ये अन्तरं अपि दर्शयेयु:।
2. तत्पश्चात् हलन्त शब्दानां मध्ये समानतां-भिन्नतां वा कथयित्वा तेषां रूपाणि अवबोधयेयु:।
3. एवमेव सङ्ख्यावाचक शब्दानां लिङ्ग-विभक्ति-वचनानुसारम् अन्तरं बोधयेयु:; यथा 'एक' पदस्य रूपं एकवचने एव चलिष्यति, 'द्वि' पदस्य रूपं केवलं द्विवचने एव तथा त्रि-चतुर्-पञ्चन् शब्दानां रूपाणि बहुवचने एव चलिष्यन्ति।
4. सङ्ख्यावाचक शब्दानां रूपाणाम् आधार: सर्वनाम शब्दा: भविष्यन्ति।
5. अनेन प्रकारेण धातुरूपाणां अपि रूपाणि परस्मैपदे 'दृश् (पश्य्)' इव एवं आत्मनेपदे 'सेव्' इव, उभयपदे च द्वयो: इव चलिष्यन्ति।

➢ **कौशल-विकास:**

1. अनेन छात्राणां शब्द-धातु रूपाणां ज्ञाने योग्यता वर्धिष्यते। तेषां सहायतया छात्रा: विभिन्नवाक्यानां निर्माणं कृत्वा सम्यक्तया भाषाया: ज्ञानं योग्यतां वा प्राप्स्यन्ति।
2. पुस्तकपठनस्य सूक्तिपठनस्य च योग्यता आगते सति ते पाठस्य अन्य भाषायाम् रूपान्तरणं कर्तुं पारयिष्यन्ति।
3. संस्कृतभाषणकौशलस्य च विकास: योग्यता वा भविष्यति।

## ❑ शिक्षकाय निर्देशा:

1. शिक्षकमहोदया: छात्रान् प्रत्येकं शब्दानां रूपं धातूनाञ्च रूपं कक्षायां प्रक्ष्यन्ति।
2. छात्रा: स्व स्मरण-ज्ञानानुसारं तेषाम् उत्तराणि प्रदास्यन्ति।
3. छात्रै: या अशुद्धि: भविष्यति तस्या: संशोधनाय शिक्षका: तान् प्रेरयिष्यन्ति। वाक्येषु तेषाम् उपयोगं कृत्वा भाषाया: ज्ञाने प्रवीणा: भविष्यन्ति।

## ❑ कक्षाकार्यम्

1. 'चतुर्' शब्दस्य पुल्लिङ्स्य सप्तमी विभक्तौ किम् रूपं भविष्यति?
2. 'नी' धातो: विधिलिङ् लकारस्य उत्तमपुरुषे कानि रूपाणि भविष्यन्ति?

## ❑ गृहकार्यम्

एवमेव अन्येषां शब्दानां रूपाणि अपि छात्रा: स्मरिष्यन्ति।

छात्रा: निम्न धातुरूपेषु एकम् एकं धातुरूपं स्मृत्वा आगमिष्यन्ति; यथा—सेव्, वृत्, दृश्, नी धातव: केवलं लोट् तथा विधिलकारयो:।

## ❑ मौखिकप्रश्ना:

1. तत: ते मौखिकप्रश्नान् पृष्ट्वा तान् प्रोत्साहितान् अपि करिष्यन्ति।
2. मध्ये-मध्ये यदि करतल ध्वनि: भविष्यति तर्हि छात्रा: प्रसन्ना: भविष्यन्ति।

## ❑ क्रियाकलाप:

छात्रा! एवमेव भवन्त: अन्य रूपाणि अपि स्मरन्तु। एवम् अन्यै: सह तेषां तुलनां कृत्वा सम्यक् अवबोधयन्तु।

## विषय: — उपपदविभक्तय: प्रत्यय ज्ञानम् च उपविषय: — वाक्यसंशोधनम् प्रत्ययाश्च।

## ❑ कार्यकलाप:—(नवम:) : अशुद्धि-शोधनम्

➢ उद्देश्यम्

1. छात्राणां वाक्यानि शुद्धानि भवेयु:।
2. ते वाक्यनिर्माणे उपपदविभक्तिनां प्रयोगं कर्तुं समर्था: भवेयु:।
3. अपूर्ण (वर्तमान, भूत, भविष्य) काले एवं भूतकाले ते क्रियाया: निर्माणे धातुरूपाणि विना अपि योग्या: भवेयु:।
4. प्रत्ययानां प्रयोग: कदा भवितुम् शक्यते इत्यस्य अपि ज्ञानम् प्राप्नुयात्।

➢ **अवधि:** : होरार्धम् (30 मिनट)

➢ **सामग्री** : व्याकरण-पुस्तकम्, लघुवाक्यानां पट्टम्, प्रत्यययुक्ता: शब्दा:, श्यामपट्ट:, मार्जनी, सुधाखण्डा: सङ्केतयष्टिका च।

➢ विधि:

1. सर्वप्रथमं कक्षायां शिक्षकमहोदया: एकं वाक्यं वदिष्यन्ति। तस्य लेखनम् अपि श्यामपट्टे करिष्यन्ति। पुन: छात्रान् सूक्ष्मतया वाक्यं द्रष्टुम् प्रेरयिष्यन्ति।
2. यस्मिन् शब्दे कारकनियमानाम् अनुसारेण निर्धारिता विभक्ति: न भविष्यति तस्य कारणं ते छात्रान् प्रक्ष्यन्ति।
3. छात्राणाम् अनुत्तर-भवति सति ते तस्य कारणं कथयिष्यन्ति;
   यथा—परित:, उभयत: समया, विना योगे द्वितीया विभक्ति:, विना, अलम्, हीन: योगे तृतीया आदि।
4. शतृ, शानच् प्रत्ययौ निरन्तर-क्रियायां क्त, क्तवतु च प्रत्ययौ भूतकाले प्रयुज्येते।
5. पश्चात् छात्रा: तान् नियमान् ज्ञात्वा वाक्यनिर्माणं क्रियानिर्माणञ्च करिष्यन्ति।

➢ **कौशल-विकासः**

1. अनेन कारणेन छात्रेषु वाक्य-निर्माण-कौशलं वर्धिष्यते।
2. वाक्यानां शोधनस्य एवं शुद्ध वाक्यानां लेखनस्य अपि विकासः भविष्यति।
3. छात्राः शुद्धं वाक्यं लिखित्वा कक्षायां प्रदर्शयिष्यन्ति।
4. छात्राः दश धातुभिः सह शतृ, शानच्, क्त, क्तवतु, प्रत्यानाञ्च संयोजनं कृत्वा चत्वारिंशत् पदानांनिर्माणं करिष्यन्ति।

## ❑ शिक्षकाय निवेदनम्

1. छात्राः निर्धारितानां नियमानाम् अनुसारेण एव वाक्यसंरचनां शिक्षकाणां निर्देशनेन करिष्यन्ति।
2. या अपि त्रुटिः भविष्यति तस्याः निराकरणमपि अध्यापकाः यथासमयं करिष्यन्ति।
3. शिक्षकाः आगामि-दिवसे छात्राणां कार्यं अवलोकयिष्यन्ति।
4. यदि कार्यं उत्तमं भविष्यति तदा छात्राणां उत्साहवर्धनाय करतलध्वनिम् अपि कारयिष्यन्ति।
5. तत्पश्चात् स्व विवेकानुसारं सम्मतिं दत्त्वा तेषाम् उत्तरपुस्तिकायां स्वहस्ताक्षरम् अपि करिष्यन्ति।

## ❑ कक्षाकार्यम्

1. शतृ प्रत्ययस्य प्रयोगः कदा भवति?
2. सः कार्यं <u>कुर्वाणः</u> अस्ति। अत्र रेखाङ्किते पदे कः प्रत्ययः ?

## ❑ गृहकार्यम्

1. अध्यापकाः छात्रेभ्यः दश अशुद्धान् वाक्यान् दश च प्रकृति-प्रत्ययौ दत्त्वा तेषां शोधनाय पृथक् करणाय च कथयिष्यन्ति।
2. उपपदविभक्तिनां प्रत्यय युक्तान् च पञ्चशब्दान् दत्त्वा तेषां वाक्येषु प्रयोगाय छात्रान् प्रेरयिष्यन्ति।

## ❑ निर्देशनम्

अस्मिन् पाठे अध्यापकाः छात्रान् कथयिष्यन्ति—भो छात्राः। भवन्तः यत् वाक्यं इतस्ततः पश्यन्तु एतेषां नियमानाम् अनुसारेण एव तस्य शोधनं कुर्वन्तु कारयन्तु च। तदैव युष्माकम् भाषा शुद्धा परिष्कृता च भविष्यति।

❑❑

# अभ्यास-प्रश्नपत्रम्-1

अवधिः होरात्रयम् | पूर्णाङ्काः 80

निर्देशः 1. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

2. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

3. प्रतिखण्डम् उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।

4. प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

5. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

6. सर्वे प्रश्नाः अनिवार्याः सन्ति।

## खण्डः 'क' (अपठित-अवबोधनम्) 5 अङ्काः

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** 5

सुकरातः यूनानदेशस्य प्रसिद्धः दर्शनिकः आसीत्। एकदा तस्य समीपे एकः भक्तः आगच्छत् अपृच्छत् च "महात्मन्! दीपकस्य अधः अन्धकारः किमर्थम् भवति चन्द्रमसि च कलङ्कः किमर्थं भवति?" इति। सुकरातः प्रत्यवदत्-"वत्स! किं भवता दीपके प्रकाशः चन्द्रमसि च शीतलता न दृष्टा? केवलं तत्र अन्धकारः कलङ्कः एव दृष्टः। एषः मनोवृत्तिदोषः एव। यादृशी यस्य भावना भवति सः तद्वस्तु तद्भावेन एव पश्यति। अतः अस्माभिः सद्गुणाः एव द्रष्टव्याः न तु अवगुणाः इति।" अतएव उच्यते यदि नरः सकारात्मक-दृष्ट्या जीवनम् यापयति तदा तस्य सर्वे विकाराः दूरीभवन्ति। मानवस्य जीवने सुखदुःखयोः मूलकारणम् तस्य सकारात्मकः नकारात्मकः च दृष्टिकोणः एव।

**प्रश्नाः**

**I. एकपदेन उत्तरत-** ½ × 2 = 1

(*i*) मानवस्य जीवने सुखदुःखयोः मूलकारणम् किम्?

(*ii*) अस्माभिः चन्द्रमसि का द्रष्टव्या?

**II. पूर्णवाक्येन उत्तरत-** 1 × 2 = 2

(*i*) भक्तः सुकरातम् किम् अपृच्छत्?

(*ii*) मनुष्यस्य सर्वे विकाराः कथं दूरीभवन्ति?

**III. प्रदत्तविकल्पेभ्यः शुद्धम् उत्तरम् चित्वा लिखत-** ½ × 4 = 2

(*i*) 'अपृच्छत्' इति क्रियापदस्य कर्तृपदम् किम्?

(क) सुकरातः (ख) भक्तः (ग) दार्शनिकः (घ) एकः

(*ii*) 'उपरि' इत्यस्य किं विलोमपदम् अनुच्छेदे प्रयुक्तम्?

(क) अधः (ख) अद्य (ग) नीचैः (घ) समीपे

(*iii*) "किमर्थम् भवता दीपकस्य प्रकाशः ..........." इति वाक्ये 'भवता' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(क) सुकराताय (ख) दीपकाय (ग) चन्द्राय (घ) भक्ताय

(*iv*) 'यादृशी' इति विशेषण पदस्य किम् विशेष्यपदम् अनुच्छेदे प्रयुक्तम्?

(क) मनोवृत्तिः (ख) भावना (ग) वस्तु (घ) भावनाः

## खण्डः 'ख' (रचनात्मकं कार्यम्) 15 अङ्काः

2. भवान् अनिलः। भवतां विद्यालये संस्कृतभित्तिपत्रिकाप्रतियोगितायाः प्रदर्शिनी आयोजिता। तद्विषये स्वमित्रं सौरभं प्रति सूचयता भवता लिखिते अधोलिखिते पत्रे मञ्जूषातः रिक्तस्थानानि पूरयित्वा पत्रं पुनः उत्तरपुस्तिकायां लिखत। ½ × 10 = 5

(i) ..............................

हरिद्वारम्

तिथिः ..............................

प्रिय मित्र (ii) ..............................!

अत्र सर्वगतं (iii) .............................. अस्ति। भवतः विद्यालये आयोजितायाः (iv) .............................. विषये पठित्वा मम मनसि महान् आनन्दः जातः। अस्मिन् सत्रे अत्र रचनात्मककार्यस्य अन्तर्गते (v) .............................. प्रदर्शिनी आयोजयिष्यते। सर्वाभिः कक्षाभिः स्वस्वकक्षेषु संस्कृतभित्तिपत्रिकाणां (vi) .............................. भविष्यति। तस्याः कृते पत्रिकायाः नाम्नः पञ्जीकरणम् अपि आवश्यकम् आसीत्। छात्राः एव तत्र सम्पादकाः भविष्यन्ति। अस्माकं पत्रिकायाः नाम (vii) .................... इति अस्ति। अहमेव अस्याः सम्पादकः नियुक्तः जातः। संस्कृतदिवसस्य अवसरे अस्याः उद्घाटनं भविष्यति। भवान् अपि (viii) .................... अस्माकं कार्यं पश्यतु इति मम निवेदनम्।

शेषं पुनः लेखिष्यामि।

स्वपित्रोः सेवायाम् मम (ix) .................... निवेदयतु।

भवताम् अभिन्नं मित्रम्

(x) ....................

**मञ्जूषा**—संस्कृतभित्तिपत्रिकायाः, चित्रवर्णनप्रतियोगितायाः, पतञ्जलिछात्रावासः, प्रदर्शनं, कुशलम्, सौरभ, अनिलः, संस्कृतपीयूषम्, आगत्य, प्रणामम्।

3. मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत। 1 × 5 = 5



**मञ्जूषा**—बसयानम्, कारयानानि, स्कूटरयानेन, मेट्रोयानम्, स्तम्भाः, जनाः, वाहनानि, वृक्षाः,उपरि, अधः, पृष्ठे, सन्ति, चलति, गच्छन्ति, मार्गाः, सेतोः, तीव्रगत्या, शीघ्रम्; विद्युत्स्तम्भाः

अथवा

मञ्जूषायां प्रदत्तशब्दानाम् सहायतया "जलप्रदूषणम्" इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत। 1 × 5 = 5

| |
|---|
| **मञ्जूषा**–अवकरं, नदीषु, जनाः, कार्यशालाभ्यः, दूषितम्, मलम्, क्षिपन्ति, स्वच्छम्, क्षालयन्ति, वस्त्राणि, पूजा-सामग्री, पुष्पाणि, नालिकामार्गेण, जायन्ते, रोगाः, भवन्ति, रुग्णाः, पीत्वा |

**4. निम्न वाक्यानां सरल संस्कृते अनुवादं कुरुत–** 1 × 5 = 5

(*i*) वह घर से जाता है।

(*ii*) तुम विद्यालय में पढ़ोगे।

(*iii*) घर के पास वृक्ष हैं

(*iv*) शीला माता से प्रेम करती है

(*v*) अनन्या शेर से डरती है

## खण्डः 'ग' ( अनुप्रयुक्तव्याकरणम् ) 25 अङ्काः

**5. ( क )** (*i*) उचितं वर्णं चित्वा वर्णवियोजने रिक्तस्थानपूर्तिं कुरुत– ½ × 2 = 1

वृक्षस्यः– व् ऋ क् ...................... अ स् थ् अः

(क) श् (ख) ष् (ग) क्ष् (घ) स्

(*ii*) उचितम् वर्णसंयोजनम् चिनुत–

व् इ द् य् आ ल् अ य् अः = ......................

**( ख )** (*i*) अस्य वर्णस्य उच्चारणस्थानं कण्ठः वर्तते– 1 × 2 = 2

(क) थ् (ख) द् (ग) ध् (घ) घ्

(*ii*) अस्य उच्चारणस्थानम् तालु नस्ति–

(क) इ (ख) य् (ग) च् (घ) त्

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं विच्छेदं कृत्वा लिखत–** 1 × 4 = 4

(*i*) शिष्यः <u>अध्ययन + अर्थम्</u> गुरुम् प्रति गच्छति।

(*ii*) नरः <u>पञ्च + इन्द्रियाणि</u> वशं कुर्यात्।

(क) पञ्चेन्द्रियाणि (ख) पञ्चेन्द्रीयाणि (ग) पञ्चैन्द्रियाणि (घ) पञ्चान्द्रियाणि

(*iii*) पुत्रम् दृष्ट्वा माता <u>उत् + लसिता</u> जाता।

(*iv*) संगीतरहितम् जीवनम् <u>नीरसम्</u> प्रतीयते।

**7. उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत–** 1 × 6 = 6

(*i*) एषः ...................... वशिष्ठस्य आश्रमः अस्ति।

(क) मुनिः (ख) मुनयः (ग) मुने (घ) मुनेः

(*ii*) आश्रमे ...................... हिंसा निषिद्धा। (पशु)

(*iii*) ...................... बालिकायाः माता शिक्षिका अस्ति। (इदम्)

(*iv*) विद्वांसः ...................... वन्दनाम् कुर्वन्ति। (सरस्वती)

(*v*) तत्र ...................... बालकाः भ्रमन्ति। (त्रि)

(*vi*) ...................... कन्यायै भोजनं यच्छ। (एक)

8. उचितधातुरूपाणि चित्वा रिक्तस्थानानि पूरयत– 1 × 3 = 3

(*i*) अस्माकं कक्षायाम् त्रिंशत् छात्राः ..............................।

(क) अस्ति (ख) सन्ति (ग) सन्तिः (घ) सन्ती

(*ii*) ह्यः वयम् 'अभिज्ञानशाकुन्तलम्' इति नाटकम् ..............................। (पठ्)

(*iii*) ग्रीष्मावकाशे मम पिता अस्मान् हिमाचल-प्रदेशे ..............................। (नी)

9. मञ्जूषातः उचितानि पदानि चित्वा अधोलिखिते अनुच्छेदे रिक्तस्थानानि पूरयित्वा अनुच्छेदं पुनः लिखत– 1 × 4 = 4

एकः बालकः उद्याने (*i*) .............................. ((क) वृक्षात् (ख) वृक्षाणाम् (ग) वृक्षे (घ) वृक्षान्) अधः क्रीडति स्म। सहसा प्रचण्डः वायुः अचलत्। (*ii*) .................... परितः वायुमण्डलं धूलिधूसरितम् अभवत्। दीर्घाः शाखाः (*iii*) .................... पृष्ठतः अपतन्। बालकः उच्चैः व्यलपत्। (*iv*) .............................. कुशलः एकः स्वयंसेवकः तत्र आगत्य बालकम् अरक्षत्। एतस्मै परोपकारिणे स्वयंसेवकाय नमः।

**मञ्जूषा**

| उद्यानम्, रक्षाकार्ये, बालकस्य। |
|---|

10. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ पृथक्कृत्य लिखत। 1 × 3 = 3

(*i*) रमेशः प्रतिदिनम् अम्बाम् <u>प्रणम्य</u> विद्यालम् गच्छति। ( .................... )

(*ii*) बालकः दुग्धम् <u>पीत्वा</u> स्वपिति। (....................)

(*iii*) सायंकाले बालाः .............................. उद्याने गच्छन्ति।

(क) क्रीडतुम् (ख) क्रीडयितुम् (ग) क्रीडितुम् (घ) क्रीडातुम्

11. निम्न पदेषु उपसर्गान् शब्दान्/धातून् च पृथक् कुरुत– ½ × 4 = 2

(*i*) उपकरोति – ..............................

(*ii*) अनुसरति – ..............................

(*iii*) विहरति – ..............................

(*iv*) निरगच्छत् – ..............................

| खण्डः 'घ' (पठित-अवबोधनम्) के प्रश्न<br>पाठ्यपुस्तक पर आधारित हैं तथा 35 अंक के हैं। |
|---|

# अभ्यास-प्रश्नपत्रम्–2

अवधिः होरात्रयम् | पूर्णाङ्काः 80

**निर्देशः** — विद्यार्थी कृपया निर्देश अभ्यास प्रश्नपत्रम्-1 से देखें।

## खण्डः 'क' ( अपठित-अवबोधनम् ) 5 अङ्काः

**1. गद्यांशान् पठित्वा प्रश्नान् उत्तरत।** (गद्यांश को पढ़कर प्रश्नों के उत्तर दीजिए। Read the paragraph and answer the questions.) 5

एकदा राजकुमारः सिद्धार्थः विहारार्थम् उपवनं गतः। सहसा तत्र एकां क्रन्दनध्वनिं श्रुत्वा सः इतस्ततः अपश्यत्। बाणेन विद्धः एकः हंसः भूमौ पतितः आसीत्। एतत् दृष्ट्वा सिद्धार्थस्य चित्तं करुणया व्याकुलं जातम्। सः धावित्वा हंसस्य शरीरात् बाणं निष्कास्य तम् अङ्के अधारयत्। अत्रान्तरे देवदत्तः धावन् तत्र प्राप्तः। सिद्धार्थस्य हस्ते हंसं दृष्ट्वा सः उच्चैः अवदत्—''सिद्धार्थ! एषः मम हंसः। मया बाणेन निपातितः। अतः मह्यं देहि।'' सिद्धार्थः दृढतया अवदत्—''अहं न दास्यामि। अहम् अस्य रक्षकः अस्मि।'' राजा वृत्तान्तं आकर्ण्य आदिशत्—''यस्य पार्श्वे हंसः स्वयमेव आगमिष्यति सः तस्यैव भविष्यति। हंसः सिद्धार्थस्य समीपं गतवान्। सत्यमिदम् यत्—भक्षकात् रक्षकः श्रेयान् भवति।''

**प्रश्नाः—I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.) ½ × 2 = 1

(*i*) कः भूमौ पतितः आसीत्? (*ii*) हंसः कस्य समीपं गतवान्?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.) 1 × 2 = 2

(*i*) देवदत्तः सिद्धार्थम् उच्चैः किम् अवदत्? (*ii*) सिद्धार्थः दृढ़तया किम् अवदत्?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.) ½ × 4 = 2

(*i*) 'चित्तम्' इति पदस्य अनुच्छेदे विशेषणपदं किं प्रयुक्तम्?

(क) करुणया (ख) व्याकुलं (ग) जातम् (घ) एतत्

(*ii*) 'अतः मह्यं देहि' अस्मिन् वाक्ये 'मह्यं' पदम् कस्मै प्रयुक्तम्?

(क) देवदत्ताय (ख) ईश्वराय (ग) नृपाय (घ) सिद्धार्थाय

(*iii*) 'देहात्' अस्य पदस्य समानार्थकं पदं लिखत।

(क) शरीरं (ख) ग्रामात् (ग) शरीरात् (घ) गृहात्

(*iv*) 'दृष्ट्वा' इति पदे कः धातुः?

(क) दृष् (ख) दृश् (ग) दृष्ट् (घ) दृष्ट

## खण्डः 'ख' ( रचनात्मक कार्यम् ) 15 अङ्काः

**2. भवतः नाम पुनीत। ओडिशाप्रदेशस्य कृष्णनगरस्य च भवान्वासी। भवतः मित्रं सोमेशः गुर्जरप्रदेशे भूकम्पपीड़ितसहायतार्थम् 'भुज' नगरं गच्छति। भवान् अपि भूकम्पपीडितान् सहायतां कर्तुमिच्छति। एतदर्थम् अधोलिखिते पत्रे रिक्तस्थानानां पूर्तिः मञ्जूषायाः उपयुक्त शब्द चयनेन कुरुत।** ½ × 10 = 5

(आपका नाम पुनीत है। और आप ओडिशा प्रदेश के कृष्णनगर के निवासी हैं। आपका मित्र सोमेश गुजरात प्रदेश में भूकम्प पीड़ितों की सहायता के लिए 'भुज' नगर जा रहा है। आप भी भूकम्प पीड़ितों की सहायता करना चाहते हैं। इसके लिए नीचे लिखे पत्र में खाली स्थानों को मञ्जूषा के उचित शब्दों के चयन से भरिए। You are Puneet, living

at Krishnanagar in Odisha Province. Your friend, Somesh is going to 'Bhuj city' in Gujarat for the help of earthquake affected people. You also want to help earthquake affected people. For this fill in the blanks of given letter with suitable words given in the box.)

कृष्णनगरम्,
(*i*) ..............................
दिनाङ्कः ......................

प्रिय सोमेश,
(*ii*) .................................।
मया (*iii*) ............................ ज्ञातम् यत् भवान् गुर्जरप्रदेशे भूकम्पपीडितानां सहायतार्थम् भुजनगरं गन्तुम् इच्छति, (*iv*) ......................... च शिविरसामग्रीम् भोज्यसामग्रीमपि नेष्यति। कृपया मम योगदानम् अपि (*v*) ......................... भवान्। अहम् एकत्रीकृतानि पञ्चसहस्र (*vi*) ............................ अपि च भोज्यपदार्थान् प्रेषयिष्यामि (*vii*) ......................... सन्तु युष्माकम् पन्थानः। (*viii*) ............................... मे प्रणामाञ्जलिम् निवेदयतु।

भवताम् सुस्वास्थ्यं (*ix*) ..................................

भवतः अभिन्नमित्रम्
(*x*) ...............................

| मञ्जूषा—नमस्ते, पितृचरणयोः, ट्रकयानेन, स्वमात्रा, स्वीकरोतु, ओडिशातः, शुभाः, कामयमानः, पुनीतः, रुप्यकाणि। |
|---|

3. **चित्रं दृष्ट्वा प्रदत्तपदानाम् सहायतया चित्रस्य वर्णनम् संस्कृत पञ्चवाक्येषु कुरुत।** **1 × 5 = 5**

(चित्र को देखकर दिए गए शब्दों की सहायता से चित्र का वर्णन संस्कृत के पाँच वाक्यों में कीजिए।)

(Describe the picture in five sentences in Sanskrit with the help of the given words in the box.)

| मञ्जूषा—वृक्षाः, अधः, दोलासु, जनाः, क्रीडतः, गीतानि, तित्तलिकाः, बालौ, भ्रमन्ति, कन्दुकेन, आम्रवृक्षाः, पिकः, गगनम्, पक्वानि। |
|---|



**अथवा**

**मञ्जूषायां पदानि गृहीत्वा सरल संस्कृते 'परोपकारः' इति विषये पञ्चवाक्यानि लिखत।** **1 × 5 = 5**

| |
|---|
| **मञ्जूषा**—परेषाम् उपकार:, एव, परोपकार:, परोपकारी सदैव सुखी, परोपकार:, पुण्याय, महापुरुषा:, परोपकारं, जीवनस्य, आनन्द:, देवानाम् लक्षणम्, राक्षसाणाञ्च विरोध:, प्रकृति: परोपकारं करोति, नद्य: वहन्ति, वृक्षा: फलन्ति। |

**4. निम्न वाक्यानां सरल संस्कृते अनुवादं कृत्वा लिखत–** $1 \times 5 = 5$

(*i*) महापुरुष लोगों में श्रेष्ठ होते हैं। (*ii*) मैं कल अपने घर जाऊँगा।

(*iii*) गंगा हिमालय से निकलती है। (*iv*) देवदत्त से रामदत्त अलग है।

(*v*) शोर मत करो।

## खण्ड: 'ग' ( अनुप्रयुक्त-व्याकरणम् ) 25 अङ्का:

**5. ( क ) अधोलिखितेषु वर्णेषु उचितै: वर्णौ: वर्णसंयोजनं क्रियताम्।** $\frac{1}{2} \times 2 = 1$

(नीचे लिखे वर्णों में से शुद्ध वर्ण द्वारा वर्ण-संयोजन कीजिए।)

(Arrange the letters by the following correct letters.)

(*i*) क् + ष् + अ + त् + र् + इ + य् + अ + : = ☐ त्रिय:

(क) क्ष् (ख) क्ष (ग) क्षि (घ) क्

(*ii*) प् + अ + ठ् + आ + म् + इ = पठा ☐

**( ख ) निम्नलिखितानाम् प्रश्नानाम् उत्तराणि अधोदत्तान् पदान् नीत्वा लिखत।** $1 \times 2 = 2$

(नीचे लिखे प्रश्नों के उत्तर नीचे दिए पदों से लेकर लिखिए। Write the answers of the following questions.)

(*i*) र्, ब्, क्, च् इति वर्णेषु क: वर्ण: ओष्ठ्य: अस्ति?

(क) ब् (ख) र् (ग) च् (घ) क्

(*ii*) 'म्' इति वर्णस्य उच्चारणस्थानं किम्?

**6. रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा अधोदत्तेषु पदेषु शुद्धं पदं चित्वा वाक्यानि पुन: लिखत।** $1 \times 4 = 4$

(रेखांकित पदों की सन्धि-विच्छेद अथवा सन्धि नीचे दिए गए पदों में से शुद्ध पद चुनकर वाक्य पुन: लिखिए। Separate or join the underlined words by the choosing the correct words and re-write them.)

(*i*) <u>विद्या</u> + <u>अर्थी</u> सुखं त्जयेत्। (*ii*) नारद: <u>देव</u> + <u>ऋषि:</u> आसीत्।

(*iii*) भक्ता: ईशभक्तौ <u>तल्लीना:</u> सन्ति।

(क) तल् + लीना: (ख) तत् + लीना: (ग) तद् + लीना: (घ) तम् + लीना:

(*iv*) अये कुमारलक्ष्मण! <u>गुरुरयम्</u>।

**7. अधोलिखितेषु उचितविभक्तियुक्तं पदं चित्वा रिक्त स्थानपूर्ति: क्रियताम्।** $1 \times 6 = 6$

(नीचे लिखे उचित विभक्तियुक्त शब्द को चुनकर वाक्य को पूरा कीजिए।)

(Complete the sentence after choosing the suitable inflexion of the words given below.)

(*i*) बालक: ................................ गच्छति। (विद्यालय)

(*ii*) ................................ गृहे कोऽपि न वसति। (इदम्)

(*iii*) ................................ पिता अध्यापक: अस्ति। (अस्मद्)

(क) मम (ख) अस्माभि: (ग) अस्मान् (घ) माम्

(*iv*) बालकः ............................ सह क्रीडति। (कन्दुक)

(*v*) रामः ............................ भ्रातृषु ज्येष्ठतमः आसीत्। (चतुर्)

(*vi*) कृष्णः ............................ भ्रातरौ आस्ताम्। (द्वि)

**8. कोष्ठके प्रदत्तधातूनाम् लकारस्य उचित धातुरूपैः रिक्तस्थानानि पूरयत।** $1 \times 3 = 3$

(कोष्ठक में दिए गए धातुओं के लकारों के उचित धातु रूपों से रिक्त स्थानों की पूर्ति कीजिए।)

(Fill in the blanks with the suitable verb-stem from the brackets dhatoos lakars.)

(*i*) सम्भवतः काकः पिपासया पीडितः ........................................। (अस्-विधिलिङ् लकारे)

(*ii*) जलबिन्दवः मधुरं संगीतं ........................................। (जन्-लट् लकारे)

(*iii*) त्वम् अपि पुस्तकं ........................................। (पद्-लोट् लकारे)

(क) पठत (ख) पठन्तु (ग) पठसि (घ) पठ

**9. अधोलिखितेषु मञ्जूषायाः पदेषु उचितं शब्दं चित्वा रिक्तस्थानानि पूरयत।** $1 \times 4 = 4$

(नीचे लिखे पदों में से उचित शब्द को चुनकर रिक्त स्थानों की पूर्ति कीजिए।)

(Fill in the blanks with suitable words choosing from the given words in box.)

मम (*i*) .................. परितः उद्यानं वर्तते। छात्राः तत्र यथासमयं मित्रैः (*ii*) .................. भ्रमन्ति खेलन्ति च। ते प्रातः विद्यालयम् आगत्य "सर्वेभ्यः (*iii*) .................. नमः" इति उक्त्वा एव स्वकक्षां गच्छन्ति। ते कदापि पठन समये (*iv*) .................. बहिः न गच्छन्ति यतः ते सर्वेषां छात्राणां श्रेष्ठतमाः छात्राः सन्ति।

| मञ्जूषा—गुरुभ्यः, विद्यालयं, विद्यालयात्, सह |
|---|

**10. रेखाङ्कितपदे प्रदत्त प्रत्ययं प्रयुज्य पुनः वाक्यसंयोजनं क्रियताम्।** $1 \times 3 = 3$

(रेखांकित पद से प्रकृति-प्रत्यय अलग करके लिखिए।)

(Separate the origin word and suffix of the underlined words and write.)

(*i*) रमा <u>वि + हस् + ल्यप्</u> ..................अवदत्।

(*ii*) रामः <u>पठितुं</u> गच्छति। ..................।

(*iii*) मोहनः लेखं <u>लिखित्वा</u> तं प्रदर्शयति ..................।

(क) लिख + क्त्वा (ख) लिखि + क्त्वा (ग) लिखि + त्वा (घ) लिख् + क्त्वा

**11. निम्नलिखितान् उपसर्गान् धातुभिः सह संयोज्य पदानि लिखत–** $\frac{1}{2} \times 4 = 2$

(*i*) अनु – ..........................

(*ii*) सम् – ..........................

(*iii*) वि – ..........................

(*iv*) निर् – ..........................

| खण्डः 'घ' (पठित-अवबोधनम्) के प्रश्न<br>पाठ्यपुस्तक पर आधारित हैं तथा 35 अंक के हैं। |
|---|

# अभ्यास-प्रश्नपत्रम्–3

अवधिः होरात्रयम् पूर्णाङ्काः 80

**निर्देशः** — विद्यार्थी कृपया निर्देश अभ्यास प्रश्नपत्रम्-1 से देखें।

## खण्डः 'क' ( अपठित-अवबोधनम् ) 5 अङ्काः

**1. गद्यांशान् पठित्वा प्रश्नान् उत्तरत।** (गद्यांश को पढ़कर प्रश्नों के उत्तर दीजिए। Read the paragraph and answer the questions.) 5

गङ्गा भारतस्य सर्वासु नदीषु पवित्रतमा नदी अस्ति। इयं हिमालयस्य गङ्गोत्री स्थानात् निर्गच्छति। पर्वतस्य प्रान्तेभ्यः निःसृत्य गङ्गा हरिद्वार-नामके स्थाने समतलं भूभागं स्पृशति। तत्र हरिद्वार-तीर्थे प्रतिवर्षं लक्षाणि पुरुषाः नार्यश्च गच्छन्ति गङ्गायाश्च शीतले जले स्नानं कृत्वा निजभाग्यस्य प्रशंसां कुर्वन्ति। गङ्गाया उत्पत्ति-विषये इयं कथा प्रचलिता अस्ति यत् भगीरथः नामकः नृपः स्वपूर्वजानाम् उद्धाराय तपस्याम् अकरोत्। तपस्यायाः प्रभावेण सः गङ्गां स्वर्गात् भूतले आनयत्। अतः एव गङ्गा "भागीरथी" इत्यपि कथ्यते। प्रारम्भे अस्याः स्रोतः लघुः अस्ति पश्चात् अनेके निर्झराः अस्यां नद्याम् आमिलन्ति, यैः गङ्गायाः जलप्रवाहः तीव्रः भवति। गङ्गायाः तटे लक्ष्मणझूला, ऋषिकेशः, हरिद्वारम्, प्रयागः, वाराणसी च एतानि प्रधानानि तीर्थ-स्थानानि सन्ति, यत्र प्रतिदिनं सहस्रं जनाः श्रद्धया स्नानं कुर्वन्ति, गङ्गां च पूजयन्ति।

**प्रश्नाः**—

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.) ½ × 2 = 1

(*i*) नदीषु पवित्रतमा नदी काऽस्ति?

(*ii*) गङ्गां भूतले कः आनयत्?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.) 1 × 2 = 2

(*i*) भगीरथः किमर्थम् तपस्याम् अकरोत्?

(*ii*) गङ्गायाः तटे कानि प्रधानानि तीर्थस्थानानि सन्ति?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.) ½ × 4 = 2

(*i*) "प्रधानानि तीर्थस्थानानि" अत्र किं विशेषणपदम्?

(क) तीर्थ (ख) तीर्थस्थानानि (ग) प्रधान (घ) प्रधानानि

(*ii*) 'मन्दः' इति पदस्य विपरीतार्थकं पदं गद्यांशे किमस्ति?

(क) तीव्रः (ख) शनैः (ग) निरन्तरं (घ) प्रबलः

(*iii*) 'अनेके निर्झराः अस्यां नद्याम् आमिलन्ति'। अत्र क्रियापदं किम्?

(क) अनेके (ख) आमिलन्ति (ग) नद्याम् (घ) निर्झराः

(*iv*) 'कुर्वन्ति' इति क्रियायाः कर्तृपदं किं वर्तते?

(क) पुरुषाः (ख) नार्यश्च (ग) पुरुषाः नार्यश्च (घ) नारीः

## खण्डः 'ख' ( रचनात्मक कार्यम् ) 15 अङ्काः

**2. अधोलिखिते मित्रं प्रति पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तपदानां शब्दानां सहायतया पूरयत।**

(मित्र को नीचे लिखे पत्र में रिक्त स्थानों को मञ्जूषा में दिए गए शब्दों की सहायता से पूर्ण कीजिए। Fill in the blanks of given letter to a friend with the help of words given in the box.) ½ × 10 = 5

(*i*) ......................

उत्तरप्रदेशः

दिनाङ्कः 01.07.20.....

प्रिय (*ii*) ...................... श्याम।

नमस्ते।

अत्र कुशलं (*iii*) .............................. । मम पितुः (*iv*) ......................... वयं सपरिवारम् गाजीपुरं प्राप्ताः। मया अत्र एकस्मिन् (*v*) .................... विद्यालये प्रवेशः लब्धः। यद्यपि अत्र आङ्गल-भाषामाध्यमेन शिक्षा दीयते तथापि (*vi*) .................... पठनव्यवस्था अस्ति। अस्य प्रधानाचार्यः अतीव (*vii*) .................... अस्ति। शिक्षकाश्च अतीव (*viii*) .............................. सन्ति। स्वगृहे सर्वेभ्यः मम प्रणामं (*ix*) .............................. ।

तव अभिन्नं मित्रम्

(*x*) ......................

| |
|---|
| **मञ्जूषा**—निवेदयतु, मित्र, गाजीपुरतः, क.ख.ग., स्थानान्तरणवशात्, विनम्रः, योग्याः, तत्रास्तु, संस्कृतस्य, प्रसिद्धे। |

**3. चित्रं दृष्ट्वा मञ्जूषातः पदानि आदाय पञ्चवाक्यानि संस्कृते लिखत।** 1 × 5 = 5

(चित्र को देखकर मञ्जूषा से शब्दों को लेकर पाँच वाक्य संस्कृत में लिखिए।)

(Write five sentences in Sanskrit with the help of the words in the box after seeing the picture.)

| |
|---|
| **मञ्जूषा**—उद्यानस्य, केचन, क्रीडन्ति, उद्याने, वृक्षाः, भ्रमणम्, मालाकारः, वृक्षान्, पुष्पाणि, बालकाः। |



अथवा

मञ्जूषायां पदानां सहायतया संस्कृत भाषायां 'क्रीडाया: महत्त्वम्' इति विषयमुपरि पञ्चवाक्यानि लिखत। $1 \times 5 = 5$

| |
|---|
| **मञ्जूषा**—जीवने लाभदायिका, शारीरिक उन्नते: आधार:, संसारे क्रीडानां महत्त्वम्, हॉकी राष्ट्रीया क्रीडा, क्रीडका: सम्मानयुक्ता:, उच्चपदेषु नियुक्ता:, क्रिकेट क्रीडका: संसारे सम्मानं, प्रत्येकं संस्थासु खेलविभागा: भवन्ति। |

**4. निम्नलिखितानां वाक्यानां सरल संस्कृते अनुवादं कृत्वा लिखत–** $1 \times 5 = 5$

(*i*) तुम कल कहाँ गए थे? (*ii*) वे सब मेरे भाई हैं।

(*iii*) घर के चारों ओर वृक्ष हैं। (*iv*) रावण विभीषण से बड़ा था।

(*v*) श्रीकृष्ण को गोपाल भी कहा जाता है।

## खण्ड: 'ग' (अनुप्रयुक्त-व्याकरणम्) 25 अङ्का:

**5. (क) अधोलिखितयो: शब्दयो: उचितं वर्णविन्यार्स चित्वा लिखत।** $\frac{1}{2} \times 2 = 1$

(नीचे लिखे शब्दों का उचित वर्ण-विन्यास चुनकर लिखिए। Arrange the letters of the following words.)

(*i*) उष्माण: – (क) उ + ष् + म् + आ + ण् + अ + :

(ख) ऊ + ष + म् + आ + ण् + अ + :

(ग) उ + ष + म् + अ + ण् + आ + :

(*ii*) क्रियताम् – ...... + ...... + ...... + ...... + ...... + ...... + ...... + ......

**(ख) निम्नलिखितानाम् वर्णानाम् उच्चारणस्थानं लिखत।** $1 \times 2 = 2$

(नीचे लिखे वर्णों के कोष्ठक से लेकर उचित उच्चारण स्थान लिखिए। Write the pronunciation place of the following letters.)

(*i*) ऋ – (क) कण्ठ: (ख) मूर्धा (ग) दन्ता: (घ) तालु:

(*ii*) श् – ....................................

**6. अधोलिखितम् अनुच्छेदं पठित्वा स्थूलपदेषु सन्धिं सन्धिविच्छेदं अधो दत्तै: शुद्धपदै: कृत्वा मञ्जूषां पूरयत।** $1 \times 4 = 4$

(नीचे लिखे अनुच्छेद को पढ़कर स्थूल पदों की सन्धि-विच्छेद अथवा सन्धि नीचे दिए गए पदों द्वारा मञ्जूषा की पूर्ति कीजिए। Read the following passage and Separate or join the bold words by the correct words.)

अम्बे! **अद्याहम्** (*i*) ............... + ............... (अद्य + आहम्, अद्य + अहम्, अद्या + हम्, अद्या + अहम्) मित्रेण सह शुक्रतालं गतवान्। तत्र (*ii*) ............... + ............... **गंगाया: + तटे** एक: प्राचीन: विशाल: वट: अस्ति। तरुच्छाया सुघना। (*iii*) .................... + .................... **तत्र + एव** कश्चन महातपस्वी वसति। तस्य (*iv*) ................ + ................ **मुखात् + अमृतं** ............... + ............... वच: श्रोतुं जना: आगच्छन्ति। अद्य तस्योपदेशस्य सार: अस्ति दानेन तुल्या निधिरस्ति नान्या।

**7. अधोलिखितेषु रिक्तस्थानानि समुचितै: पदै: सम्पूर्यताम्–** $1 \times 6 = 6$

(नीचे लिखे **मोटे** पदों की उचित विभक्ति को चुनकर लिखिए।)

(Write the appropriate form of inflexion of the **bold** words from the options given below.)

(*i*) प्राचार्येण .................... उपहारा: दीयन्ते। (रमा)

(क) रमायै (ख) रमाया: (ग) रमाम् (घ) रमया

(*ii*) .................... सर्वश्रेष्ठा गंगा।

(*iii*) वानराः ..................... भक्षयन्ति। (*iv*) ..................... बालिका किम् करोति?

(*v*) तत्र ..................... फलानि पतितानि सन्ति (त्रि) (*vi*) सः ..................... बालकोऽस्ति। (एक)

**8. कोष्ठकानाम् उचितधातुरूपैः वाक्यानि पूरयत।** $1 \times 3 = 3$

(कोष्ठकों के उचित धातु रूपों से वाक्यों को पूरा कीजिए। Complete the sentences with suitable verb-stems from the bracket.)

(*i*) वयं संस्कृतं ................................. । (पठ्-लट् लकारे)

(क) पठामि (ख) पठावः (ग) पठामः (घ) पठथः

(*ii*) ह्यः सः ग्रामम् ................................. । (गम्-लङ् लकारे)

(*iii*) अहम् पितरम् ................................. । (सेव्-विधिलिङ लकारे)

**9. अधोलिखिते अनुच्छेदे मञ्जूषायाः उचितं शब्दं चित्वा रिक्तस्थानानि पूरयत।** $1 \times 4 = 4$

(नीचे लिखे अनुच्छेद में मञ्जूषा से उचित शब्द को चुनकर रिक्त स्थानों की पूर्ति कीजिए।)

(Fill in the blanks with suitable words choosing from the given in the box.)

अद्य रामस्य गृहे उत्सवः वर्तते यतः सः पठने (*i*) ..................... अस्ति अतः सः परीक्षायां पूर्णान् अङ्कान् प्राप्नोत्। सः अनावश्यकं (*ii*) ..................... बहिः कदापि न भ्रमति। सः कदापि (*iii*) ..................... न बिभेति। सः (*iv*) ..................... ((क) छात्राणाम्/छात्रेषु (ख) छात्रेभ्यः (ग) छात्राणाम् (घ) छात्रैः) योग्यतमः अस्ति। अतः तम् परितः तस्य मित्राणि अपि उपतिष्ठन्ति।

| मञ्जूषा–विद्यालयात्, निपुणः, शिक्षकेभ्यः। |
|---|

**10. कोष्ठकप्रदत्त धातुप्रत्ययसंयोजनेन उचितेन पदेन रिक्तस्थानपूर्तिः क्रियताम्।** $1 \times 3 = 3$

(कोष्ठक में दिए गए धातु प्रत्यय को जोड़कर उचित पद के द्वारा रिक्त स्थान की पूर्ति कीजिए।) (Fill in the blanks by joining (धातु प्रत्यय) root-suffix in the brackets.)

(*i*) शिशुः ................................................ मातरं प्रसादयति। (वि + हस् + ल्यप्)

(*ii*) एते जनाः भोजनं ................................................ विश्रामं कुर्वन्ति। (कृ + क्त्वा)

(*iii*) अहम् फलानि **क्रेतुम्** ................................................ इच्छामि।

(क) क्रीण् + तुमुन् (ख) क्रे + तुमुन् (ग) कृ + तुमुन् (घ) क्रे + तुम्

**11. निम्न पदेषु उपसर्गान् धातून् च पृथक् कुरुत–** $\frac{1}{2} \times 4 = 2$

(*i*) अनुधावन्ति – ..........................

(*ii*) विहसेत् – ..........................

(*iii*) अन्व भवत – ..........................

(*iv*) अधिकरोति – ..........................

| खण्डः 'घ' (पठित-अवबोधनम्) के प्रश्न पाठ्यपुस्तक पर आधारित हैं तथा 35 अंक के हैं। |
|---|

# अभ्यास-प्रश्नपत्रम्–4

अवधिः होरात्रयम् | पूर्णाङ्काः 80

**निर्देशः** — विद्यार्थी कृपया निर्देश अभ्यास प्रश्नपत्रम्-1 से देखें।

## खण्डः 'क' (अपठित-अवबोधनम्) 5 अङ्काः

**1. गद्यांशान् पठित्वा प्रश्नान् उत्तरत।**

(गद्यांश को पढ़कर प्रश्नों के उत्तर दीजिए।

(Read the paragraph and answer the questions.) 5

एकदा एकः नरः सरोवर तटे अभ्रमत्। सः गम्भीरचिन्तने रतः आसीत्। सहसा वानराणां कोलाहलैः तस्य ध्यानभङ्गम् अभवत्। सः अपश्यत् यत् रक्तवर्णाः अतिविकरालवानराः नाति दूरे आसन्। सः धावितुम् आरभत। तं धावन्तं दृष्ट्वा वानराः अपि अनुधावितवन्तः। भीतः सः तीव्रगत्या धावितुम् आरभत। इदं दृष्ट्वा कश्चित् वृद्धजनः उच्चस्वरेण अकथयत्— "मा धाव। भयं त्यक्त्वा तत्रैव स्थिरः भव।" इदं श्रुत्वा सः तथैव अकरोत्। स्थिरं तं दृष्ट्वा वानराः अपि तत्रैव स्थितवन्तः। साहसं कृत्वा निर्भीकदृष्ट्या सः वानरान् अपश्यत्। तं निर्भीकं दृष्ट्वा वानरसमूहः ततः पलायितः। अहो आश्चर्यम्! कीदृशः चमत्कारः। अनेन तस्य ज्ञान-चक्षुषी उन्मीलिते। तेन ज्ञातं यत् आपत्तिभ्यः मुक्तिः दृढ़संकल्पेन, साहसेन धैर्येण च भवति, न तु पलायनेन। किं भवन्तः जानन्ति एषः नरः कः आसीत्? एषः स्वामी विवेकानन्दः आसीत्।

**प्रश्नाः**—

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.) ½ × 2 = 1

(*i*) गम्भीरचिन्तने रतः कः आसीत्?

(*ii*) वानराणां कोलाहलैः कस्य ध्यानभङ्गम् अभवत्?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.) 1 × 1 = 1

(*i*) नरः कीदृशान् वानरान् दृष्ट्वा धावितुम् आरभत?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.) ½ × 4 = 2

(*i*) उचितपदैः रिक्तस्थानानि पूरयत—

एषः नरः ......................आसीत्।

(क) वृद्धः (ख) स्वामी (ग) स्वामीविवेकानन्दः (घ) स्वामि

(*ii*) 'धावितः' इत्यर्थे किं समानार्थकपदं गद्यांशे प्रयुक्तम्?

(क) स्थितः (ख) पलायितः (ग) स्थितवन्तः (घ) रतः

(*iii*) 'रक्तवर्णाः अतिविकरालवानराः' अनयोः पदयोः किं विशेष्यपदम् अस्ति?

(क) वानरः (ख) वानरा (ग) अतिविकराल वानराः (घ) वानर

(*iv*) "भीतः सः तीव्रगत्या धावितुम् आरभत" अस्मिन् वाक्ये 'सः' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(क) स्वामीविवेकानन्दः (ख) स्वामीविवेकानन्दाय (ग) स्वामिन् विवेकानन्दाय (घ) स्वामिनः विवेकानन्दाय

**IV. अस्य गद्यांशस्य समुचित-शीर्षकम् लिखत।** 1 × 1 = 1

(इस गद्यांश का उचित शीर्षक लिखिए। Write an appropriate title of this passage.)

## खण्डः 'ख' ( रचनात्मक कार्यम् ) 15 अङ्काः

2. **प्रधानाचार्यं प्रति शुल्कक्षमापनार्थं लिखिते पत्रे मञ्जूषायां प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत।** $\frac{1}{2} \times 10 = 5$

(प्रधानाचार्य को फीस (शुल्क) माफी के लिए लिखे गए पत्र में दिए गए शब्दों से खाली जगह भरकर उत्तर पुस्तिका में फिर से लिखिए। Re-write this application again in answer book after filling the blanks with the help of words from the box written to the principal for remission of fee.)

सेवायाम्
(*i*) ..........................!
दयानन्द एंग्लो वैदिक विद्यालयः
शिमला।
विषयः—शुल्कक्षमापनार्थं निवेदनम्।
सविनयम् निवेदनम् अस्ति यत् अहं भवतः विद्यालयस्य (*ii*) .................... एकः छात्रः अस्मि। मम (*iii*) .................... एकः लिपिकः अस्ति। तस्य मासिकं वेतनं (*iv*) .................... अस्ति। मम एकः भ्राता अष्टम्यां भगिनी च पञ्चम्यां कक्षायां पठतः। अस्माकं (*v*) .................... निर्वाहः अतीव काठिन्येन (*vi*) ....................। अहं कक्षायां प्रतिवर्षम् प्रथमं स्थानं प्राप्नोमि। अतः (*vii*) .................... प्रार्थये। आशासे अत्र भवान् मम एतां प्रार्थनां (*viii*) .................... अनुग्रहीष्यन्ति।
(*ix*) ....................।

भवतां (*x*)....................
मनमोहनः

> **मञ्जूषा**—भवति, शुल्कक्षमापनार्थम्, स्वीकृत्य, कुटुम्बस्य, सधन्यवादः, पिता, सहस्रद्वयम्, नवमकक्षायाः, विनीतशिष्यः, प्राचार्य महोदयाः।

3. **चित्रस्य वर्णनं पञ्चसुसंस्कृतवाक्येषु कुरुत।**

(चित्र का वर्णन पाँच संस्कृत वाक्यों में कीजिए। Describe the picture in five sanskrit sentences.) $1 \times 5 = 5$

> **मञ्जूषा**—बालदिवस-समारोहः, शुभारम्भः, विशिष्टाः, जनः, स्त्रियः, ध्वनिप्रसारकयन्त्रेण, वक्ता, भवनम्, मञ्चे, छात्राः।



अथवा

मञ्जूषायां पदानां सहायतया संस्कृत भाषायां 'क्रीडायाः महत्त्वम्' इति विषयमुपरि पञ्चवाक्यानि लिखत। 1 × 5 = 5

| |
|---|
| मञ्जूषा—जीवने लाभदायिका, शारीरिक उन्नतेः आधारः, संसारे क्रीडानां महत्त्वम्, हॉकी राष्ट्रीया क्रीडा, क्रीडकाः सम्मानयुक्ताः, उच्चपदेषु नियुक्ताः, क्रिकेट क्रीडकाः संसारे सम्मानं, प्रत्येकं संस्थासु खेलविभागाः भवन्ति। |

**4. निम्नलिखित वाक्यानां सरल संस्कृते अनुवादं कृत्वा लिखत–** 1 × 5 = 5

(*i*) सब लोग सुखी हों।
(*ii*) राम रावण के लिए काफी है।
(*iii*) श्रीकृष्णः ने कंस को मारा।
(*iv*) वृक्ष के ऊपर पक्षी बैठे हैं।
(*v*) राम के साथ लक्ष्मण भी थे।

## खण्डः 'ग' ( अनुप्रयुक्त-व्याकरणम् ) 25 अङ्काः

**5. ( क ) निम्न पदयोः उचितेन पदेन वर्णसंयोजनं वियोजनं वा कुरुत–** ½ × 2 = 1

(*i*) चरणामृतम्– च् + अ + र् + अ + ……… + आ + म् + ऋ + त् + अ + म्

(क) न्   (ख) ण्   (ग) ङ्   (घ) म्

(*ii*) म् + अ + न् + अ + स् + व + ई = ……………………

**( ख )** (*i*) 'रामान्' अत्र 'र्' वर्णस्य उच्चारणस्थानं किम्? 1 × 2 = 2

(क) तालुः   (ख) कण्ठः   (ग) मूर्धा   (घ) ओष्ठौ

(*ii*) 'जीविका' अत्र कण्ठ्यः वर्णः कः?

**6. रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा अधोदत्तेषु पदेषु शुद्धं पदं चित्वा वाक्यानि पुनः लिखत।** 1 × 4 = 4

(रेखांकित पदों की सन्धि-विच्छेद अथवा सन्धि नीचे दिए गए पदों में से शुद्ध पद चुनकर वाक्य पुनः लिखिए। Separate or join the underlined words by the choosing the correct words and re-write them.)

(*i*) नकुलः तत् + चरणयोः प्रेम्णा अलुठत्।

(क) तत्चरणयोः   (ख) तच्चरणयोः   (ग) तद्चरणयोः   (घ) तन्चरणयोः

(*ii*) देवेन्द्रः देवानां प्रमुखः आसीत्।

(*iii*) सः प्रमुखं जनं दृष्ट्वा प्रासीदत।

(*iv*) सः वैकुण्ठवासी हरिः + अस्ति।

**7. कोष्ठकेषु प्रदत्तेभ्यः पदेभ्यः समुचितविभक्तियुक्तैः पदैः चित्वा रिक्तस्थानानि पूरयत।** 1 × 6 = 6

(कोष्ठकों में दिए गए शब्दों में उचित विभक्ति युक्त शब्दों को चुनकर खाली स्थानों को भरिए।)
(Fill in the blanks after choosing the suitable inflexion of the words from the brackets.)

(*i*) (भवत्) …………………………………… किम् नाम?

(क) भवान्   (ख) भवन्तं   (ग) भवतः   (घ) भवते

(*ii*) (तत्) …………………………………… पुत्रः विद्यालयं गच्छति।

(*iii*) (विद्वस्) ………………………… सर्वत्र पूज्यते।

(*iv*) (राजन्) ………………………… स्वदेशे एव पूज्यन्ते।

(*v*) देवाः ………………………… असुरान् जयन्ते। (चतुर्)

(*vi*) अहम् ………………………… देवैः सह वेदगानं करोमि। (त्रि)

8. **कोष्ठके प्रदत्त धातुनाम् लकारस्य उचितधातुरूपैः रिक्तस्थानानि पूरयत।** 1 × 3 = 3

(कोष्ठक में दिए गए धातुओं के लकारों के उचित धातु रूपों से रिक्त स्थानों की पूर्ति कीजिए।)

(Fill in the blanks with the suitable verb-stem from the brackets dhatoos lakars.)

(*i*) सर्वे भद्राणि ..........................................। (दृश्-लोट् लकारे)

(क) पश्यतु (ख) पश्यथ (ग) पश्यन्तु (घ) पश्याम

(*ii*) शिष्याः गुरून् दृष्ट्वा ..........................................। (मुद्, लट् लकारे)

(*iii*) योगिनः नित्यम् ईश्वरं ..........................................। (इष्, विधिलिङ्)

9. **मञ्जूषायाः पदेषु उचितं पदं चित्वा रिक्तस्थानानि पूरयत।** 1 × 4 = 4

(मञ्जूषा से उचित पदों को चुनकर रिक्त स्थानों की पूर्ति कीजिए।)

(Fill in the blanks with suitable words choosing from the given in the box.)

वानराः उद्याने (*i*) .......................... प्रति धावन्ति। परम् अद्यत्वे वृक्षाः (*ii*) .......................... हीनाः सन्ति। अतः ते वानराः (*iii*) .......................... ((क) फलैः (ख) फलेषु (ग) फलेभ्यः (घ) फलात्) विना बुभुक्षिताः एव उपतिष्ठन्ति। ते फलेषु अतीव स्निह्यन्ति। परम् (*iv*) .......................... वामतः वृक्षे कानिचित् फलानि सन्ति।

मञ्जूषा—फलैः, वृक्षान्, उद्यानस्य।

10. **निम्नलिखितेषु स्थूलपदेषु प्रत्ययान् विभज्य संयोज्य वा लिखत।** 1 × 3 = 3

(निम्नलिखित **मोटे** पद में दिए गए प्रत्ययों का विभाजन व संयोजन करके लिखिए।)

(Write the right **bold** words after separating and joining the suffixes.)

(*i*) सा सर्वोच्च-पदवीं (प्र + आप् + ल्यप्) प्रासीदत्।

(क) प्रापय (ख) प्राप्त्वा (ग) प्रापत्वा (घ) प्राप्ये

(*ii*) सः पाठम् (स्मृ + क्त्वा) .......................... आगच्छत्। (स्मृत्वा, स्मरित्वा, स्मारित्वा, स्मर्त्वा)

(*iii*) इमाम उपाधिं (प्राप्तुम्) .......................... सः प्रयत्नं करोति।

11. **निम्न पदेषु उपसर्गान पृथक् कृत्वा लिखत–** ½ × 4 = 2

(*i*) उपगम्य – ..........................

(*ii*) आक्रम्य – ..........................

(*iii*) अनुभवितुम् – ..........................

(*iv*) संयोजनम् – ..........................

खण्डः 'घ' (पठित-अवबोधनम्) के प्रश्न
पाठ्यपुस्तक पर आधारित हैं तथा 35 अंक के हैं।

# अभ्यास-प्रश्नपत्रम्–5

अवधिः होरात्रयम् | पूर्णाङ्काः 80

निर्देशः — विद्यार्थी कृपया निर्देश अभ्यास प्रश्नपत्रम्-1 से देखें।

## खण्डः 'क' ( अपठित-अवबोधनम् ) 5 अङ्काः

1. **गद्यांशान् पठित्वा प्रश्नान् उत्तरत।** (गद्यांश को पढ़कर प्रश्नों के उत्तर दीजिए। Read the paragraph and answer the questions.) 5

एकदा एकः नरः सरोवरतटे अभ्रमत्। सः गम्भीरचिन्तने रतः आसीत्। सहसा वानराणां शब्दैः तस्य ध्यानभङ्गः अभवत्। सः अपश्यत् यद् रक्तवर्णाः अतिविकरालाः वानराः नातिदूरे आसन्। सः धावितुम् आरभत। तं धावन्तं दृष्ट्वा वानराः अपि अनुधावितवन्तः। भीतः सः तीव्रगत्या धावितुम् आरभत। "मा धाव, भयं त्यक्त्वा तत्रैव स्थिरः भव" इति कस्यचित् वृद्धजनस्य उच्चस्वरं श्रुत्वा सः तथैव अकरोत्। तं स्थिरं दृष्ट्वा वानराः अपि तत्रैव स्थितवन्तः। साहसं कृत्वा निर्भीकदृष्ट्या सः वानरान् अपश्यत्। तं निर्भीकं दृष्ट्वा वानरसमूहः पलायितः। अहो! आश्चर्यम्। कीदृशः चमत्कारः। अनेन अनुभवेन तस्य ज्ञान-चक्षुषी उन्मीलिते। तेन ज्ञातं यद् आपत्तिभ्यः मुक्तिः दृढ़संकल्पेन, साहसेन, धैर्येण च भवति न ताभ्यः पलायनेन। किं भवन्तः जानन्ति एषः नरः कः आसीत्? एषः आसीत् स्वामीविवेकानन्दः।

**प्रश्नाः—**

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.) ½ × 2 = 1

(*i*) "मा धाव" इति कः अकथयत्?

(*ii*) कः महात्मा सरोवरतटे भ्रमति स्म?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.) 1 × 1 = 1

(*i*) आपत्तिभ्यः मुक्तिः कथं भवति?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.) ½ × 4 = 2

(*i*) "तं स्थिरं दृष्ट्वा" अत्र 'तम्' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(क) स्वामिने (ख) विवेकानन्दाय (ग) स्वामिविवेकानन्दाय (घ) स्वामीविवेकानन्दाय

(*ii*) 'समीपम्' अस्य विलोमपदं गद्यांशात् चित्वा लिखत।

(क) नातिदूरे (ख) अतिदूरे (ग) दूरे (घ) नाति

(*iii*) 'आकर्ण्य' अस्य किं पर्यायवाचिपदम् गद्यांशे प्रयुक्तम्?

(क) ज्ञात्वा (ख) गत्वा (ग) श्रुत्वा (घ) दत्त्वा

(*iv*) 'एषः नरः' अत्र विशेष्यपदं किम्?

(क) नरः (ख) एषः (ग) एष (घ) नर

**IV. अस्य अनुच्छेदस्य उपयुक्तं शीर्षकं लिखत।** 1 × 1 = 1

(इस अनुच्छेद का उचित शीर्षक लिखिए। Write an appropriate title of this paragraph.)

## खण्डः 'ख' ( रचनात्मक कार्यम् ) 15 अङ्काः

2. **अधोलिखितम् वर्धापनपत्रम् उचितशब्दैः पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत।** ½ × 10 = 5

(नीचे लिखे बधाई-पत्र को उचित शब्दों से पूरा करके उत्तर पुस्तिका में फिर से लिखिए। Re-write the following letter of congratulation again in answer book after completing with suitable words.)

डी०ए०वी० विद्यालयः

*(i)* ..............................

दिनाङ्कः 03.08.20.....

प्रियमित्र सोमेन्द्र!

*(ii)* .............................. ।

अत्र कुशलं तत्रास्तु। भवतः पत्रं *(iii)* .............................. ज्ञातं यत् भवान् परीक्षायां प्रथमं स्थानं प्राप्तवान्। इदं ज्ञात्वा मम चित्तं प्रफुल्लम् जातम्। *(iv)* .............................. एतत् सर्वं तव सतत *(v)* .............................. एव फलम् अस्ति। मम गृहस्य सर्वेषाम् *(vi)*.............................. पक्षतः भवते वर्धापनानि। भवान् उत्तरोत्तरं *(vii)* .............................. प्राप्नोतु एषा अस्माकं शुभकामनाः। मातृपितृचरणेषु *(viii)* .............................. प्रणामाः। अनुजाय स्नेहराशिः।

धन्यवादेन *(ix)* ..............................

भवतः मित्रम्

*(x)* ..............................

| |
|---|
| **मञ्जूषा**—वाराणसीतः, सहितम्, मित्रवर्य!, मम, सफलतां, उमेशः, पठित्वा, परिश्रमस्य, सदस्यानाम्, नमोनमः। |

3. **मञ्जूषायाः शब्दान् नीत्वा चित्रस्य वर्णनम् पञ्चसु संस्कृत वाक्येषु कुरुत।**

(मञ्जूषा से शब्दों को लेकर चित्र का वर्णन पाँच संस्कृत वाक्यों में कीजिए।)

(Describe the picture in five sanskrit sentences taking words from the box.) 1 × 5 = 5

| |
|---|
| **मञ्जूषा**—विद्यालयस्य छात्राः, भोजनं, बालकः, उड्डयतः, बसयानम्, क्रीडन्ति, सन्ति, प्रसन्नाः, चालयति, तरति। |



अथवा

मञ्जूषायाः पदानि गृहीत्वा सरल संस्कृते 'परोपकारः' इति विषये पञ्चवाक्यानि लिखत। $1 \times 5 = 5$

| |
|---|
| मञ्जूषा—परेषाम् उपकारः, एव, परोपकारः, परोपकारी सदैव सुखी, परोपकारः, पुण्याय, महापुरुषाः, परोपकारं, जीवनस्य, आनन्दः, देवानाम् लक्षणम्, राक्षसाणाञ्च विरोधः, प्रकृतिः परोपकारं करोति, नद्यः वहन्ति, वृक्षाः फलन्ति। |

4. निम्न वाक्यानां सरल संस्कृते अनुवादं कृत्वा लिखत– $1 \times 5 = 5$

(*i*) अहिंसा सबसे बड़ा धर्म है। (*ii*) दया धर्म का मूल है।
(*iii*) संस्कृत से संस्कार की शिक्षा मिलती है। (*iv*) देवों की भाषा संस्कृत है।
(*v*) वह पढ़ने के लिए विद्यालय जाता है।

## खण्डः 'ग' ( अनुप्रयुक्त-व्याकरणम् ) 25 अङ्काः

5. ( क ) उचितेन स्वरेण रिक्तस्थानम् सम्पूरयत– $\frac{1}{2} \times 2 = 1$

(*i*) परिश्रमम्– प् + अ + र् + ······ + श् + र् + अ + म् + अ + म्।

(क) इ (ख) ए (ग) अ (घ) ई

(*ii*) म् + आ + त् + र् + आ + ल् + ओ + क् + अः = ·························

( ख ) निम्न वर्णानाम् उच्चारण स्थानानि लिखत– $1 \times 2 = 2$

(*i*) 'कमलानि' अत्र कस्य स्वरस्य उच्चारणस्थानं तालुः अस्ति?

(क) इ (ख) अ (ग) आ (घ) उ

(*ii*) प् – ·······················

6. अधोलिखितेषु वाक्येषु रेखाङ्कित पदानां सन्धिं विच्छेदं वा कृत्वा लिखत– $1 \times 4 = 4$

(*i*) बालकः <u>विद्या + आलयं</u> दृष्ट्वा अवदत्।

(क) विद्यालयं (ख) विद्यलयं (ग) विद्यालयः (घ) विद्यालायं

(*ii*) <u>महौषधिं</u> प्राप्य रुग्णाः प्रासीदत्।

(*iii*) दिल्लीश्वरः एव <u>जगदीश्वरः</u> भवति।

(*iv*) रामः <u>लक्ष्मणः + च</u> वनम् अगच्छताम्।

7. अधोलिखितवाक्येषु उचितविभक्ति युक्तपदैः रिक्तस्थानपूर्तिः क्रियताम्। $1 \times 6 = 6$

(नीचे लिखे वाक्यों में उचित विभक्तियुक्त शब्दों से रिक्त स्थानों की पूर्ति कीजिए।)
(Fill in the blanks with suitable inflexion of the words in the following sentences.)

(*i*) ························································ सर्वत्र पूजा भवति।

(क) विद्वांसः (ख) विदुषः (ग) विदुषि (घ) विद्वानानाम्

(*ii*) अहं ························································ प्रणमामि। (भवत्)

(*iii*) सायं तत्र ························································ आगमिष्यति। (पितृ)

(*iv*) अहम् अद्य चिन्तयामि ························· प्रतिकूलं न समाचरेत्। (आत्मन्)

(*v*) तत्र ························· छात्राः पठन्ति। (त्रि)

(*vi*) सीता ························· पतिव्रता नारी आसीत्। (एक)

**8. निर्देशमनुसृत्य कोष्ठकस्य उचितधातुरूपैः वाक्यानि पूरयत।** $1 \times 3 = 3$

(निर्देश के अनुसार कोष्ठक के उचित धातु रूपों से वाक्यों को पूरा कीजिए।)

(Complete the sentences with suitable verb-stem according to the instruction from the bracket.)

(*i*) यूयम् पुस्तकानि ................................। (आप् लोट् लकारे)

(क) आप्नुत (ख) आप्नोतु (ग) आप्नुहि (घ) आप्नुवानि

(*ii*) आवाम् संस्कृतम् ................................। (पठ्, लट् लकारे)

(*iii*) त्वं कक्षायाः बहिः कथम् ........................? (गम्, लङ् लकारे)

**9. मञ्जूषायाः पदेषु उचितं पदं चित्वा रिक्तस्थानानि पूरयत।** $1 \times 4 = 4$

(मञ्जूषा के पदों में से उचित शब्द को चुनकर रिक्त स्थानों की पूर्ति कीजिए।)

(Fill in the blanks with suitable words choosing from the given in the box.)

कश्चित् कुत्रापि (*i*) .................. विना न गच्छेयुः यतः (*ii*) ........................ हीनः कदापि न शोभते। श्रेष्ठाः बालाः उत्तम (*iii*) ........................ ((क) कर्मेभ्यः (ख) कर्मभ्यः (ग) कर्मात् (घ) कर्मणा) कदापि न प्रमाद्यन्ति। ते (*iv*) ........................ एव विश्वसन्ति। अतः आलस्येन अलम्।

| मञ्जूषा—परिश्रमे, प्रयोजनेन, प्रयोजनम्। |
|---|

**10. निम्नलिखितेषु स्थूलपदेषु प्रत्ययान् विभज्य संयोज्य च लिखत।** $1 \times 3 = 3$

(निम्नलिखित **मोटे** पद में दिए गए प्रत्ययों का विभांजन व संयोजन करके लिखिए।)

(Write the right **bold** words after separating & joining the suffixes.)

(*i*) राष्ट्रम् सेवित्वा ................................ सैनिकः अवदत्।

(*ii*) सर्वे **( वि + लप् + तुमुन् )** ........................ तत्र आगच्छन्।

(क) विलपितुम् (ख) विलप्तुम् (ग) विलपतुम् (घ) विलपातुम्

(*iii*) भवान् कुत्र **( प्र + विश् + ल्यप् )** ........................ उपतिष्ठत्।

**11. निम्न उपसर्गैः नवीनानि पदानि रचयित्वा तानि वाक्येषु प्रयोज्य लिखत–** $1 \times 2 = 2$

(*i*) अनु – ........................

(*ii*) उप – ........................

| खण्डः 'घ' (पठित-अवबोधनम्) के प्रश्न पाठ्यपुस्तक पर आधारित हैं तथा 35 अंक के हैं। |
|---|